समाप्ताचेयंस्कन्दपुराणान्तर्गतपञ्चमावन्तीखण्डस्य (पूर्वार्द्धस्य)

विषयानुक्रमणिका ।

इतिविद्वज्जनकृपाभिलाषिणौ लक्ष्मणदुर्गाभिजन (लक्ष्मणगढ़-सीकरनिवासि)

ब्रह्मदत्तत्रिवेदि—नवलदुर्गवास्तव्य (नवलगढ़-जयपुरनिवासि)

रामनाथमिश्रदाधीचौ ।

शुभम्भूयात्

———

* श्रीगणेशायनमः *

॥ ॐ नमोभगवतेवासुदेवाय ॥

श्रीमन्महर्षिवेदव्यासप्रणीतम्

स्कन्दपुराणम्

—:*:—

तस्येदं पञ्चममवन्तीखण्डम्प्रारभ्यते

प्रथमोऽध्यायः

मङ्गलाचरणपूर्वकंमहाकालवनप्रशंसावर्णनम्

स्रष्टारोऽपि प्रजानां प्रबलभवभयाद्यं नमस्यन्ति देवा-
यश्चित्ते सम्प्रविष्टोऽप्यवहितमनसां ध्यानयुक्तात्मनां च ।
लोकानामादिदेवः स जयतुभगवाञ्छ्रीमहाकालनामा;
बिभ्राणः सोमलेखामहिवलययुतं व्यक्तलिङ्गं कपालम् ॥ १॥

उमोवाच

पृथिव्यां यानि तीर्थानि पुण्याश्चसरितस्तथा ।
कथ्यतां तानि यत्नेन श्राद्धं येषु प्रदीयते ॥ २ ॥

ईश्वर उवाच

अस्तिलोकेषुविख्याता गङ्गात्रिपथगानदी। सेवितादेवगन्धर्वैर्मुनिभिश्चनिषेविता
तपनस्यसुतादेवी यमुनालोकपावनी। पितृणांवल्लभादेवि! महापातकनाशिनी ॥ ४
चन्द्रभागावितस्ताच नर्म्मदाऽमरकण्टकम्। कुरुक्षेत्रंगयांदेवि! प्रभासंनैमिषन्तथा
केदारंपुष्करञ्चैव तथाकायावरोहणम्। तथापुण्यतमन्देविमहाकालवनं शुभम् ॥ ६॥
यत्रास्तेश्रीमहाकालः पापेन्धनहुताशनः। क्षेत्रंयोजनपर्यन्तं ब्रह्महत्यादिनाशनम् ॥ ७
भुक्तिदं मुक्तिदं क्षेत्रं कलिकल्मषनाशनम्। प्रलयेऽप्यक्षयंदेवि दुष्प्रापं त्रिदशैरपि ॥

उमोवाच

प्रभावः कथ्यतां देव! क्षेत्रस्याऽस्य महेश्वर!।
यानि तीर्थानि विद्यन्ते यानि लिङ्गानि सन्ति वै ॥ ६ ॥
तान्यहं श्रोतुमिच्छामि परं कौतूहलं हि मे ॥ १० ॥

महादेव उवाच

श्रृणुदेविप्रयत्नेन प्रभावंपापनाशनम्। क्षेत्रमाद्यंमहादेवि! सर्वपापप्रणाशनम् ॥ ११॥
श्रीमेरोस्सन्निधाने यच्छिखरं रत्नचित्रितम्। वैराजभवनंनाम ब्रह्मणः परमात्मनः ॥
तत्रदिव्याङ्गनागीतमधुरस्वरनादिता। पारिजाततरुच्छन्नमञ्जरीदामशोभिता ॥ १३
बहुवाद्यसमुत्पन्नसुमहास्वननादिता। लयतालयुतानेकगीतवादित्रनादिता ॥
विन्यस्ता कोटिभिः स्तम्भैर्निर्मलादर्शशोभिता ॥ १४ ॥
अप्सरोनृत्यविन्यासविलासोल्लासशोभिता।
सभाकान्तिमतीनाम्नी देवानां हर्षदायिका ॥ १५ ॥
तस्यांनिविष्टं वागीशशङ्कराराधने रतम्। सनत्कुमारंब्रह्मर्षिं ब्रह्मणोमानसं सुतम्
मुनिमध्यात्समुत्थाय कृष्णद्वैपायनो मुनिः।
पराशरसुतोव्यासः प्रणिपत्य यथाविधि ॥ १७ ॥
कृताञ्जलिपुटोभूत्वा भवभक्त्यानुभावितः। पप्रच्छपरयातुष्ट्या हृषितां गरुडाननः
महाकालस्य माहात्म्यं प्राणिनां मोहनाशनम्।

व्यास उवाच

भगवन्! क्षेत्रमाहात्म्यं महाकालस्य कथ्यताम् ॥ १६ ॥
महाकालवनंकस्मात् प्रोच्यतेसर्वतोवरम्। कथं गुह्यवनं प्रोक्तं पीठंसऊषरन्तथा ॥
फलंयथास्यक्षेत्रस्य मृतानाञ्चगतिर्यथा। स्नानेनयद्भवेत्पुण्यं दानेनापिचयत्फलम् ॥
कथमेतच्छ्मशानञ्च क्षेत्रं प्रोक्तं यथातथा। पृष्टोमेशङ्करेभक्तिं ब्रूहि त्वं शास्त्रकोविद

सनत्कुमार उवाच

क्षीयतेपातकंयस्मात् तेनेदंक्षेत्रमुच्यते। यस्मात्स्थानञ्चमातृणां पीठन्तेनैवकथ्यते
मृताः पुनर्नजायन्ते तेनेदमूषरं स्मृतम्। गुह्यमेतत् प्रियन्नित्यं क्षेत्रंशम्भोर्महात्मनः
यस्मादिष्टंहिभूतानां श्मशानमतिवल्लभम्। महाकालवनंयच्च तच्चैवापिविमुक्तिकम्
एकाम्रकंभद्रकालं करवीरवनन्तथा। कोलागिरिस्तथा काशीप्रयागममरेश्वरम् ॥
भरतंचैव केदारं दिव्यं रुद्रमहालयम्। दिव्यश्मशानान्येतानिरुद्रस्येष्टानिनित्यशः ॥
रमतेभगवानेषु सिद्धिक्षेत्रेषु सर्वदा। पृथिव्यान्नैमिषंतीर्थमुत्तमं तीर्थपुष्करम् ॥ २८
त्रयाणामपिलोकानां कुरुक्षेत्रं च शस्यते। कुरुक्षेत्राद्दशगुणा पुण्यावाराणसीमता ॥
तस्माद्दशगुणंव्यास! महाकालवनोत्तमम्। प्रभासाद्यानितीर्थानिपृथिव्यामिहयानितु
प्रभासमुत्तमंतीर्थं क्षेत्रमाद्यंपिनाकिनः। श्रीशैलमुत्तमंतीर्थं देवदारुवनंतथा ॥ ३१ ॥
तस्मादप्युत्तमा व्यास! पुण्या वाराणसी मता।
तस्माद्दशगुणं प्रोक्तं सर्वतीर्थोत्तमं यतः ॥ ३२ ॥
महाकालवनंगुह्यंसिद्धिक्षेत्रंतथोषरम्। किञ्चिद्गुह्यान्यथान्यानिश्मशानान्यूषराणिच
सर्वतस्तुसमाख्यातं महाकालवनंमुने!। श्मशानमूषरं क्षेत्रं पीठन्तु वनमेवच ॥ ३४॥
पञ्चैकत्र न लभ्यन्ते महाकालपुराद्वृते ॥ ३५ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे
महाकालवनप्रशंसानामप्रथमोऽध्यायः ॥ १ ॥

———

द्वितीयोऽध्यायः

ब्रह्मशिरश्छेदवर्णनम्

सनत्कुमार उवाच

पुरात्वेकार्णवेप्राप्ते नष्टे स्थावरजङ्गमे । नाग्निर्नवायुरादित्यो न भूमिर्नदिशोनभः ॥१॥
ननक्षत्राणिनज्योतिर्नद्यौर्नेन्दुर्ग्रहास्तथा । नदेवासुरगन्धर्वाः पिशाचोरगराक्षसाः ॥
सरांसिनैवगिरयो नापगा नोह्रदास्तथा । सर्वमेवतमोभूतं न प्राज्ञायत किञ्चन ॥ ३

तदैको हि महाकालो लोकानुग्रहकारणात् ।
तस्थौ स्थानान्यशेषाणि काष्ठास्वालोकयन् प्रभुः ॥ ४ ॥

सृष्ट्यर्थेसमहाकालःकरेकाष्ठंप्रतिष्ठितम् । दक्षिणस्यतुतर्जन्या निर्ममन्थाविशेषितम्
कललंबुद्बुदं भूत्वा तीव्रवेगविवर्द्धितम् । जज्ञे तदण्डं सुदृढं सुष्ठुवृत्तं हिरण्मयम् ॥
करेणताडितंतद्धिबभूवद्विदलंमहत् । अधः खण्डंस्मृताभूमिरूर्ध्वंद्यौस्तारकान्वितम्
मध्येऽभवत्तदाब्रह्मा पञ्चवक्त्रश्चतुर्भुजः । महेश्वरोऽनुमान्यैतमयोजयदनन्तरम् ॥ ८

कुरु सृष्टिं महाबाहो! विचित्रां मदनुग्रहात् ।
इत्युक्त्वाऽन्तर्हितः क्वाऽपि देवो ब्रह्मा न ज्ञातवान् ॥ ६ ॥

प्रेर्यमाणोऽपिवैस्रष्टुं नाभूद्देवमचिन्तयत् । ब्रह्मणाध्यायमानश्च ज्ञानार्थंभगवान्भवः
ब्रह्मणस्तपसा तुष्टः प्रादाद्वेदंषडङ्गकम् । लब्धेवेदेऽपिनचिरात् सृष्टिंकर्तुंशशाकसः॥
तपसाराधयद्भूयः समाराधयितुंभवम् । नापश्यत्सयदादेवं तदा तुष्टाव भावतः ॥

ब्रह्मोवाच

नमः शिवायाऽमलसत्त्वचेतसे गुणत्रयातीतविसारितेजसे ।
षडङ्गवेदस्यममाऽपि वेधसः परस्यरूपानुभवाय चक्षुषे ॥ १३ ॥
नमोऽस्तुते सृष्टिविधौरजोजुषे जगत्स्थितौसत्त्वमधिष्ठिताय ते ।
विनाशहेतौतमसोपयोगिने शिवाय निर्वाणसुखप्रदायिने ॥ १४ ॥

अशेषभूतप्रकृतेः पराय वै परात्मरूपाय नमः शिवाय वै ।
नबुद्ध्यहङ्कारमनोविधाय धात्रे च षड्विंशकरूपकाय ॥ १५ ॥
भूवायुवह्न्यम्बरवारिचन्द्रसूर्यात्मरूपाभिरिदन्तनूभिः ।
व्याप्तंजगद्यस्यनमोऽस्तु तस्मै भूतं भविष्यं त्वथ वर्तमानम् ॥ १६ ॥
यानीहतेजांसि जगन्तियानि भूतानि भव्यान्यथ कारणानि ।
भवन्ति सृष्टौ विलयं विनाशे व्रजन्ति यस्याऽऽत्मनि तं नमामि ॥ १७ ॥

सनत्कुमार उवाच

एवंसंस्तुवतोव्यास! ब्रह्मणोभगवान्परः । अन्तर्हित उवाचेदं ब्रह्मन्संवाच्यतांवरः ॥
सव्रवेमनसापुत्रं भवंगौरवकारणात् । विज्ञायान्तर्गतंतस्य परमेश उवाच तम् ॥१६
यस्मान्मांमनसापुत्रंचतुर्मुख!समीहसे । कस्मिंश्चित्कारणेतस्मादहंछेत्स्यामितेशिरः

अयाच्यं याचितं यस्मान्ममांऽशो नीललोहितः ।
रुद्रो भविष्यति सुतः स च ते हिंस्यति प्रभाम् ॥ २१ ॥
अन्यद्यस्मात्स्मृतो भक्त्या त्वयाऽहं पितृभावतः ।
परब्रह्मस्वरूपेण जिज्ञासा मम या कृता ॥ २२ ॥

तस्माद्ब्रह्मं तिलोकेत्रनामख्यातंभविष्यति । पितामहत्वंयेनापिततोह्यसिपितामहः
लब्ध्वा शापवरावेवं पुत्रसृष्टिचकारसः । स्वतेजोजनितंवह्निं जुह्वतः स्वेदआवहत्
समिद्युक्तेनहस्तेनललाटंमार्जतोऽभवत् । छिन्नंभ्रूष्टस्ततोरक्तबिन्दुरेकोविभावसौ
सनीललोहितोभूयात्सचरुद्रो भवाज्ञया । तदनन्तरमासाद्य उत्ततार सुतोऽन्तिकात्
पञ्चवक्त्रोदशभुजो शूलचापासिशक्तिमान् । त्रिपञ्चनयनोरौद्रो व्यालयज्ञोपवीतकः
सेन्दुं कपर्द्दंबिभ्राणः सिंहचर्मधरोवरः । जातमेवंसुतंदृष्ट्वा ब्रह्मानामाकरोत्तदा ॥२८॥

नीललोहितनामेति भवरुद्रपिनाकधृक् ।
ततः प्रववृते सृष्टिः स्रष्टुर्लोकपितामहात् ॥ २६ ॥

सप्तादौमानसाञ्जज्ञे सनकादींस्ततोपरान् । मरीचिदक्षप्रभृतीन्मन्वादींश्चततोऽसृजत्
अष्टभेदान्सुरान्कृत्वा तिर्यग्योनिश्च पञ्चधा । मनुष्यानेकभेदांश्च सृष्टिमेवं ससर्जह॥

सृष्टिःसुरादिकाजाताकृत्वाब्रह्माणमप्यधः । प्रणम्याथसिषेवुस्तेकेवलंनीललोहितम्
ततोब्रह्माऽवदद्रुद्रमपूज्योऽहंत्वयाकृतः । स्वतेजसाभवान्पूज्योयतोयाहिहिमालयम्
तन्नीललोहितोऽप्युक्त्वा भवता नाऽर्चितो ह्यहम् ।
ततो जगाम रुद्रोऽसौ स यत्र भगवान्भवः ॥ ३४ ॥
ततो ब्रह्माऽभवन्मूढो रजसा चोपबृंहितः । ततापतेजसासृष्टिंमन्यमानोह्यपाकृताम्
मत्तुल्योनास्तिवैदेवो येनसृष्टिः प्रवर्द्धिता । सदेवासुरगन्धर्वपशुपक्षिमृगाकुला ॥
एवंमूढस्सपञ्चास्यो विरञ्चिसृष्टिदर्पितः । प्राग्वक्त्रंसुस्वरंतस्यऋग्वेदस्यप्रवर्तकम्
द्वितीयंवदनंतस्य यजुर्वेदप्रवर्तकम् । तृतीयं वदनन्तस्य सामवेदप्रवर्तकम् ॥ ३८ ॥
चतुर्थंवदनञ्चास्याऽथर्ववेदप्रवर्तकम् । साङ्गोपाङ्गेतिहासांश्चसरहस्यान्ससङ्ग्रहान्
वेदानधीत्यवक्त्रेण पञ्चमेनससर्जसः । तस्यासुरास्सुरास्सर्वे वक्त्रस्याद्भुततेजसः
तेजसा न प्रकाशन्ते दीपास्सूर्योदये यथा ।
सपुत्रा अपि सोद्वेगा बभूवुर्नष्टचेतनः ॥ ४१ ॥
नाभिगन्तुं न द्रष्टुञ्च चिरन्तेनोपसर्पितुम् । अभिभूतमिवात्मानंमन्यमानाअविद्विषः
सर्वे ते मन्त्रयामासुर्देवावैहितमात्मनः । गच्छाम शरणं देवं निष्प्रज्ञा ब्रह्मतेजसा ॥
किं तस्यैव न जानीमः स्थानं यत्र व्यवस्थितम् ।
तस्मीममत्र द्रक्ष्यामो भक्त्या नान्येन केनचित् ॥ ४४ ॥
एवं संमन्त्र्य ते देवाः कृताञ्जलिपुटास्तदा । चक्रुःस्तोत्रंमहेशस्य परयास्वरसम्पदा

देवाऊचुः

नमस्ते देवदेवेश महेश्वरनमोनमः । न विद्मः परमं मूढा अभिधानं तवाऽतुलम् ॥
यद्योगेनपरंब्रह्म भूताना त्वं सनातनः । प्रतिष्ठा सर्वभूतानां हेतुस्सर्वस्य सर्जने ॥
बिभर्ति चैव नेत्रस्थान् सोमसूर्यविभावसून् ।
नामसङ्कीर्तनादेव मुच्यन्ते जन्तवोऽशुभात् ॥ ४८ ॥
पृथिव्यम्ब्वग्निचन्द्रार्क व्योमवायूपलक्षणाः । मूर्तयस्तेमहादेवव्याप्तमाभिरशेषतः
रजःसत्त्वतमोभावैर्भ्राम्यमाणंत्वयाजगत् । नावबुद्ध्यति सर्वेश! सर्वमूर्तिधरोयतः

ब्रह्मादीनां सुरेशानां सम्मोहनविमोहनः । त्वङ्करोषियुगावर्तं कालेकालेचदुस्सहम्

सनत्कुमार उवाच

एवंसंस्तूयमानोऽसौ देवर्षिपितृमानवैः । अन्तर्हितउवाचेदं देवान्ब्रूतयथेप्सितम् ॥

देवा ऊचुः

प्रत्यक्षं दर्शनं स्थाणो ! प्रार्थयामस्सदा तव ।
त्वया कारुण्यतोऽस्माकं वरश्चापिप्रदीयताम् ॥ ५३ ॥
यदस्माकंमहद्वीर्यं यश्चास्माकंपराक्रमः । तत्सर्वं ब्रह्मणोग्रस्तं पञ्चमास्यस्यतेजसा
विनेशुःसर्वतेजांसि त्वत्प्रसादात्पुनर्विभो !। जायन्तेतद्यथापूर्वं तथाकुरु महेश्वर! ॥

सनत्कुमार उवाच

प्रत्यक्षं दर्शनं दत्त्वा देवानामनुकम्पया । प्रसन्नवदनोभूत्वा देवैश्चापिनमस्कृतः ॥
आश्वास्यचसुरान्सर्वान् सहदेवैर्महेश्वरः । प्रत्यक्षमेत्य पश्चाच्च चलितः शर्वएव हि॥
जगाम तत्र यत्राऽसौरजोऽहङ्कारमूर्तिमान् । देवाःस्तुवन्तोदेवेशं परिवार्यउपाविशन्
ब्रह्मातमागतन्देवं न जज्ञे तमसावृतः । सूर्यकोटिसहस्राणां तेजसाऽरञ्जयज्जगत् ॥
तदाऽदृश्यत विश्वात्मा विश्वभुग्विश्वभावनः ।
स पितामहमासीनं सकलं देवमण्डलम् ॥ ६० ॥
तेजसाभिभवन्रुद्रः स्वयम्भोरग्रतःस्थितः । रुद्रतेजोऽभिभूतश्च ब्रह्मवक्त्रंनराजते
रात्रौप्रकाशकिरणश्चन्द्रस्सूर्योदये यथा । सगर्वोत्थात्मजं दृष्ट्वा रुद्रं देवं सनातनम् ॥
अभिवन्दे करेणैव देवं तत्तेजसावृतः । ततोऽट्टहासंभगवान् मुमोच शशिशेखरः ॥
पश्यतां सर्वदेवानां शृण्वतां वाचमुत्कटाम् ।
तेनाऽट्टहासशब्देन मोहयित्वा पितामहम् ॥ ६४ ॥
तेजोराशिःशशाङ्काभः शशाङ्कार्काग्निलोचनः ।
वामाङ्गुष्ठनखाग्रेण ब्रह्मणः पञ्चमं शिरः ॥ ६५ ॥
चकर्त कदलीगर्भं नरः कररुहैरिव । छिद्यमानञ्च वक्त्रञ्च बुबुधेन पितामहः ॥६६॥
रुद्रस्यतेजसातस्मान्मोहितोननतिगतः । छिन्नंतस्य शिरःपश्चाद्रुद्रहस्तेस्थितं तदा

अपश्यद्दैवतैः सार्द्धं रौद्रश्चातिभयाज्ज्वलत् । महेश्वरकरान्तस्थं नखैर्वक्त्रंविराजते

ग्रहमण्डलमध्यस्थो द्वितीय इव चन्द्रमाः ।

उत्क्षिप्य तत्कपालेन ननर्त शशिशेखरः ॥ ६६ ॥

शिखरस्थेन सूर्येण कैलासइवपर्वतः । छिन्नेवक्त्रे ततोदेवा हृष्टपुष्टावृषध्वजम् ॥

तुष्टुवुर्विविधैः स्तोत्रैर्देवदेवं कपालिनम् ।

देवा ऊचुः

नमः कपालिने नित्यं महाकालाय शङ्खिने ॥ ७१ ॥

ऐश्वर्यज्ञानयुक्ताय सर्वभोगप्रदायिने । नमो दर्पविनाशाय सर्वदेवमयाय च ॥ ७२ ॥

कालसंहारकर्ता त्वं महाकालस्ततोह्यसि । भक्तानांदुःखशमनो दुःखार्तस्तेनरोचते ॥

शङ्करोप्याशु भक्तानां तेन त्वं शङ्करः स्मृतः ।

छित्त्वा ब्रह्मशिरो यस्मात्कपालं च बिभर्ति च ॥ ७३ ॥

तेनदेव ! कपालीत्वं स्तुतोह्यद्यप्रसीद नः । एवंस्तुतः प्रसन्नात्मा देवानुत्थायशङ्करः

वृन्दारकेशो भगवांस्तत्रैवाऽन्तरधीयत ॥ ६६ ॥

शशिशकलमयूखैर्भासितोयत्कपर्दस्त्वमलगगनगङ्गातोयवीचीविचेयः ।

विधृतसितकपालोमालया यश्चकास्ति स जयति जितवेधाऊर्जितःप्राज्यतेजाः

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे

ब्रह्मशिरश्छेदोनाम द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः

ब्रह्मणःप्रायश्चित्तकरणवर्णनम्

सनत्कुमार उवाच

छिन्नेवक्त्रेततोब्रह्मा क्रोधेनतमसावृतः । ललाटेस्वेदमुत्पन्नं गृहीत्वाऽताडयद्भुवि ॥

तत्स्वेदात्कुण्डलीजज्ञे सधनुस्समहेषुधिः । सस्वर्णकवचोवीरःकिंकरोमीत्युवाचह

तमुवाचविरञ्चिस्तु दर्शयन्रुद्रमोजसा । वध्यतामेषदुर्बुद्धिर्जायतेनयथापुनः ॥ ३ ॥

ब्रह्मणोवचनं श्रुत्वाधनुरुद्यम्यपृष्ठतः । सप्रतस्थेमहेशस्य बाणहस्तोऽतिरोषभृत् ॥

सदृष्ट्वापुरुषं चोग्रमभवद्विस्मितोभवः । दिव्यबाणधनुर्हस्तं वेगविक्रान्तगामिनम् ॥

मया नवध्योऽतिबलो सखा विष्णोर्भविष्यति ।

अनुग्राह्यो ह्यहं तेन सख्यर्थं तपसि स्थितः ॥ ६ ॥

चिन्तयन्नित्थमीशोऽपि विष्णोराश्रममभ्यगात् ।

हुङ्कारध्वनिना ब्रह्मन् ! मोहयित्वा ततो नरम् ॥ ७ ॥

प्रयात्येवतदाहृष्टः क्रीडांकुर्वञ्जगत्स्थितौ । यत्रनारायणः श्रीमांस्तपस्तेपेप्रतापवान्

अदृश्यस्सर्वभूतानांविश्वात्माविश्वसृग्विभुः । तत्रप्राप्तोविरूपाक्षो ददर्श मधुसूदनम्

एकाङ्गुष्ठस्थितम्भूमौ तपोरतमनातुरम् । युगान्तार्कसहस्रस्य तेजसावृतमद्भुतम्

पुण्याधारसमायुक्तं पुराणपुरुषोत्तमम् । दृष्ट्वानारायणंदेवो भिक्षान्देहीत्युवाचह ॥

कपालं दर्शयित्वाऽग्रे ज्वलज्ज्वलनवत्स्थितम् ।

कपालपाणिं सम्प्रेक्ष्य रुद्रं विष्णुरचिन्तयत् ॥ १२ ॥

कोन्योयोग्यो भवेद्भिक्षुर्भिक्षादानस्य साम्प्रतम् ।

योग्योऽयमिति सङ्कल्प्य दक्षिणं भुजमर्पयत् ॥ १३ ॥

बिभेदान्तर्गतन्नस्तं शूलेनशशिशेखरः । ततोप्रवाहउत्पन्नश्शोणितस्यविभोर्भुजात्

जाम्बूनदरसाकारो वह्निज्वालेवनिर्मलः । निष्पपातकपालान्तःशम्भुनासम्प्रतीच्छता

ऋज्वीवेगवतीक्षिप्रा दीधितीवाम्बरेरवेः । पञ्चाशद्योजनादीर्घा विस्तारेदशयोजना
दिव्यंवर्षसहस्रंसा समुवाहहरेर्भुजात् । कियन्तंकालमीशोहि भिक्षांजग्राहभावितः
दत्तांनारायणेनाथ सत्पात्रेपात्रउत्तमे । ततोनारायणः प्राह हरंपरमिदं वच ॥ १८ ॥
सम्पूर्णंतवपात्रंहि ततोवैपरमेश्वरः । सतोयाम्बुदनिर्घोषं श्रुत्वावाक्यंहरेर्हरः ॥ १९ ॥
शशिसूर्याग्निनयनः शशिशेखरशोभितः । कपालेदृष्टिमावेश्य त्रिभिर्नेत्रैर्जनार्दनम् ॥
अङ्गुल्याघट्टयन्प्राहकपालंचातिपूरितम् । श्रुत्वाहरिशशम्भुवाक्यं रक्तधारांसमाहरत्
कपालस्थं हरेरीशः स्वाङ्गुल्यारुधिरन्तथा । दिव्यंवर्षसहस्रंच दृष्टिपातममन्थयत्
मथ्यमानेततोरक्ते कललं बुद्बुदं क्रमात् । बभूवचततः पश्चात् किरीटीसशरासनः ॥
सहस्रबाहूरक्ताक्षो धनुर्ज्यांसंस्पृशन्मुहुः । बभूवतूणीरधरो वृषस्कन्धोऽङ्गुलित्रवान्
पुरुषोऽर्जुनसङ्काशो दिव्यमूर्तिर्बभूवह । तं दृष्ट्वा भगवान् विष्णुः प्राहरुद्रमिदं वचः
कपाले भगवन् कोऽयं प्रादुर्भूतोऽभवन्नरः । उक्तिं श्रुत्वा हरेरीशस्तमुवाचहरे शृणु
नरोनामेतिपुरुषः परमास्त्रविदांवरः । यस्त्वयोक्तोनरइति नरस्तस्माद्भविष्यति ॥

नरनारायणौ चोभौ युगे ख्यातौ भविष्यतः ।
सङ्ग्रामे देवकार्येषु लोकानां परिपालने ॥ २८ ॥

एषनारायणसखा नरस्तवभविष्यति । तवएकाकिनः सख्ये तपसश्चमहामुने !॥ २९
विज्ञानस्यपरीक्षार्थे तेजोलोकेभविष्यति । तेजोऽधिकमिदं दिव्यंब्रह्मणःपञ्चमंशिरः
तेजसाब्रह्मणोदीप्तं भुजस्यतवशोणितात् । ममदृष्टिनिपाताच्चत्रीणितेजांसियान्यतः
तत्संयोगात्समुत्पन्नःशत्रून्युद्धेजयिष्यति । अवध्यायेभविष्यन्ति दुर्जयास्तवचापरे
शक्रस्यचामरारीणां तेषामेषभयङ्करः । एवमुक्तवतश्शम्भोर्विस्मितस्तस्यतेजसा ॥
हरेरपिसतत्रैव तुष्टाव हरकेशवौ । नमो हर हरेतुभ्यं नमः शङ्करविष्णवे ॥ ३४॥
नमस्तेशूलहस्ताय नमस्तेखड्गपाणये । नमोनमस्ते मेध्याय हृषीकेशनमोऽस्तुते ॥ ३५
नमोऽस्तुवाचांपतये श्रीधरायनमोनमः । एवंस्तुवन्तं तं व्यास! कृताञ्जलिपुटं नरम्
तथैवाञ्जलिसम्बद्धं गृहीत्वासुकरद्वयम् । उद्धृत्याथकपालात्तु पुनर्वचनमब्रवीत् ॥
यएवपुरुषोरौद्रो ब्रह्मणः स्वेदसम्भवः । सतुहुङ्कारशब्देन मोहनिद्रामुपागतः ॥ ३८

निबोध तं चत्वरितमित्युक्त्वाऽन्तर्दधे हरः ।
नारायणस्य प्रत्यक्षं बोधयामास स्राङ्नरम् ॥ ३९ ॥

वामपादेनतंहत्वा समुत्तस्थौनरोरुषा । तयोर्युद्धंसमभवत्स्वेदरक्तजयोर्महत् ॥ ४०
विस्फारितधनुश्शब्दैर्नादिताशेषभूतलम् । कवचंस्वेदजस्यैकं रक्तजस्यतथाभुजौ ॥
एवंसमेनवैयुद्धं दिव्यं जातन्तु भूतले । त्रिवर्षोनानि वर्षाणां शतानिदशसुद्विज !॥
युद्ध्यतोस्समतीतानि स्वेदरक्तजयोर्मुने !। रक्तजोद्विभुजोदृष्ट्वा कवचैकेनस्वेदजम् ॥
बिभेदबाणवेगेन ब्रह्मणः स्वेदजं नरम् । ससम्भ्रममुवाचेदं ब्रह्माणं मधुसूदनः ॥४४॥

मन्नरेणोच्छ्रितो ब्रह्मंस्त्वदीयो विनिपातितः ।
श्रुत्वा तदाकुलो ब्रह्मा बभाषे मधुसूदनम् ॥ ४५ ॥

हरेऽन्यजन्मनि नरो मदीयो यदिहीयते । तदास्सहायं कर्तव्यं वचनान्मम माधव !॥
तेनतुष्टेनसम्प्रोक्तं हरिणैवं भविष्यति । ततस्तयोरणमपि निवार्यतामुवाचह ॥ ४७

अथान्यजन्मनि नरो मदीयो भविता कलौ ।
ततो महारणे जाते तत्राऽहं योजयामि तम् ॥ ४८ ॥
विष्णुनाऽथसमाहूय दिनेश्वरसुरेश्वरौ ।
उक्ताविमौ नरौ रौद्रौ पालनीयौ स्वयन्ततः ॥ ४९ ॥
स्वेदजातोऽप्यसृग्जातः स्वकीयांशौ धरातले ।
स्वांशभूतौ द्वापरान्ते निर्योज्यौ भूतले त्वया ॥ ५० ॥

ततोऽब्रवीत्तदाविष्णुं सुरेशोदुःखितंवचः । अस्मिन्मन्वन्तरेदेव! त्रेतानाम्नियुगेहरे
तद्रूपेणैव महता सूर्यपुत्रहितार्थिना । बालीनाम महाबाहुः सुग्रीवार्थेनिपातितः ॥
तेनदुःखेन तप्तोऽहं नाहं गृह्णामितेनरम् । अग्राह्यमाणं देवेशं कारणान्तरवादिनम् ॥
विष्णुःप्रोवाचमघवन् भुवोभारावतारणे । अवतारंकरिष्यामि मर्त्यलोकेऽप्यहंविभो
ततोहृष्टो ऽभवच्छक्रो विष्णुभावेनतेनवै । प्रतिगृह्यनरंहृष्टस्सत्यमस्तु वचस्तव ॥

इत्युक्त्वा तु रवीन्द्रौ स प्रेषयित्वा च तौ पुनः ।
गत्वा च पुण्डरीकाक्षो ब्रह्माणं ब्रह्मवेशमनि ॥ ५६ ॥

उवाचवाचंधर्मज्ञस्तस्य पापविशुद्धये । कृतंजुगुप्सितंकर्म ब्रह्मन्नीशंजिघांसता ॥५७
यत्त्वयादेवदेवेश! पुमान्कोपेन भाषितः । शुद्ध्यर्थमेवपापस्य प्रायश्चित्तं परंकुरु ॥
गृहाण्वह्नित्रयंब्रह्मन्नग्निहोत्रमुपासकः । एको वै गार्हपत्यस्तु द्वितीयोहवनीयकः ॥
दक्षिणाग्निस्तृतीयस्तु त्रिखण्डेषु प्रकल्पय ।
वर्तुले स्थापयाऽऽत्मानं मामथो धनुषाकृतौ ॥ ६० ॥
चतुष्कोणे हरं देवं ऋग्यजुः सामनामभिः ।
हुत्वात्वग्निश्च तपसा हरावर्पय तत्क्षणात् ॥ ६१ ॥
दिव्यं वर्षसहस्रन्तु हुत्वाऽग्निं सिद्धिमाप्स्यसि ।
प्रायश्चित्तविशुद्धात्मा प्रतिपद्य महेश्वरम् ॥ ६२ ॥
ततो निष्कलमषो भूत्वा विषादस्ते गमिष्यति ॥ ६३ ॥
इत्येवमुक्त्वा हरिरुग्रतेजा गतःस्वकीयं निलयं महात्मा ।
ब्रह्माऽपि चित्तं तपसे निधाय समादधे सर्वमथाऽच्युतोक्तम् ॥ ६४ ॥
इति श्रीस्कान्देमहापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमे-
ऽवन्तीखण्डे ब्रह्मणःप्रायश्चित्तंनाम तृतीयोऽध्यायः ॥३॥

चतुर्थोऽध्यायः

अग्नेराविर्भाववर्णनम्

व्यास उवाच

योऽसौकपाल उत्पन्नो नरोनामधनुर्धरः । किमेवंसोऽधुनाजात उत्पत्तौविश्वकर्मणः
कथंरुद्रेणजनितः प्रभुणाबुद्धिपूर्वकम् । विष्णुना वा भगवता ब्रह्मणाभावभेदतः ॥
केन कस्मात्समुत्पन्नः शङ्कराच्युतब्रह्मणाम् ।
ब्रह्मा हिरण्यगर्भो यो यो जातश्च चतुर्मुखः ॥ ३ ॥

अद्भुतं पञ्चमंवक्त्रंकथन्तस्याप्युपस्थितम् । सतस्थौ भगवान्ब्रह्मा कथंरुद्रेमनोदधन्
मूढात्मना नरो येन हन्तुं स प्रहितो हरम् ।

सनत्कुमार उवाच

महेश्वरहरीएतौ द्वावेवव्यास! तिष्ठतः । तयोरविदितंनास्ति सिद्धासिद्धंमहात्मनोः
ब्रह्मणःपञ्चमंवक्त्रं यत्तदासीन्महात्मनः । तस्यैव मानसःसोऽग्निः शिरसातेनवैधृतः
योनरो ब्रह्मणाप्रोक्तः सोऽप्यग्निस्तस्यमानसः । दधार तं महादेवःकृताङ्गुल्यन्तरान्तरे
पूर्वंदृष्ट्वा समुत्पत्तिमेवं तस्यमहात्मनः । तस्मात्कपालादङ्गुल्या घृष्यमानादजायत ॥
सतंहत्वाशरेणाजौ ब्रह्मणोनिहितंरजः । मुमोहरजसासत्त्वं यद्दृच्छाकृतप्रभुर्यतः ॥

व्यास उवाच

कथमग्निः समुत्पन्नो योनिःशर्वेणधारितः । विस्तरेणसमाचक्ष्व भगवन्मुनिवन्दित

सनत्कुमार उवाच

अव्यक्तादीन्ससर्जादावण्डंहितदजायत । जज्ञे सौवर्णवर्णाभो ब्रह्मालोकपितामहः॥
स्वयम्भूः स तपस्तप्त्वा दिव्यं वर्षशतं महत् ।
सन्तस्थौव्याजहाराऽथभूर्भुवःस्वरितिश्रुतिः ॥ १२ ॥
श्रुतियोगात्तु मनसः पश्चादग्निरजायत । अधोमुखःपताताऽग्निः पृथिवींनिर्दहन् यदा
पाणिभ्यां ब्रह्मणा सोऽग्निर्भूमेरूर्ध्वं निवेशितः ।
ततो दक्षिणहस्तेन वेद्यामग्निः प्रणीयते ॥ १४ ॥
पुरापतन्नधोज्वालऊर्ध्वज्वालोयतोधृतः । उत्तानश्चकृतोयस्माद्ब्रह्मणानिर्मितस्त्रिधा
ज्वालाभिः प्रज्वलन्नूर्ध्वं सर्वशब्दः स्फुलिङ्गवान् ।
हिरण्यवर्णं ब्रह्माणं सउवाचाऽग्निरुत्कटम् ॥ १६ ॥
किमर्थं तु मया देव भूमिभक्ष्यं निवारितम् । बुभुक्षयाहमाविष्टआहारोमेप्रदीयताम्
एवमुक्तोऽग्नयेब्रह्मा स्वरोमाणिजुहावसः । कुशश्चखादन्नग्निस्तु सर्वरोमाणिब्रह्मणः
अब्रवीच्चनमेतृप्तिर्नचमेदेहनिर्वृतिः । त्वचंजुहावब्रह्मा स चखादाऽग्निस्तमेव च ॥१६
अब्रवीत्तं ततो वह्निस्तृप्तिर्नास्ति ममैव हि ।

जुहाव स्वानि मांसानि त्वचोत्कृत्य प्रजापतिः ॥ २१ ॥
अब्रवीच्चनमेतृप्तिर्नचमेदेहनिर्वृ तिः । जुहाव ब्रह्माचास्थीनि तान्यश्नन्स बुभुक्षितः ॥
ततोब्रह्माहुताशेन कृतोदेहीविधातुकः । तमदेहमथोवह्निर्ब्रह्माणमवदच्च सः ॥ २२ ॥
अहोब्रह्मन्नमेतृप्तिर्नचदेहनिर्वृ तिः । क्रुद्धेनब्रह्मणासोऽग्निर्हु ङ्कारेणद्विधाकृतः ॥ २३ ॥
आहतूरुदतावग्नी आहारार्थं प्रजापतिम् । हुङ्कारेणपुनर्ब्रह्मा द्विधैकैकंचकार वै ॥२४॥
त्रयस्तेषां रुदन्तिस्म रुद्रमेकोहि संश्रितः । क्रुद्धेनब्रह्मणाव्यास हुङ्कारेणैवताडितः
रोरूयमाणे चाग्नौ तु पुनर्ब्रह्मा कृपान्वितः ।
आह कामाभिभूतानां भुङ्क्ष्व त्वं देहधातवः ॥ २६ ॥
ते काले लब्धकामस्य सावृत्तिः सम्प्रकल्पिता ।
अकाराग्निं सन्निविष्टं दृष्ट्वा मनसि मानसम् ॥ २७ ॥
अकाराग्निःप्रजज्वाल किमेतदितिचाब्रवीत् । ब्रह्मातमाहत्वमपि यथेष्टांवृत्तिमाश्रय
देवमध्येबहिर्वापि मुनीनामाश्रयेषु च । इत्येवमुक्तस्तेनाऽऽशु वृत्तिमेतामरोचयत् ॥
अहमेवं प्रदास्यामि पुनःपुनरुवाच ह । यस्मादेषद्वितीयोऽग्निर्हु ङ्कारात्समजायत ॥
साभिमानोऽपमानो वा हुङ्कारो यत्र कथ्यते ।
सा च वृत्तिर्ममादेशाद्द बुभुक्षा शान्तये तव ॥ ३१ ॥
इकाराग्निं समाहूय ब्रह्मावचनमब्रवीत् । भवतोऽग्नेरियंवृत्तिरन्नंभुक्तंदहेरिति ॥३२॥
उकाराग्निं समाहूय ब्रह्मावचनमब्रवीत् । यत्पृथिव्यां मरुस्थानं भगवंस्तत्त्वमाश्रय
अहं तव विधास्यामि स्थानमाहारमेवच । इत्युक्तःसतुतेनाग्निर्यःपृथिव्यांशिलाचयः
यतोऽग्निर्व्यासतेनोक्तो गिरौदुर्गेमहामुने । उकाराग्निःसचाप्येष समुद्रेवडवामुखः
सोऽपि भिन्नः समाहूतो ब्रह्मणा स्थानलिप्सया ।
त्वञ्चक्षुः सर्वलोकस्य ब्रह्मा वचनमब्रवीत् ॥ ३६ ॥
तस्मात्त्वं संस्कृतां वाणीं द्विजातीनां प्रकाशय ।
दैवीपुण्यासंस्कृताचआयुष्यंहन्त्यसंस्कृता ॥ ३७ ॥
तस्माद्द्विजातेर्विज्ञेया वाणी पुण्याप्रकाशिता ।

वाक्चमाताद्विजातीनां मुखे सा सम्प्रतिष्ठिता ॥ ३८ ॥
अनृताक्षरविन्यासादमङ्गल्याह्यसंस्कृता । वकारंहन्त्यतोह्यग्निःसदासंस्कृतवाग्द्विजः
आहूयभूयोऽकाराग्निं प्रजापतिरचक्षुषम् । तां देववाणीमवदत्सोऽपिसंमीलितेक्षणः
ब्रह्माणमाहवह्निस्तु वाचोऽहमुखमास्महे । स्थानंममप्रयच्छस्व सर्वतेजोवरंपरम् ॥
ब्रह्मातमाहयस्मात्त्वंतेजःस्थानंसमीहसे । तस्मात्तेजोमयंयत्ते रविस्थानंभविष्यति
यस्मात्प्रपद्यतेतेजश्चक्षुर्भवतिदुर्बलम् । तस्मात्त्वांतेजसायुक्तं पश्येदनिमिषश्चकः ॥
इकारमथसंभिन्नमग्निमाहपितामहः । सौम्यदृष्ट्यातुब्रह्माणं समुद्वीक्ष्यह्युपागतः ॥
यस्माच्छीघ्रंमहासत्त्व! सौम्यदृष्टिरिहागतः ।
तस्माद्दास्याम्यहं स्थानं सर्वभूतमनोरमम् ॥ ४५ ॥
त्वं सितात्मा श्वेतरश्मिश्चन्द्रमास्त्वं भविष्यसि ।
सर्वतेजोऽधिको दिव्यः सौम्यः परमभासुरः ॥ ४६ ॥
तत्रस्थः सर्वतेजांसि तेजसाऽभिभविष्यति ।
इत्युत्क्वा तं विसर्ज्याऽथ उकाराग्निमथाऽऽह्वयत् ॥ ४७ ॥
एह्येहीतिशिरसि समादायन्यवेशयत् । तत्रस्थः पञ्चमंवक्त्रमूर्ध्वमेतदजायत ॥
एषएवंरूपवह्निरुकाराग्निः प्रतिष्ठितः । तस्मादग्निश्चसूर्यश्च रुद्रावेतौविनिर्दिशेत् ॥
भवाग्निरूपः परमो ब्रह्माणमिदमब्रवीत् । ममाऽपिरुचिरंस्थानं प्रयच्छस्वयथातथम्
ब्रह्मातमाहकतमत् स्थानंतेरोचतेतत्ले । अग्निस्तुप्रत्युवाचेदंस्थानंकथयमेपरम् ॥
स्थानं नैवाऽस्ति नो भव्यं ततो ह्येवं भविष्यति ।
अत्र त्वास्थातुमिच्छामि यदि संरोचते तव ॥ ५२ ॥

ब्रह्मोवाच

लोकेनित्यसमाचार लोकसंस्थितिहेतुक !। सम्भवार्थमिहासत्वंनिजसत्त्वपराक्रमः
यदिहत्वंमहाज्वालस्ताभिःकलितशोभनः ।प्राप्स्यसेसर्वजन्तूनांभासुरन्त्वंसमुत्तमम्
तर्ह्येषधर्मश्चैवाद्यो मायामोहितकाम्यया । इत्युक्तोब्रह्मणासोऽपि प्रजज्वालसहस्रशः
ततोह्यनन्तज्वालाभिर्नानावर्णादिभिःश्रितः ।अकारेकारोकारैश्चब्रह्मातमथशान्तवान्

नैवासौशान्ततांयातिवह्निर्भूयोऽप्यवर्द्धत । व्याप्तंभवाग्निनासर्वंतिर्यगूर्ध्वमधस्तथा
ज्वालाभिरुपरिक्षिप्तं दृष्ट्वात्मानंसमन्ततः । चिन्तयित्वाततोब्रह्मा भीतश्चैवविशेषतः
शिरस्यञ्जलिमाधाय तुष्टावाऽथ प्रणम्य तम् ।
तेजोनिधिञ्च सर्वेशं ज्ञातुमिच्छन्प्रजापतिः ।
निगमोक्तरहस्यैश्च ऋग्यजुःसामभाषितैः ॥ ५६ ॥

ब्रह्मोवाच

सत्यतेजोनमस्तेऽस्तु परस्परमहात्मने । अद्भुतानां प्रतिश्रोत्रे तेजसांनिधिरव्ययः ॥
बीजंयोविश्वभावानां संमोहनविमोहनम् । अन्धकारोयुगावर्तं कालेकालेचदुःसहम्
ऊर्ध्ववक्त्रनमस्तेऽस्तु सत्त्वात्मकधरात्मक !। ज्वलज्वालोत्पन्नजलजलजेशजलेश्वर
जलजोत्फुल्लपत्राक्ष ज्वलदेवहुताशन । कृष्णकान्तः कृष्णमार्गः स्वर्गमार्गप्रदायकः
यज्ञाहुतिसमाचार यज्ञरूपनमोनमः । स्वर्णगर्भशमीगर्भजयदेवसनातन !॥ ६४ ॥
नमोहारमहाहार स्वाहाप्रियतमोहर । प्रदीप्तरोचिषेदेव चित्रभानोनमोऽस्तुते ॥
वैश्वानरानलविभो ऊर्ध्वपावकसर्वग !। विभावसोमहाभाग कृष्णवर्त्म! नमो नमः ॥

सनत्कुमार उवाच

एवंस्तुतस्तदासोऽग्निर्विरञ्चिमब्रवीद्वचः । तुष्टोऽहंभवताब्रह्मन्भवत्कर्मप्रसिद्ध्यतु॥
एवमुक्तस्तदाब्रह्मा नमस्कृत्वापुनःपुनः । ज्ञातुमिच्छाम्यहंदेव कोऽसित्वंभगवानिति
अब्रवीत्सोऽथब्रह्माणं पुरुषस्त्वंप्रजापतिः । यज्ज्ञेयंपरमं रूपं तेन योगेन पश्य मे ॥
अथापश्यत्सदिव्येन भगवन्तं सनातनम् । सर्वज्ञंविधिकर्तारमीश्वरंसदसत्परम् ॥
ज्वलनंगगनम्भूमिंदृश्यादृश्यम्परम्पदम् । भूतम्भव्यं भविष्यञ्चजगत्स्थावरजङ्गमम्
सदेवः कुरुतेविश्वं भुङ्क्तेसर्वंयतः प्रभुः । ततःसम्भूतिभव्येनस्तोत्रेणापिप्रजापतिः
तुष्टाव देवः प्रणतः पुराणमजमव्ययम् ।
ततो निरुक्तवर्णञ्च दृष्ट्वा देवः प्रजापतिः ॥ ७२ ॥
विश्वतोबाहुचरणंविश्वतोग्निशिरोमुखम् । व्यक्ताव्यक्तप्रणेतारंप्रणम्यशिरसास्वयम्
तुष्टावचनमस्तेऽस्तु तुभ्यंविश्वभवात्मने । पृथिवीवायुराकाशं यच्चान्यद्भुवनत्रयम्

लोकालोकेश्वरंचैव जगत्स्थावरजङ्गमम् । तत्त्वसर्गंभूतसर्गंभावसर्गंतथैवच ॥ ७६ ॥
ब्रह्मतेजो मयाऽऽत्मानं सम्पश्यंश्चक्षुषा स्वतः ।
यत्किञ्चिद्वस्तुजातं हि तत्सर्वमचरं चरम् ॥ ७७ ॥
एवंस्तुतः स तु तदा अनादिर्भगवान्प्रभुः । अथेशः प्राहब्रह्माणं त्वयादृष्टंयथातथम् ॥
सृजेदानीं प्रजाः सर्वाः स च त्वं विनयान्वितः ।
कर्ताहमनुकर्तात्वं लोकानांस्थितिकारणे ॥ ७६ ॥
कुरुष्व तत्तथाभाव्यं मयापूर्वंविनिर्मितम् । इत्युक्तोदेवदेवेशो ब्रह्मावचनमब्रवीत ॥
नमस्तुभ्यंमहादेव भवशर्वनमोऽस्तुते । त्वत्प्रसादात्प्रजासर्गं कुर्वतोमेमहेश्वर !॥८१
सखायं प्राप्तुमिच्छामि त्वया दत्तं जगत्पते !।

महेश्वर उवाच

तुष्टस्ते ध्यायतः पुत्रकामस्य भगवन्नहम् ॥ ८२ ॥
विधातःकल्पितां देव! ममोत्पत्तिं यदीच्छसि ।
पुत्रत्वं प्राप्य हीशस्ते छेत्स्यामि पञ्चमं शिरः ॥ ८३ ॥
तत्र चोत्पादयिष्यामि नरनारायणावुभौ ।

ब्रह्मोवाच

कथं नारायणो देवस्तपसाऽनन्यचेतनः ॥ ८४ ॥
कीर्तयस्वसखा धन्यःसमेपूज्योभविष्यति । अथापश्यत्ततोब्रह्मातेजसाहरिमच्युतम्
तंसर्वगामिनंगम्यं शिवनारायणात्मकम् । महेश्वरस्यतेजोहि सत्त्वंनारायणःप्रभुः
चकार स ततस्तत्र श्रीयुक्तः शक्तिसम्मितः ।
अङ्गुल्या संस्पृशन् देवो ब्रह्माणमब्रवीद्वचः ॥ ८७ ॥
ब्रह्मा तेपरमंनाम ऋषिर्नारायणानुगः । भवितालोकवीक्षार्थंश्रेष्ठः सर्वधनुष्मताम् ॥
नारायणमहावीर्य! शक्तिरेषामदीयका । इत्युक्त्वाभगवान्देवस्तमग्निपाणिनाग्रहीत्
दक्षहस्ताङ्गुलिनखमध्यस्थंसमधीकरत् । इति संस्कृत्य सततं नरञ्चैव महेश्वरम्
ब्रह्मणोदर्शयित्वाऽथ तत्रैवान्तरधीयत । अथाऽब्रवीत्ततोब्रह्मा अग्नितश्चयुगक्षये ॥

स्पृशन् दक्षिणवामाभ्यां शान्तयन्निव तं गिरा।
पुत्रौ च भृग्वङ्गिरसौ भवितारौ न संशयः ॥ ६२ ॥
वंशविख्यातकर्माणावत्रैवभवतांतव । द्विधासम्भज्यतेनाग्निसृष्टेर्यज्ञोभविष्यति
भवन्तौ तिष्ठतस्तत्र पृथिव्यां दानमाश्रितौ ।
तस्मादेवं विधातव्यौ निर्मथ्य विधिपूर्वकम् ।
अतोऽश्वत्थे शमीगर्भे संयोगस्तत्र पठ्यते ॥ ६५ ॥
भार्गवोऽङ्गिरसश्चैव द्विविधो देवउच्यते ।
तस्मात्सुरहितः श्रेष्ठश्चतुर्थ इति कथ्यते ॥ ६६
एवंव्याससमुत्पन्नोनरोऽसौपूर्वजन्मनि । एवंतुब्रह्मणोवक्त्रं पञ्चमं समपद्यत ॥ ६७॥
एवं विबुद्ध्यते यो वै तेजः सर्गमनुत्तमम् ।
ब्रह्मणो याति सालोक्यं शान्तो दान्तो जितेन्द्रियः ॥ ६८ ॥
एतद्योऽग्निसमुद्भवं पशुपतेर्माहात्म्यसंसूचकं,
चित्ते साधुमतिः शृणोति सततं यःश्रद्धया भावितः ।
यो व्यासद्विजदेवताप्रमुखतः संश्रावयेद्भक्तितः,
सोऽत्यर्थं भवभावितः शिवपुरे सम्पूज्यते दैवतैः ॥ ६९ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
ऽग्नेरुत्पत्तिर्नामचतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः

देवागमनवर्णनम्

व्यास उवाच

युद्धेनिवारितेतत्र रक्तस्वेदजयोःपुरा । किंकृतंब्रह्मणातत्र प्रायश्चित्तंह्यकर्मणा ॥ १ ॥
जनार्दनेनकिंकर्म शङ्करेणचयन्मुने ! । एतत्सर्वंसमाख्याहि प्रसीदवदताम्वर ! ॥ २ ॥

सनत्कुमार उवाच

ब्रह्माऽकरोदग्निहोत्रं वनौषधिफलच्छदैः । शस्तैः कुशसमिद्भिश्च यथोक्तंहरिणापुरा
बदर्याश्रममासाद्य नरनारायणावृषी । तेपतुस्तौतपश्चोग्रं हितार्थंसर्वदेहिनाम् ॥ ४ ॥
कपालपाणिर्देवेशः पर्यटन् वसुधामिमाम् ।
कुशस्थलीं समासाद्य प्रविष्टस्तद्वनोत्तमम् ॥ ५ ॥
नानाद्रुमलताकीर्णं नानापुष्पोपशोभितम् । नानापक्षिसमाकीर्णं नानामृगसमाकुलम्
द्रुमपुष्पभरामोदवासितं यत्सुवायुना । बुद्धिपूर्वमिवन्यस्तफलपुष्पैस्सुपूजितम् ॥
नानागन्धरसाढ्यैश्च पक्वापक्वफलोद्भवैः । फलैस्सुवर्णरूपाढ्यै रासमन्तान्मनोरमैः ॥
जीर्णपत्रतृणादीनिशुष्ककाष्ठफलानिच । बहिःक्षिपतिजातानिमारुतोऽनुग्रहादिव ॥
नानापुष्पसमूहानां गन्धमादायमारुतः । शीतलो वाति तं भूमिदेशंयत्रविवासयन् ॥
हरितस्निग्धनिच्छिद्रद्रुमाणांतत्रकोटरैः । वृक्षैरनेकसङ्ख्यैश्च भूषितंशिखरान्वितैः
अरोगिदर्शनीयैश्च सुवृत्तैःक्वचिदुन्नतैः । कुटुम्बमिव विप्राणां सिद्धिवैर्भाति सर्वतः
शोभनैर्वायुसङ्कीर्णैरङ्कुरैश्चावृताद्रुमाः । कुलीनैरिवनिच्छिद्रैः स्वगुणैः प्रावृतानराः
पवनोद्धूतशिखरैः स्पर्शयन्ति परस्परम् ।
आरात्पतन्ति चान्योन्यं पुष्पाः शाखावतंसकाः ॥ १४ ॥
नागवृक्षाःक्वचित्पुष्पैर्भ्रमरानीलकेशरैः ।
नयनैरिव शोभन्ते धवलैः कृष्णतारकैः ॥ १५ ॥

पुष्पसम्पन्नशिखरा कर्णिकारद्रुमाः क्वचित् । यथैवहिविवाहेच शोभतेसाधुदम्पती
सुपुष्पविभवाटोपैःसिन्धुवारस्यपङ्क्तयः । मूर्तिमन्त्यइवाभान्ति पूजितावनदेवताः
क्वचित्क्वचित्कुन्दलताः सुपुष्पाभरणोज्ज्वलाः ।
दिक्षु दिक्षु च शोभन्ते बालचन्द्राइवोदिताः ॥ १८ ॥
अतीवदुर्गमार्गेषु कान्ताराादुत्थिता लताः ।
पुष्पिताःपुष्पविटपैर्वीजयन्ति इवोत्थिताः ॥ १९ ॥
शालार्जुनाः क्वचिद्भान्ति वनोद्देशेषु पुष्पिताः ।
धौतकौशेयवासोभिः प्रावृताः पुरुषोत्तमाः ॥ २० ॥
अभियुक्ताः सुवल्लीभिः पुष्पितास्तु द्रुमास्तथा ।
उपगूढा विराजन्ते नारीभिरिव सुप्रियाः ॥ २१ ॥
चूताश्चतिलकाश्चैवमञ्जरीभिःकरैरिव । वायुनुन्नाभिरन्योन्यंढौकन्तीव हिसज्जनाः
परस्परपञ्चसंयुक्तैस्तिलकाशोकपल्लवैः । हस्तैर्हस्तान्स्पृशन्तीव सुहृदश्चित्तसङ्गताः
फलपुष्पनतावृक्षाः पेशल्येनैवसज्जनाः । अन्योन्यमर्पयन्तीव सुपुष्पाणि फलानिच
मारुताश्लिष्टनिर्मुक्तैः पादपाःशीतवारिभिः ।
आर्यान्समागताँल्लोके प्रीतिं दातुमिव स्थिताः ॥ २५ ॥
पुष्पाणामिवभारेण स्वशोभार्थं व्रजन्तिवै । समप्रभावमासाद्यपुरुषाःस्पर्द्धयेवहि ॥
पुष्पादिशोभामरणैःशिखरैःक्रमसंयुतैः । नृत्यन्तिपक्षिणोमत्तायुक्ताशोभनशेखरैः
भृङ्गाःपवनविक्षिप्ता मृतवल्ली लताश्रिताः । सवल्लीकाःप्रनृत्यन्ति मानवाइवसप्रियाः
पुष्टाभिः कुन्दवल्लीभिः पादपाः क्वचिदावृताः ।
भान्ति तारागणैश्चित्रैः शरदीव नभस्तलम् ॥ २९ ॥
द्रुमाणामप्यथाग्रेषु पुष्पिताः माधवीलताः । शिखराइवशोभन्ते रचितावुद्धिपूर्वकम्
हरिताः काञ्चनच्छायाः फलिताःपुष्पितािद्रुमाः ।
सौहार्दं दर्शयन्तीव नराः साधुसमागमे ॥ ३१ ॥
पुष्पकिञ्जल्कबहुलाः किञ्जल्कबहुलोदराः । किञ्जल्कमत्तभ्रमरा विशदाइवसारिका

शिरीषपुष्पसङ्काशाः शुकाः मिथुनतःक्वचित् ।
कीर्तयन्ति गिरश्चित्राः पूजिताः ब्राह्मणा यथा ॥ ३३ ॥
संयुक्ताःसहचारिण्यामयूराश्चित्रबर्हिणः । वनान्तरेसञ्चरन्ति लोकान्तइवसंस्थिताः
कूजन्ति पत्रिसङ्घाता नानाद्भुतविराविणः ।
कुर्वन्ति रमणीयं हि रमणीयं वनं शुभम् ॥ ३५ ॥
नानामृगसमाकीर्णं नित्यंसमुदिताण्डजम् । तद्वनं नन्दनसमं मनोदृष्टिविवर्द्धनम् ॥
कपालपाणिर्भगवांस्तथारूपंवनोत्तमम् । ददर्शशङ्करोदृष्ट्या सौम्ययानन्दनोपमम्
तावृक्षपङ्क्तयस्सर्वा दृष्ट्वारुद्रंसमागतम् । निवेद्यशम्भवेभक्त्यामुमुचुःपुष्पसम्पदाम्
पुष्पप्रतिग्रहंकृत्वा पादपानां महेश्वरः । वरंवृणीध्वंभद्रंवः पादपानित्युवाचसः ॥
एवमुक्तेभगवता तरवोनिरवग्रहाः । ऊचुः प्राञ्जलयसर्वे नमस्कृत्वा महेश्वरम् ॥४०॥
वरंददासिदेवेश प्रपन्नजनवत्सल !। इहैवविपिनेनित्यं भगवन्सन्निहितोभव ॥४१ ॥
एष नः परमः कामोदेवदेवनमोऽस्तुते । त्वं चेद्वससिदेवेशवनेऽस्मिन् विश्वभावन ॥
सर्वात्मनाप्रसन्नास्त्वां याचामोह्युत्तमंवरम् । इत्युक्तःपादपैस्सर्वैश्शरणागतवत्सलः
वरं दादौपादपेभ्यः प्रोच्यमानं मया शृणु ।

महेश्वर उवाच

बाढम्मे मनसा वासो नित्यमत्र वनोत्तमे ॥ ४४ ॥
वरन्ददामिभूयोवो न वृथादर्शनम्मम । नाग्निर्नवायुर्नजलं नसूर्यकिरणातपः ॥ ४५ ॥
नविद्युदशनिश्शीतं रुजंवोजनयिष्यति । कामगाः कामरूपाश्च कामरूपफलप्रदाः ॥
कामसन्दर्शनाः पुंसां तपःसन्ध्याज्वलद्दृशाम् ।
श्रिया परमया युक्ता मत्प्रसादाद्भविष्यथ ॥ ४७ ॥
एवं सवरदः शम्भुरनुजग्राहपादपान् । स्थित्वावर्षसहस्रन्तु कपालं चाक्षिपद्भुवि ॥
क्षितिंनिपततातेन चकम्पेचरसातलम् । विवशास्तत्यजुर्वेलां सागराः क्षुभितोर्मयः
शक्राशनिहतानीव व्याघ्रव्यालान्वितानिच । शिखराणिव्यशीर्यन्तपर्वतानांसहस्रशः
देवसिद्धविमानानि गन्धर्वनगराणि च । प्रस्फुरन्तिविनिष्पेतुर्विनेशुश्चधरातले ॥

कल्पान्तमेघाश्चात्यन्तं जगत् सञ्जातदर्शनाः ।
ज्योतिर्ग्रहाञ्छादयन्तो बभूवुस्तीर्णभास्कराः ॥ ५२ ॥

महतातस्यशब्देन जडान्धबधिरं कृतम् । बभूवव्याकुलं सर्वं त्रैलोक्यं सचराचरम् सुरासुराणांसर्वेषां शरीराणिमनांसिच । अवसेदुश्चकम्पुश्च किमेतदितिवव्रिरे ॥ धैर्यमालम्ब्यसर्वेऽपि समागम्येन्द्रपूर्वकाः । ब्रह्मलोकंसमासाद्यब्रह्माणमिदमूचिरे ॥ किमेतद्भगवन्ब्रूहि निमित्तोत्पातदर्शनम् । त्रैलोक्यंकम्पितंयेन संयुक्तंकालकर्मणा जातंकल्पावसानञ्च भिन्नमर्यादसागरम् । चत्वारोदिग्गजाःकिन्तुबभूवुरचलाश्चलाः धरासमावृताकस्मात्सप्तसागरवारिणा । उत्पत्तिर्नास्तिसर्वस्यभगवन्निष्प्रयोजनम् यादृशोऽयंश्रुतः शब्दो न भूतोनापिविश्रुतः । त्रैलोक्यमाकुलंयेन कृतंरौद्रेणभूयसा ॥

एवमुक्तोऽब्रवीद्ब्रह्मा परमेशानुभावितः ॥ ६० ॥

मत्पृष्टममराः सर्वे शृणुध्वं तत्र कारणम् । निश्चयेनाऽत्रविज्ञेयं श्रद्दधानैर्यथाविधि

सुखं छित्त्वा नखाग्रेण मद्देहात्पञ्चमं शिरः ।
कपालपाणिर्भगवान् विष्णोराश्रममभ्यगात् ॥ ६२ ॥

ययाचेपात्रमादाय भिक्षांनारायणम्प्रति । उत्पपातमुनिस्तत्र नरोनामधनुर्धरः ॥ ततः कुशस्थलीमेत्य भगवांस्तद्वनोत्तमम् । विवेशतरुमार्गेणपुष्पामोदाभिनन्दितम् अनुग्राह्याथभगवान् वनंतत्सर्वगाण्डजम् । जगतोऽनुग्रहार्थाय तत्रवासमरोचयत् ॥ तत्कपालंकरस्थंयन्न्यस्तंभगवताक्षितौ । तेनैषाकम्पिताभूमिःकृतंत्रैलोक्यमाकुलम् तद्रक्षार्थंविरूपाक्षं प्रापयतमयासह । आराध्यमानोभगवान् प्रदास्यतिवरंहिवः ॥ इत्युक्त्वाभगवान्ब्रह्मा सहतैर्देवदानवैः । जगामतद्वनोद्देशं यत्रास्तेवृषभध्वजः ॥

प्रहृष्टमनसस्सर्वे कोकिलालापलापितम् ।
पुष्पान्वितं वनं तद्वै विविशुश्शङ्करेप्सवः ॥ ६६ ॥

सम्प्राप्त सर्वदेवैस्तद्वनंनन्दनसम्मितम् । सुवल्लीगृहशोभाढ्य सुद्रुढंशुशुभेतदा ॥ ७०

दृष्ट्वा तद्वनमुत्तमं तनुभृतां प्रोल्लासकं चेतसां,
नानासत्फलपुष्पपादपवनैरासेवितंसर्वतः ।

ब्रह्मन्बर्हिणहंससारसरवैर्मण्डूकमत्स्यान्वितं,
द्रक्ष्यामो हरमत्र चेतसि सुराः प्रापुर्मुदं ते तदा ॥ ७१ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्ताखण्डे देवागमोनामपञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः

कपालमोक्षणवर्णनम्

सनत्कुमार उवाच

प्रविश्याथवनंदेवाः सर्वपुष्पोपशोभितम् । इहदेवोऽत्रदेवोऽत्र विविशुस्तेदिदृक्षवः अद्भुतस्यवनस्यान्तं ननेदद्दृशिरेसुराः । विचिन्वन्तोमहादेवं देवैर्बहुविलोकितम् तानुवाचसुभद्रंवो नद्रक्ष्यथतपोविना । विचिन्वन्तोविरूपाक्षं नैवापश्यतशङ्करम् ॥ सुयुक्तहृदयेस्मृत्वा ब्रह्मादेवांस्ततोब्रवीत् । त्रिविधोदर्शनोपायस्तस्यदेवस्यसर्वदा श्रद्धाज्ञानेनतपसा योगेनैवनिगद्यते । सकलंनिष्कलंवापि देवंपश्यन्तियोगिनः ॥ तपस्विनस्तुसकलं ज्ञानिनोनिष्कलंपरम् । समुत्पन्नेऽपिविज्ञानेमन्दश्रद्धोनपश्यति भक्त्यापरमयोपेतः परंपश्यन्तियोगिनः । द्रष्टव्योनिर्विकारोऽसौ प्रधानपुरुषेश्वरः नार्दीक्षितैरतोदेवाः शैवदीक्षांप्रपद्यथ । कर्मणामनसावाचा नित्ययुक्तामहेश्वरे ॥ तपश्चरथभद्रंवो रुद्राराधनतत्पराः । शिवदीक्षांप्रपन्नानां भक्तानांचतपस्विनाम् ॥ सर्वकालंविशेषेण दातव्यंदर्शनम्मया । ब्रह्मणोवचनं श्रुत्वाहितमेवतदाचते ॥ १० ॥ शिवेक्षाविष्टमतयो ब्रह्माणमिदमब्रुवन् । मार्गेणविधिनाचैव शिवदीक्षांसुरोत्तम प्रयच्छब्रह्मन्सर्वेषां तत्र नः कारणंभवान् । श्रुत्वाथवचनंब्रह्मा प्रत्युवाचविचारितम् सन्दिदीक्षयिषुः क्षिप्रममराञ्छिवदीक्षया । शिवयज्ञार्थसम्भारानानयध्वमलंसुराः वेदीप्रकल्प्यतामत्र यष्टव्योऽष्टतनुश्शिवः । पद्मयोनिवचः श्रुत्वाचक्रुस्सर्वमतस्सुराः

विनीतवेशाः प्रणता अनेनोक्तंसमन्वगुः । शिवप्रसादसम्प्राप्त्यै पुष्कलज्ञानमीरितम्
यज्ञं चकारविधिना दीक्षांचन्द्रार्धधारिणः । पद्मयोर्निपुरस्कृत्य तदादीक्षाप्रयोगतः
अनुजग्राह देवांस्तान् परेच्छाप्रेरितः क्वचित् ।
ततो व्रतानां प्रवरं व्रतं दिव्यं महाप्रभुः ॥ १७ ॥
तेभ्योददौदेवताभ्यो सतदप्यविरोधवित् । पठ्यतेशिवशाखायां महापाशुपतंव्रतम्
शैवंथोदितंयच्च आगमाचारचेष्टितम् । शिवाराधनमुख्यानां मुनीनांतीव्रतेजसाम्
सदानुग्राहकः शम्भुः सर्वदेवैः प्रकल्पितम् ।
तदेवं प्रार्थितं बुद्ध्या व्रतं रौद्रशिवंसमम् ॥ २० ॥
नतेभ्यो विस्मयं त्यक्त्वा प्रायच्छत्कनकाण्डजः ।
कामिकं भस्मनामानं सर्वदा कीर्तितं शुभम् ॥ २१ ॥
पापघ्नं दुःखशमनं पुष्टिमाबलवर्द्धनम् । सिद्धिदंकीर्तिकृत्कान्तंकलिकल्मषमोक्षकम्
तस्मात्सर्वप्रयत्नेन भस्मस्नानं समाहिताः ।
कुर्वन्तो मानवादान्ताः शान्ताश्च सुजितेन्द्रियाः ॥ २३ ॥
सर्वेकमण्डलुधरास्सर्वेरुद्राक्षधारिणः । अनिष्टदर्शनालापसङ्गत्यागविवर्जिताः ॥
एवंव्रतधरास्सर्वे वनेतस्मिन्महेश्वरम् । आराधयंस्तमीशानं व्रतेनैवउमाधवम् ॥
भक्त्यापरमयायुक्ता विधिनापरमेणच । कालेनमहताध्यानाद्देवं ज्ञात्वामनोगतम्
रुद्रध्यानाग्निनिर्दग्धकल्मषाश्च श्रियान्विताः ।
तदा गत्वा सुराञ्छम्भुः प्रत्यक्षो भगवानभूत् ॥ २७ ॥

सनत्कुमार उवाच

ब्रह्मदत्तवरादेवास्सर्वे शर्वानुभाविताः । समचीकरंस्तपस्तत्र ब्रह्माऽपीशानभाविताः
गतेवर्षसहस्रेसदिव्येदेवेश्वरेश्वरः । जातानुकम्पोदेवानांदीप्तोदर्शनमेयिवान् ॥ २६ ॥
गणैर्नानाविधैस्सार्द्धं नानाभूषणभूषितैः ।
स्वबलेनचदर्पघ्नैर्घोरैर्घोरविघातिभिः ॥ ३० ॥
कामरूपैरकामैश्चसर्वकामसमन्वितैः ।

करीन्द्रकरटाटोपपाटने सिंहदेहिभिः ॥ ३१ ॥
अणिमादिगुणैर्दिव्यैर्योगैश्वर्यादिनामभिः । व्यालोलकेशरसनादंष्ट्राकटकटोग्रकैः ॥
व्याघ्रव्यालाननैरौद्रैः काककङ्कमुखैस्तथा । अरूपैः समरूपैश्चसुरूपैर्बहुरूपकैः ॥
एकद्वित्रिशिरोभिश्च बहुशीर्षैरशीर्षकैः । एकद्वित्रिशिखैश्चैव नानारूपविराजितैः ॥
बहुनेत्रैरनेत्रैश्च एकद्वित्रिविलोचनैः । एककर्णैर्द्विकर्णैश्च बहुकर्णैरकर्णकैः ॥ ३५ ॥
एकद्वित्रिसुनासैश्च बहुनासैरनासकैः । एकजङ्घैर्द्विजङ्घैश्च बहुजङ्घैरजङ्घकैः ॥ ३६ ॥
एकपादद्विपादैश्च बहुपादैरपादकैः । गौरश्यामैः श्यामगौरैः सितैःकर्बुरकैस्तथा ॥
भुजङ्गहारवलयैर्नागयज्ञोपवीतकैः । शूलासिपट्टिशधरैर्भुशुण्डिपरिघायुधैः ॥ ३८ ॥
चक्रक्रकचकोदण्डकालदण्डास्त्रपाणिभिः ।
गदामुद्गरपाषाणमुसलायुधहस्तकैः ॥ ३६ ॥
वज्रशक्त्यशनिप्रासकुन्तशस्त्रविधारिभिः । भम्भाभेरीर्वादयद्भिर्वीणापणवगोमुखान्
मृदङ्गमर्दलान्ढक्कामड्डुडिण्डिमझर्झरान् ।
हुड्डुकान्पणवाद्यांश्च वाद्यान्वादद्भिरर्चकैः ॥ ४१ ॥
एवं नानाविधैरौद्रैर्भीमैर्भीमपराक्रमैः । गणेश्वरैः सुदुर्द्धर्षैर्वृतः सूर्यो ग्रहैरिव ॥४२॥
आविर्बभूव भगवान् स्वगणैःपरिवारितः ।
सम्पश्यतां तदा व्यास! ब्रह्मादीनां दिवौकसाम् ॥ ४३ ॥
अथब्रह्मादयोदेवा दृष्ट्वाग्रेगणनायकम् । तेजसाध्यासितास्तस्य बभूवुर्भ्रान्ततेजसः ॥
ततोऽवलम्ब्यतेधैर्यं दृष्ट्वादेवंयथाविधि । षडङ्गवेदयोगेन हृष्टचित्तवपुर्धराः ॥ ४५ ॥
शिरोगतैरञ्जलिभिः पादेभ्यश्चमहींगतैः । तुष्टुवुः सृष्टिसंहारस्थितिकर्तारमीश्वरम्

देवा ऊचुः

नमःशिवायशान्ताय सगणायसनन्दिने । वृषासनायसौम्याय शक्तिशूलधरायच ॥
नमोदिक्चर्मवस्त्राय सुचेतस्तीव्रतेजसे । ब्रह्मणेब्रह्मदेहायब्रह्मणायोजिताय च ॥ ४८
नमोऽन्धकविनाशाय सुरेशाय नमोनमः । रुद्रायपञ्चवक्त्राय सर्वरोगापहारिणे ॥४६
गिरिशायसुरेशाय ईशानायनमोनमः । भीमायोग्रस्वरूपाय विजयाय नमोनमः ॥

सुरासुराधिपतये यतीनांपतयेनमः । शुण्डाय चण्डदण्डाय वरखट्वाङ्गधारिणे ॥
विरूपाक्षशुभाख्याय विश्वरूपायवैनमः । शान्तायघनमोज्ञाय त्रिनेत्राय नमोनमः ॥
वेधसे विश्वरूपाय विश्वसंहारिणेनमः । भक्तानुकम्पिनेऽत्यर्थं रुद्रज्ञानपरायच ॥५३
विरूपायसुरूपाय रूपानांशतधारिणे । पञ्चास्याय शुभास्याय चन्द्रास्यायनमोनमः
वरदायवरार्हाय सुकर्माय नमोनमः । त्रिनेत्रत्राणमस्माकं त्रिपुरघ्न ! विधीयताम्

वाङ्मनःकायभावैस्त्वां प्रपन्नानां महेश्वर !।

सनत्कुमार उवाच

एवं स्तुतस्तदा देवैर्विरञ्च्याद्यैस्तथा हरः ॥ ५६ ॥
शरीराणि विलोक्येशः कृशान्यथ दिवौकसाम् ।
दिव्यप्रतापधारेण विविधेनान्तरात्मनाम् ॥ ५७ ॥
आराधनं समीक्ष्याऽऽह ब्रह्मादीनां सुरेश्वरः ।
साधु साधु महाभागाः ! शश्वद्व्रतमुपासितम् ॥ ५८ ॥

देवेनानेन विधिना भृशमाराधितोह्यहम् । भवद्भिः श्रद्धयात्यर्थं मम दर्शनकाङ्क्षया

व्रतस्था मां हि पश्यन्ति मानुषादेवताअपि ।
यद्यहञ्च प्रयच्छामि कांश्चिद्वो हि वराञ्छुभान् ॥ ६० ॥
एकैकशोद्वित्रिशो वा समस्तेभ्यस्समेन तत् ।
सर्वकामप्रसिद्ध्यर्थं दास्यामि ह्येष देवताः ॥ ६१ ॥
हिताय भवतां देवा आगत्योज्जयिनीम्प्रति ।
क्षिप्तं कपालञ्च मया किम्पुनर्भद्रमस्तु वः ॥ ६२ ॥

देवा ऊचुः

किंकृतंहितमस्माकंकपालंक्षिपतात्वया । किमर्थंकम्पिताभूमिर्लोकंवैव्याकुलीकृतम्

नैतंन्निरर्थकन्देव! कथ्यतामत्र कारणम् ।

ईश्वर उवाच

युष्मद्धितार्थमेतद्वै भयं विनिहितं कृतम् ॥ ६४ ॥

देवानामनुरक्षार्थं श्रूयतामत्र कारणम् । असुरेन्द्रोहयोनाम बलवान्योगमायिकः ॥
अवस्थितोऽन्ववष्टभ्यरसातलतलाश्रयम् । तस्यदैत्यस्यबलिनो दैत्याः परपुरञ्जयाः

युष्मान्ज्ञात्वा तपःस्थान्वै आययुर्बहवो हि ते ।
सेन्द्रान्निहन्तुमिच्छन्तो मायाप्रच्छन्नविग्रहाः ॥ ६७ ॥
पुरीं कनकशृङ्गाख्यामेकामधिकुशस्थलीम् ।
समुद्ययुस्सुरान्हन्तुमुद्यता उद्यतायुधाः ॥ ६८ ॥

शब्देनचातिघोरेण भूमिनिष्कम्पनेनच । तेषांकपालपातेन देहात्प्राणाविनिर्ययुः ॥

लोकस्थितिविनाशार्थं तेषामासीत्समुद्यमः ।
राज्यैश्वर्येणदर्पिष्ठास्तेन ते निहता मया ॥ ७० ॥

देवा ऊचुः

विश्वस्तानांत्वयाचैव नोवाचानुग्रहःकृतः । देवाऽनुग्रहकर्त्तात्वं गुणस्मृतिनिषेवितः
दिव्यदृष्टिभिरत्यर्थं यशोऽर्थंभीमपूजितः । इत्युक्त्वाप्रणतान्देवानुत्थायोचेपुनर्भवः

शिव उवाच

परिचर्याभिसंयुक्तं नित्यमुग्रनिषेविणम् । ध्यानसाधननिष्पन्नं यदन्येषांनविद्यते
मनोवाक्कायभावेन दुष्करंदुश्चरन्तपः । अनेनतपसादेवा कष्टेनदुस्सहेन च ॥ ७४ ॥

समन्तादभिवर्धन्तां युष्मत्तेजस्तथाधिकम् ।

सनत्कुमार उवाच

इत्युक्ता देवदेवेन देवा ब्रह्मपुरोगमाः ॥ ७५ ॥

ऊचुरुन्नम्यवक्त्राणि स्थिताजानुभिरीश्वरम् । महतातपसातुष्टं बहुकालर्जितेन च

देवा ऊचुः

प्राणदस्त्वं कारणस्त्वं तपसादेवदृश्यसे । तदस्माकं प्रवृत्तानां तवध्यानेवरप्रदः ॥

रक्षां कुरुष्व देवेश! भक्तानामभयङ्कर !।

ईश्वर उवाच

यत्नेन विधिना दत्तं सुव्यक्तं दर्शनं हि वः ॥ ७८ ॥

व्रियताम्भोःसुरश्रेष्ठा दास्यामोवरान्बहून् । एवमुक्ते भगवता ब्रह्मावचनमब्रवीत् ॥
देवानामग्रतः स्थित्वा श्रुतशब्दोद्भवंभवम् । प्राप्तोऽयंचाद्यभगवन् सुपर्याप्तोमहावरः
दीयतान्नस्समैश्वर्यं तेषां स्थानमथाऽक्षयम् ।

शिव उवाच

लोकेऽस्मिन्समये भक्ता मया विनिहताश्च ये ॥ ८१ ॥
नैवतेदुर्गतियान्ति लभन्ते सुगतिपराम् । सार्द्धंतत्र जटाजूटैः शिरोभिश्शूलपाणयः
भान्तिमद्वामपार्श्वस्थाइमेतेद्रोहिणाङ्गणाः । एषांविनिग्रहार्थाययुष्मत्सम्बोधनायच
सविकारंमयाक्षिप्तंकपालंधरणीतले । कृतोमेऽनुग्रहस्तेषां भक्तानां भक्तिमिच्छताम्
वनेऽस्मिन्नित्यवासो मे वृक्षैरभ्यर्थितेनच । महाकालवनेदेवा आगतस्य ममाऽनघाः
तपस्यताश्च भवतां महाकालवनन्ततः । नामद्वययुतंगुह्यं लोके ख्यातं भविष्यति ॥
गुह्यंवनंश्मशानञ्चक्षेत्राणां प्रवरं महत् । कपालव्रतचर्या च मयाह्येषा प्रकीर्तिता ॥
कपालपात्रेभुञ्जानः कपालव्रतभूषणः । कपालपाणिसन्तुष्टो भिक्षाव्रतसमन्वितः
श्मशाननिलयो रौद्रो व्रतोन्मत्तविमूढधीः ।
नन्दितः सर्वभूतेषु प्रियाप्रियसमस्सदा ॥ ८९ ॥
भस्मभूषितसर्वाङ्गोज्ञानी चैवविशेषतः । जितेन्द्रियस्सर्वसङ्गीमृद्भस्मोदकसङ्ग्रही
नित्ययुक्तसदाजापी जपार्थितवरासनः । पुण्यतीर्थाश्रमोपेतः शनैर्देवे समाहितः ।
लोकातीतं परंज्ञानं महापाशुपतं व्रतम् । कपालव्रतमास्थाय पुराचीर्णं मयास्वयम्
कपालं परमं गुह्यं पवित्रं पापनाशनम् । कपालव्रतमेतद्धि दुर्द्धरं परमाद्भुतम् ॥
अत्यन्तमुत्कटं रौद्रमघोरंरोमहर्षणम् । महाव्रतंद्विषन्मोहात्पापेनैवस्थितो नरः ॥
न मुच्यते स पापेन जन्मकोटि शतैरपि ।
महापाशुपतं तस्मान्न हन्यान्न च दूषयेत् ॥ ९५ ॥
एकस्मिन्निहते यस्मात्कोटिर्भवति घातिता ।
एकं महाव्रतं यस्तु भोजयेच्छ्रद्धयान्वितः ॥ ९६ ॥
तेनभुक्ताभवेत्कोटिर्विप्राणां वेददर्शिनाम् । कपालपूर्णांभिक्षांयतीनांयःप्रयच्छति

विमुक्तस्सर्वपापेभ्यो नासौदुर्गतिमाप्नुयात् । कपालभोजनंश्रेष्ठंमार्गोऽयंब्रह्मसम्भवः
वन्दितंलोकवेदेषु पूजितं देवदानवैः । धारयिष्यन्तियेविप्राः कपालंभूतमोहनम् ॥
ममतुल्यास्तुतेब्रह्मन् विचरन्तिमहीतले । महाव्रतेरताधीराः कपालकृतभूषणाः ॥
महापाशुपतालोके रुद्रास्संसारतारकाः । धर्माधर्मविमुक्ताश्च कृत्याकृत्यविवर्जिताः
दीक्षयाऽनेन योगेन प्राणिनस्तारयन्ति ते ।
यानि तीर्थानि लोकेऽस्मिन् यज्ञकोटिशतानि च ॥ १०२ ॥
विशुद्धस्य हि ज्ञानस्य कलां नार्हन्ति षोडशीम् ।
यथाऽहं सर्वदेवानां सम्पूज्योऽस्मि पितामह !॥ १०३ ॥
तथैवसर्वयोगेभ्यः सम्पूज्योऽयंमहाव्रतः । संसारबन्धमोक्षार्थं शिवगुह्यमिदंव्रतम्
यदेतत्सर्वधर्मेण अपुनर्भवकारणम् । कपालव्रतमादाय यस्त्यजेदजितेन्द्रियः ॥ १०५
रौरवंसप्रयात्याशु प्रणीतोयमकिङ्करैः । आलापयति भावेन नतुकर्मकरोतियः ॥१०६
सरागचित्तश्शृङ्गारी नवधर्मप्रियङ्करः । एकत्रभोजीमिष्टाशी नाकैतववचः प्रियः ॥
कुग्रामेनगरेवासी कृषिवाणिज्यसेवकः । इत्यादिदुष्टदोषस्य तस्य सम्भाषणादपि॥
नरोनरकगामीस्याद्यतोमद्व्रतदूषकः । दृष्ट्वातुदुष्टमथवा महाव्रतधरो नरः ॥ १०९ ॥
न स्पृशेदङ्गमङ्गेन स्पृष्ट्वा स्नायात्तु चाम्बुभिः ।
एवं वस्सर्वमाख्यातं कपालस्य च मोक्षणम् ॥ ११० ॥
यथा मयात्र निक्षिप्तं चाऽसुरानिहताः स्वयम् ।

सनत्कुमार उवाच

एवमुक्त्वा सभगवान् ब्रह्माद्यैरमरैस्सह ॥ १११ ॥
क्षेत्रंनिर्वासयामास यथावत्कथयामि ते । आद्यमेतच्छ्मशानञ्च पठ्यतेमुनिसत्तमैः ॥
महाकालवनं व्यास! यत्रसन्निहितोहरः । अनुग्रहस्यभुवनं भूमिभागेनशम्भुना ॥
अनुग्रहार्थं भूतानां क्षेत्रंतन्मृत्युधर्मिणाम् । सुवर्णवज्ररचिता वेदिकाचमहीकृता ॥
विचित्रकुसुमारत्नैः कारितासर्वशोधना । स्वर्णवज्राङ्किततरा श्रेष्ठाहरितशाद्वला ॥
त्रिंशच्चत्वारिसम्पूर्णाः कलशाः शोभनाः स्थिताः ।

द्वाराणि तत्र चत्वारि प्रवर्ग्याणि तपन्ति च ॥ ११६ ॥
कुम्भाः शोभन्तितत्रस्था उदिताभास्कराइव । रमतेतत्रभगवान् वनानामुत्तमेवने ॥
त्रेतायांधर्मनिरतास्तापसाब्रह्मचारिणः । सनन्दीदेवगणपः संयुतःकालदण्डिना ॥
एतत्कृतयुगेसर्वं प्रत्यक्षं दृश्यते वने । द्वापरेधर्मशीलाश्च श्रुतिविज्ञानशालिनः ॥११६
कलौतुशुद्धविज्ञानशालिनः शङ्करं हरम् । तपोऽधिकाः प्रपश्यन्तिदेवदेवं महेश्वरम् ॥
महाकालवनेनित्यं शूलपट्टिशधारिणम् । एतत्तेतथ्यमाख्यातं लोकानुग्रहकारकम् ॥
संहितानुक्रमेणाऽत्र मन्त्रैश्च विधिपूर्वकम ।
समर्चयन्ति ये विप्रा भक्त्या शम्भुमघापहम् ॥ १२२ ॥
वसन्तीह समीपन्ते महाकालानुभावतः ॥ १२३ ॥
पठतियइहलोके तस्य संस्थानमेतत् प्रथितगुणगणौघैरर्चितंदोषहन्तृ ।
शुभनतिरभिषिक्तः सोऽमरैरर्च्यमानो व्रजति हरपुरंवे यः शृणोत्येकचित्तः ॥
इति श्रीस्कान्दमहापुराण एकाशीतीसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
कपालमोक्षणंनामषष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः

महाकालवननिवासविधिवर्णनम्

भगवन्केनविधिना महाकालवनेऽमरैः । रुद्रलोकमभीप्सद्भिर्वस्तव्यं क्षेत्रवासिभिः ॥
किंमनुष्यैरुतस्त्रीभिः सिद्ध्यद्याश्रमान्वितैः । वसद्भिःकिमनुष्ठेयं तत्सर्वंप्रब्रवीहि नः
नरैःस्त्रीभिश्चवस्तव्यं वर्णैश्चाश्रमवासिभिः । स्वधर्माचारनिरतैर्दम्भमोहविवर्जितैः
किंकुर्वाणैर्नरैः कर्म रुद्रभक्तिं ब्रवीहि नः ।
सनत्कुमार उवाच
त्रिविधाकथिताह्यत्र मनोवाक्कायसम्भवा ॥ ४ ॥

लौकिकी वैदिकी चान्या भवेदाध्यात्मिकी तथा ।
ध्यानधारणया बुद्ध्या रुद्राणां स्मरणं हि यत् ॥ ५ ॥
रुद्रभक्तिकरीचैषा मानसीभक्तिरुच्यते । व्रतोपवासनियमैर्जितेन्द्रियनिरोधिनाम् ॥
रुद्रस्य कायिकीभक्तिर्ज्ञानध्यानस्थधर्मिणाम् ।
गोघृतक्षीरदधिभिर्गन्धरक्तकुशोदकैः ॥ ७ ॥
गन्धमाल्यैश्चविविधैर्धातुभिश्चोपपादिता । घृतगुग्गुलुधूपैश्च कृष्णागुरुसुगन्धिभिः
भूषणैर्हेमरत्नानां चित्राभिःस्रग्भिरेव च । वासःप्रतिसरस्तोत्रैः पताकाव्यजनादिभि
नृत्यवादित्रगीतैश्च सर्वप्रत्युपहारकैः । भक्ष्यभोज्यानुपानैश्च यापूजाचाक्षतैर्नरै ॥
महेश्वरं पुरस्कृत्य भक्तिः सालौकिकी मता ।
देवमन्त्रैर्हविर्योगैर्या क्रिया वैदिकी मता ॥ ११ ॥
दर्शेचपौर्णमास्यांवा कर्तव्यंचाग्निहोत्रकम् । प्राशनंदक्षिणादानं पुरोडाशश्चरुक्रिया
इष्टिवृत्तिः सोमपानं याज्ञिकंसर्वं कर्मच । ऋग्यजुस्सामजाप्यानिसंहिताध्ययनानिच
क्रियन्ते रुद्रमुद्दिश्य सा भक्तिर्वैदिकीस्मृता ।
अग्निभूम्यनिलाकाशनिशाकरदिवाकरान् ॥ १४ ॥
समुद्दिश्यकृतंकर्मतत्सर्वंदैवतंभवेत् । आध्यात्मिकीतुत्रिविधारुद्रभक्तिःस्थितामुने
साङ्ख्या च यौगिकी चान्या विभागन्तत्र मे शृणु ।
चतुर्विंशतितत्त्वानि प्रधानादीनिसङ्ख्यया ॥ १६ ॥
अचेतनानियोज्यानि पुरुषः पञ्चविंशकः । चेतनः पुरुषोभोक्ता न कार्यंतस्यकर्मणा
रुद्रः षड्विंशकः कर्तासर्वज्ञश्चेतनः प्रभुः । अजन्मनित्यमव्यक्तमधिष्ठाताप्रयोजकः ॥
पुरुषोऽव्यक्तनित्यः स्यात्कारणञ्चमहेश्वरः । तत्त्वसर्गोभवेत्पूर्वं भूतसर्गश्चतत्त्वतः ॥
संख्ययापरिसर्गाय प्रधानंत्रिगुणात्मकम् । साधर्म्यमात्म्यमैश्वर्यं प्रधानंवैविधर्मिच
कारणंतच्चरुद्रस्य काम्यत्वमिदमुच्यते । सर्वत्रकर्तृतारुद्रेपुरुषेचाप्यकर्तृता ॥ २१ ॥
अचैतन्यं प्रधाने च तच्च तत्त्वमिदं स्मृतम् ।
तत्वान्तरेण मुच्येते कार्यंकारणमेवच ॥ २२ ॥

प्रयोजके च वै जात्यं ज्ञात्वातत्वस्य सङ्ख्यया ।
संख्याऽस्तीत्युच्यतेप्राज्ञै रुद्रतत्वार्थचिन्तकैः ॥ २३ ॥
इति तस्यतत्स्वभावं तत्त्वसङ्ख्या च तत्त्वतः ।
रुद्रतत्त्वाधिकश्चापि ज्ञानतत्त्वं विदुर्बुधाः ॥ २४ ॥
साङ्ख्ये ततो भक्तिरेषा सद्भिराध्यात्मिकी मता ।
यौगिकीमपिमे भक्त्या शृणु भक्तिं महासुराः ॥ २५ ॥

प्राणायामपरोनित्यंध्यायेतनियतेन्द्रियः । धारणां हृदयेधृत्वा ध्यायते यो महेश्वरम्
हृत्कञ्जकर्णिकासीनं पञ्चवक्त्रंत्रिलोचनम् । शशाङ्कद्योतितजटं व्यालावृतकटीतटम्
श्वेतं दशभुजं भद्रं वरदाभयहस्तकम् । योगजामानसीव्यास रुद्रभक्तिःपरास्मृता ॥
यएवंभक्तिमान्रुद्रेरुद्रभक्तःसउच्यते । विधिन्तुशृणुमेव्यासयःस्मृतःक्षेत्रवासिनाम्
स्वयंरुद्रेणविहितो ब्रह्मादीनां समागमे । कथितो विस्तरात्पूर्वं पूर्वेषांतत्रसन्निधौ

निर्ममा निरहङ्कारा निस्सङ्गानिष्परिग्रहाः ।
बन्धुवर्गे च निःस्नेहाः समलोष्टाश्मकाञ्चनाः ॥ ३१ ॥

भूतानांकर्मभिर्नित्यं त्रिविधैरभयप्रदाः । साङ्ख्ययोगविधिज्ञाश्चधर्मज्ञाश्छिन्नसंशयाः
यजन्तेविविधैर्यज्ञैर्येविप्राः क्षेत्रवासिनः । महाकालवनेतेषां मृतानांयत्फलं शृणु ॥
व्रजन्त्येवसुदुष्प्रापं ब्रह्मसायुज्यमक्षयम् । सम्प्राप्यनपुनर्जन्म लभन्तेमोक्षमक्षयम् ॥
पुनरावर्तनं हित्वा विधिं माहेश्वरं स्थिताः । पुनरावृत्तिरन्येषां प्रपञ्चाश्रमवासिनाम्

गार्हस्थ्यविधिमासाद्य षट्कर्मनिरतास्सदा ।
वेदोक्तविधिनासम्यग्मन्त्रस्तोत्रनियन्त्रिताः ॥ ३६ ॥

अधिकंफलमाप्नोति सर्वदुःखविवर्जितः । सर्वलोकेषुचान्यत्र गतिस्तस्यनहन्यते
दिव्यैनैश्वर्ययोगेन सुरूढः सुपरिग्रहः । बहुसूर्यप्रकाशेन विमानेन सुवर्चसा ॥ ३८ ॥

वृतः स्त्रीणां सहस्रैश्च स्वच्छन्दगमनालयः ।
विचरत्यविचारेण सर्वलोकान्दिवौकसाम् ॥ ३९ ॥

स्पृहणीयतमः पुंसां सर्ववर्णोत्तमो धनी । स्वर्गाच्च्युतःप्रजायेतकुलेमहतिरूपवान्

धर्मज्ञोरुद्रभक्तश्च सर्वविद्यार्थपारगः । तथैव ब्रह्मचर्येण गुरुशुश्रूषणेन च ॥ ४१ ॥
वेदाध्ययनसंयुक्तो भिक्षावृत्तिर्जितेन्द्रियः । नित्यंसत्यव्रतेयुक्तः स्वधर्मेचप्रमोदवान्
मृतः कामसमृद्धेन सर्वभोगावलम्बिना । सूर्येणेवद्वितीयेन विमानेनविराजितः ॥
गुह्यकानामरुद्रस्य गणाः परमसम्मताः । अप्रमेयबलैश्वर्या देवदानवपूजिताः ॥ ४४ ॥
तेषांचसमतांयाति तुल्यैश्वर्यसमन्वितः । देवदानवमर्त्येषु सचपूज्यतमोभवेत् ॥
वर्षकोटिसहस्राणि वर्षकोटिशतानिच । एवमैश्वर्यसंयुक्तोरुद्रलोकेमहीयते ॥ ४६ ॥
उषित्वाऽसौविभूत्यावै यदा वै च्यवतेनरः । रुद्रलोकाच्च्युतोभूमौवसतेनात्रसंशयः
महाकालवनेक्षेत्रे ब्रह्मचर्याश्रमेस्थितः । महेश्वरपरोनित्यंवसेद्वाम्रियतेऽथवा ॥ ४८
मृतोऽसौयातिदिव्ये वै विमानेसूर्यवर्चसि । पूर्णचन्द्रप्रकाशेन शशिवत्प्रियदर्शनः
रुद्रलोकं समासाद्य गुह्यकैस्सहमोदते । ऐश्वर्यंचमहद्भुङ्क्ते सर्वस्य जगतः प्रभुः॥

भुक्त्वा युगसहस्राणि रुद्रलोके महीयते ।
प्रच्युतस्तु पुनस्तस्माद्रुद्रलोकात्क्रमेण तु ॥ ५१ ॥

नित्यंप्रमुदितस्तत्र भुक्त्वालोकमनामयम् । द्विजानामुत्तमेचैव कुलेमहतिजायते ॥
मानुषेषुचसर्वेषु वसेद्भूत्वासुरूपवान् । स्पृहणीयवपुः स्त्रीणां महाभोगपतिर्भवेत्
वानप्रस्थसमाचारो वनौषधिनिषेवकः । शीर्णपत्रसमाहारः फलपुष्पाम्बुभोजनः ॥
कणाशेनाश्मकुट्टेन दन्तोलूखलकेनच । येनकेनाऽप्युपायेन जीर्णवल्कलवस्त्रतः
जटीत्रिषवणस्नायी मुक्तकेशश्चदण्डवान् । जलशायीपञ्चतपा वर्षास्वभ्रशयीतथा ॥
कीटकण्टकपाषाणभूम्यान्तुशयनं तथा । स्थानवीरासनरतः संविभागीदृढव्रतः ॥
अरण्यौषधिभोक्ताच सर्वभूताभयप्रदः । नित्यं धर्मपरो मौनी जितक्रोधोजितेन्द्रियः
रुद्रभक्तः क्षेत्रवासी महाकालवनेमुनिः । तरुणार्कप्रकाशेन वेदिकास्तम्भशोभिना ॥
रुद्रभक्तोविमानेन यातिकामप्रचारिणा । विराजमानोनभसि द्वितीयइवचन्द्रमाः ॥
गीतवादित्रशब्देन संवृतोऽप्सरसांगणैः । वर्षकोटिशतंसाग्रं रुद्रलोकेमहीयते ॥६१

रुद्रलोकाच्च्युतश्चापि विष्णुलोकेमहीयते ।
विष्णुलोकात्परिभ्रष्टो ब्रह्मलोकं स गच्छति ॥ ६२ ॥

तस्मादपि च्युतः स्थानाद्द्वीपेषु स हि जायते ।
स्वर्गेषु च तथाऽन्येषु भोगान् भुङ्क्ते यथेच्छया ॥ ६३ ॥
भुक्त्वैश्वर्यंनरस्तेषु मर्त्योमर्त्येषुजायते । राजावाराजतुल्योवा जायतेधनवान्सुखी
सुरूपः सुभगः कान्तः कीर्तिमान् रुद्रभावितः ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रावा क्षेत्रवासिनः ॥ ६५ ॥
स्वधर्मनिरता व्यास! स्ववृत्त्याचारजीविनः । सर्वात्मनारुद्रभक्ताभूतानुग्रहकारिणः
महाकालवनंक्षेत्रं येवसन्तिमुमुक्षवः । मृतास्तेरुद्रभवनं विमानैर्यान्तिशोभनैः ॥ ६
अप्सरोगणसंयुक्तैः कामगैः कामरूपिभिः । अथवाप्तसम्विदग्नौ शरीरं विजुहोतिय
रुद्राध्यायीमहासत्त्वः स रुद्रभवनेवसेत् । रुद्रलोकात्क्षये तेषां पिशाचोगुह्यकैस्स
सर्वलोकोत्तमेरम्ये भवतीष्टाप्तिसाधकः । येत्यजन्तिमहाकाले प्राणाननशनेनराः
तेषामप्यक्षयो व्यास! रुद्रलोको महात्मनाम् ।
साङ्ख्यास्तिष्ठन्ति ते रुद्रं सर्वदुःखविवर्जिताः ॥ ७१ ॥
सर्वामरयुतन्देवं नन्दीदेवगणैर्युतम् । अनाशकमृताः शूद्रा महाकालवने नराः ॥ ७
सिंहयुक्तैस्तुतेयान्ति विमानैरर्कसन्निभैः । नानावर्णसुवर्णैश्च पुष्पगन्धादिवासितै
अनौपम्यगुणैरम्यैरप्सरोगीतवाद्यकैः । रुद्रलोकेनरानार्यः सर्वेऽप्यनशनेमृताः ॥ ७४
तत्रोषित्वाचिरं कालं भोगान्भुक्त्वा यथेप्सितान् ।
धनी विप्रकुले भोगी जायते मर्त्यमागतः ॥ ७५ ॥
करीषंसाधयेद्यस्तु महाकालवनेनरः । सर्वरोगविनिर्मुक्तो रुद्रलोकं स गच्छति ॥
रुद्रलोकेवसेत्तावद्यावत्कल्पक्षयोभवेत् । तत्रभुक्त्वा महाभोगानिहजातोमहीपतिः ॥
पृथिव्यास्सकलायाश्च रूपवान्सुभगो नरः ॥ ७८ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमे ऽवन्तीखण्डे महाकालवननिवासविधिवर्णनंनामसप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः

कलहनाशनादितीर्थवर्णनम्

व्यास उवाच

आचारः प्रथमोधर्मस्सर्वधर्मपरायणः । स्वधर्मेनिरतश्चैवजितक्रोधोजितेन्द्रियः ॥
रुद्रलोकेव्रजेदेव नात्रचिन्तामतेर्मम । असंशयञ्चगच्छन्ति लोकानन्याञ्छशिप्रभैः ॥
विनापिक्षेत्रवासेन तथैवनियमेनच । स्त्रियोम्लेच्छाश्च शूद्राश्च पशवःपक्षिणोमृगाः
मूकाजडान्धबधिरास्तपोनियमवर्जिताः । एतेषांकागतिर्विप्र! महाकालवनेमृताः ॥

सनत्कुमार उवाच

स्त्रियोम्लेच्छाश्च शूद्राश्चपशवःपक्षिणोमृगाः । कालेनैवमृताव्यासरुद्रलोकंव्रजन्तिते
शरीरैर्दिव्यरूपैश्च सर्वभोगसमन्विताः ॥ ६ ॥

सनत्कुमार उवाच

अस्मिन् महाकालवने शिवो वसति सर्वदा ।
एकस्मिन्दिवसे देवो लीलां कर्तुं शिवाम्प्रति ॥ ७ ॥
ऊचेकालिसमागच्छेत्यादीनिवचनानिसः । तयासहवसन्व्यास श्मशानेप्रेतसङ्कुले
इत्थमुक्तातुशर्वेण कालीतिपार्वतीयदा । तदासाकुपितादेवीकटूचेशङ्करम्प्रति ॥ ६ ॥
एवन्तुकलहोजातः शिवगौर्योर्हियत्रतु । देवस्तत्रसमुद्भूतो नाम्नाकलकलेश्वरः ॥
कृतमग्रेतदाकुण्डं नाम्नाकलहनाशनम् । स्नाने तत्रकृतेव्यास! नस्यात्कलहिनीप्रिया
तस्मिंस्तीर्थे नरः स्नात्वा पूजयित्वा महेश्वरम् ।
उपोष्य रजनीमेकां कुलानां तारयेच्छतम् ॥ १२ ॥
तत्रयच्छति यो दानं त्रुटिमात्रञ्चचन्दनम् । आत्मनातारितास्तेन दशपूर्वेदशापरे ॥
भूमिदानंचयस्तत्र प्रदास्यति नरोमुने !। अपिगोचर्ममात्रेण सर्वभूम्यधिपोभवेत् ॥
ग्रामेकांरक्तकामेवभूमेरप्येकमङ्गुलम् । यः प्रदास्यतिभक्त्याहिसवैराजाभविष्यति

धेनुमश्वांस्तिलान् वस्त्रं भाजनं ताम्रदोहनम् ।
उपानहश्चछत्रञ्च तथा चैवेष्टपादुके ॥ १६ ॥
ये प्रदास्यन्ति विप्रेभ्यस्तेषां लोकाः सदाक्षयाः ।
तस्य दक्षिणपार्श्वे च पृष्ठमाता च देवता ॥ १७ ॥
सावैवसर्वलोकानां देवीदुरितहारिणी । तत्रतीर्थन्तुविज्ञेयं मणिकर्णिकमुत्तमम्
तस्मिन्स्नात्वातु यः पश्येत्पृष्ठमातेतिसञ्ज्ञिताम् ।
स मुक्तस्सर्वपापेभ्यः सिद्धिमाप्नोति वाञ्छिताम् ॥ १९ ॥
तस्यास्तुदर्शनं कृत्वा मार्गेगमनमाचरेत् । नभयंतस्यचोरेभ्यो रक्षोभूतभयंतथा
स्वदेशेपरदेशेवा पर्वतेष्वटवीषुच । नसमुद्रेभयंतस्य तथावैदुष्टभावनाम् ॥ २१
ग्रहपीडासुसर्वासु तथाराजभयादिषु । बस्तं वायदिवामेषं महिषंवापिघातयेत्
देवीमुद्दिश्ययोविप्रःसोऽभीष्टंफलमश्नुते।आश्विनस्यसिताष्टम्यांपूजनंचार्द्धरात्रिके
यःस्नातिपुरतोदेव्याःससिद्धिंलभतेपराम् । मृतपुत्रातुयानारीकुण्डेस्नात्वासभर्तृका
स्नाति वै यदि कुम्भेन अग्रे देव्या विधानतः ।
स्नात्वा नान्यमुखं पश्येत् कुम्भस्नानं विना मुने ! ॥ २५ ॥
तस्यास्सञ्जायतेपुत्रो यथादेवः षडाननः । पृष्ठमातुः पुरा पुण्यं तीर्थमप्सरसां शुभम्
रूपसौभाग्यसम्पन्नस्तत्र स्नातो भवेन्नरः ।
उर्वश्यावै पुरा व्यास! तीर्थस्याऽस्य प्रभावतः ॥ २७ ॥
भर्त्ता पुरूरवा लब्धो लोके योऽसौ महीपतिः ॥ २८ ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे तीर्थमाहात्म्ये कलहनाशनादितीर्थमहिमवर्णनंनामाऽष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

अप्सरःकुण्डमहिमवर्णनम्

व्यास उवाच

कथमप्सरसांतीर्थं तत्रजातंमहामुने !। कारणे न यथा येन यस्मिन्कालेप्रतिष्ठितम्॥
तथातन्मेसविस्तारं सरहस्यंप्रकीर्तय । कथंपुरूरवाश्चासौ भार्य्यातेनवराप्सराः॥
उर्वशीनामकासातु केनजातावराङ्गना । सर्वमेतद्यथावृत्तं ब्रूहि कौतूहलंहिमे ॥ ३ ॥

सनत्कुमार उवाच

नरनारायणौपूर्वं यत्रवैतेपतुस्तपः । बदरिकाश्रमस्थौतौ तेनेन्द्रोभयमागतः ॥ ४ ॥
सर्वाश्चाप्सरसोह्यद्या रूपयौवनदर्पिताः ।
आदिष्टायामववता विघ्नार्थं च समागताः ॥ ५ ॥
तौदृष्ट्वाप्सरसस्तत्र रमन्त्योमदविह्वलाः । विघ्नार्थंरहआयातास्तदादेवौप्रजल्पतः ॥
अस्माकन्नस्त्रियः सन्ति तेन वै विघ्नकारणम् ।
एवं सञ्जल्प्य च नरो नारायणमुवाच ह ॥ ७ ॥
करिष्याम्यहमेकान्तामासां वैरूपतोऽधिकाम् ।
मञ्जर्या सहकारस्य स्त्रीमूरुभ्यां चकार ह ॥ ८ ॥
रूपेणाप्रतिमांलोके सर्वाभरणभूषिताम् । उच्छ्रितांप्रमदांदृष्ट्वा ज्वलनाभांवराङ्गनाम्
गत्वाशशंसुस्ताःशक्रंनतौलोभयितुंक्षमाः । शक्रस्तासांवचःश्रुत्वागत्वादेवावुवाचह
प्रणामावनतोभूत्वाशिरस्यञ्जलिमादधन् ।अहमर्थीस्त्रियश्चास्याःप्रसादःक्रियतामिति
ततस्तान्ददतुर्देवाविन्द्रायपरमेश्वरौ । अस्मद्वचनसामर्थ्याद्गृहाणेमांत्वमुर्वशीम् ॥
ऊरुभ्यांजनितायस्मान्नरेणेयंवराङ्गना । मञ्जर्यासहकारस्य तेनेयमुर्वशीमता ॥ १३ ॥
पुरन्दरोगृहीत्वातामुर्वशींपरमाङ्गनाम् । शिक्षाञ्चक्रियतांचित्रपथानृत्यैविचक्षणा ॥
क्रियतामचिरादेषा यत्नमास्थायशोभनम् । एवमुक्तेतुचित्रेण कृतातेन विचक्षणा ॥

बहुप्रवीणासाजाता नृत्येगीतेचकोविदा । एवंसान्यवसत्तत्र पुरासद्मनिसुन्दरी ॥
गतेबहुतिथेकाले तत्रागात्सनरेश्वरः । इलस्यपुत्रोधर्मात्मानाम्नाचैवपुरूरवाः ॥ १७
इन्द्रस्यार्द्धासनगतो नृत्यंपश्यतितत्रह । नृत्यन्तींवासवस्याग्रे उर्वशींवीक्ष्यकामुकः
हतचित्तस्तयाराजा नकिंचित्प्रत्यपद्यत । धैर्य्यंचित्तेसमावेश्य मुहूर्तंपर्यवस्थितः ॥
उर्वशीचतदातस्य दर्शनाहृतचेतसा । तत्प्रदेशाद्विनिष्क्रम्यकामार्ताचातिविह्वला

भूमौ सा पतिता बाला उच्छ्रिताद्रङ्गमण्डलात् ।
अथाऽऽत्मानञ्च सम्वेद्य उत्थिता भूमिमण्डलात् ॥ २१ ॥

दृष्टासाराजसिंहेन मन्मथेनप्रपीडिता । गतः पुरूरवाभूमिं तामेवमनसास्मरन् ॥
स्मरन्ती राजशार्दूलं गतासाप्युर्वशीगृहम् । चित्राङ्गदगृहेगत्वा दूतंसाथचकारह

चित्राङ्गदेन सा नीता रात्रौ यत्र पुरूरवाः ।
उर्वश्यारहितः स्वर्गः शून्योऽप्यासीद्दिवौकसाम् ॥ २४ ॥

रात्रावेवचसातेन आनीतात्रिदिवंपुनः । तयाविरहितस्सोपिशून्यचित्तःपरिभ्रमन् ॥
उन्मत्ततांगतोव्यास! षष्टिवर्षाणिपार्थिवः । परिभ्रमन्सर्वतीर्थानि महाकालवनंगतः
गन्धर्वेणोर्वशीस्वर्गे नीतासापरमाप्सराः । नापिशेतेनचाश्नाति हेराजन्नितिजल्पति
तावदप्सरसस्सर्वास्ताः प्राप्तायत्रचोर्वशी । रम्भाचमेनकाचैव प्रम्लोचापुञ्जिकस्थली
जलपूर्णाशुकापूर्णावसन्ताचन्द्रिकातथा । सूर्यदत्ताविशालाक्षी चन्द्राचन्द्रप्रभातथा
आगत्यतास्तुसहिता उर्वशींवाक्यमब्रवन् । किंरोदिषिवरारोहे! मर्त्यहेतोःसुलोचने

तद्वाक्यमुर्वशी तासां श्रुत्वा वचनमब्रवीत् ।
सौख्यं षण्डो (ढो?) न जानाति सङ्गात्स्त्रीपुंसयोर्हि यत् ॥ ३१ ॥
अनयोपमया ज्ञेया तस्याऽर्थे कृतनिश्चया ।
श्रुत्वा चेतिव चस्तस्यास्तास्सम्मन्त्र्य समाहिताः ॥ ३२ ॥

अज्ञातास्ताश्चदेवानां महाकालवनेगताः । नृपञ्चददृशुस्तत्रवृक्षच्छायानिषेवितम् ॥

दृष्ट्वाऽऽगत्य नृपं सर्वा भृशं जातास्सुविह्वलाः ।
दृष्ट्वा तथाविधास्सर्वाः कामार्तास्सुरयोषितः ॥ ३४ ॥

मूढचित्ताः प्रहस्यैवमुर्वशीवाक्यमब्रवीत् ।

उर्वश्युवाच

अयं सपुरुषव्याघ्रो विना येनाऽहमीदृशी । ३५

एलः पुरूरवानामा विख्यातोजगतीपतिः । एवंब्रुवन्त्यांवैतस्यामुर्वश्यामप्सरोगणः
मौनीभूतश्चिरंतस्थौलज्जयानतकन्धरः । एतस्मिन्नन्तरेप्रायाद्भगवांस्तत्रनारदः ॥

दृष्ट्वा तथागतास्सर्वा उर्वश्या सहितं नृपम् ।
सम्प्रेक्ष्य च ततःप्राह किं यूयमिह निःस्वनाः ॥ ३८ ॥
त्यक्त्वा तथाविधं रम्यमिन्द्रस्याऽऽलयमुत्तमम् ।
वरश्च व्रियतां शीघ्रं वियोगो न भविष्यति ॥ ३९ ॥
माहात्म्यञ्चाऽस्यतीर्थस्य कथयामास नारदः ।
अस्मिन्या दुर्भगा तीर्थे स्नायात्स्त्रीपुरुषोऽपिवा ॥ ४० ॥
सौभाग्यं लभते सम्यक् सर्वभोगांस्तथोत्तमान् ।
आत्मानन्तोलयेद्यस्तु तिलैर्वा लवणेन वा ॥ ४१ ॥

शर्कराभिश्चवह्नीभिर्वित्तशाठ्यविवर्जितः । गुडेन मधुनावापि देवीमुद्दिश्य पार्वतीम्
लवणेन स्वरूपाढ्या तिलैस्सुर्वाङ्गशोभना । द्रव्यवृद्धिःशर्करया गुडेनाङ्गेषु पूर्णता
मधुनाचैवसौभाग्यं तीर्थस्याऽस्यप्रभावतः । द्वादशैवतुयुग्मानिदेव्यादेवस्यभोजयेत्

काञ्चीं मुखरिणीं दद्यात् ताटङ्कं मुकुराञ्जनम् ।
क्षौमजां कञ्चुकीञ्चैव वस्त्रे कौसुम्भके तथा ॥ ४५ ॥

श्वेतानुलेपनं पुंसां स्त्रीणांदद्याचकुङ्कुमम् । आषाढे श्रावणे वापिमासिभाद्रपदेतथा
शुक्लाश्विनतृतीयायामुत्तमं व्रतमाचरेत् । उत्तमा जायते नारी यथा देवी तथैवच

उमामाहेश्वरौ कार्यौ सौवर्णौ च स्वशक्तितः ।
धार्य्यौ नार्य्या हि तौ देवौ तुलाशिक्ये विधानतः ॥ ४८ ॥

फलानि चैव देयानि शाकानि विविधानिच । तत्रदत्तंहुतंजप्तं सर्वंकोटिगुणम्भवेत्
एवं याकुरुते तत्र तीर्थेनारी समाहिता । गन्धर्वाप्सरसांलोके मृतायातिनसंशयः

अत्रतीर्थेचद्वेलिङ्गे पूजिते देवदानवैः । दृष्ट्वा ते परमां सिद्धिं प्राप्नुतोदम्पती तथा
कार्त्तिक्यान्तु विशेषेण कृत्वा तत्र प्रजागरणम् ।
सम्पूज्य गन्धपुष्पैश्च रुद्रलोकमवाप्नुयात् ॥ ५२ ॥
यथा देव्याःस्वरूपेण वियोगोनैव दृश्यते । तथातयोर्वियोगश्च दृश्यते न कदाचन
एवं कृत्वाःपिता विप्र सर्वाश्चत्रिदिवंगता । उक्तमप्सरसांतीर्थं तीर्थान्तरमथोच्यते
दक्षिणे पृष्ठदेव्या वै माहिषंकुण्डमुच्यते! । महिषोदानवः पूर्वं निहतो गणनायकैः
तत्र तीर्थेनरः स्नात्वा मातृःसम्पूज्ययत्नतः । प्रेतरक्षःपिशाचानांपीडयासविमुच्यते
इति श्रीस्कान्दे महापुराण एकाशीति साहस्र्या संहितायां पञ्चमे-
ऽवन्तीखण्डे ऽप्सरसः कुण्डमहिमवर्णनंनाम
नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः

माहिषकुण्डरुद्रसरोवरमाहात्म्यवर्णनम्

व्यास उवाच

कथंतन्माहिषंकुण्डं मातृणामावृतिःकथम् । रुद्रेणतु कथंक्षेत्रे महिषोदानवोहतः॥
सनत्कुमार उवाच
कपालंखण्डमादाय महादेवोऽप्यतिप्रभम् । ब्रह्मतेजोमयंदिव्यंज्वलन्तमिवचतिवषा
क्रीडमानोजगन्नाथोमोहयामासवैसुरान् । निमेषात्सइमंलोकं योगात्मायोगलीलया
प्राप्यपुण्यतमंक्षेत्रं यत्रातिष्ठन्महाप्रभुः । तत्र तत्र महादिव्यं कपालं देवताधिपः ॥४
स्थापयामास दीप्तार्चिर्गणानामग्रतः प्रभुः ।
तत्स्थापितमथो दृष्ट्वा गतास्सर्वे महौजसः ॥ ५ ॥
विनदन्तो महानादं नादयन्तोदिशोदश । क्षुब्धार्णवाशनिप्रख्यं नभोयेनविदीर्यते

तेनशब्देनघोरेण दानवोदेवकण्टकः । हालाहल इतिख्यातो देशन्तमभिधावितः ॥
अमृश्यमानःक्रोधार्तो दुरात्मादुर्जयस्सुरैः । ब्रह्मदत्तवरश्चैव माहिषंवपुरास्थितः ॥
दैत्यैःपरिवृतोघोरैः कोटिभिः प्रोद्यतायुधैः । तमायान्तन्तुसक्रोधंमहिषंदेवकण्टकम्
समावेक्ष्याऽऽह वै देवो गणान्सर्वान्पिनाकधृक् ।
मायावी गणपो दैत्यस्त्रैलोक्यस्याऽपि कण्टकः ॥ १० ॥
आयाति त्वरितोयूयंतस्मादेनंविनिघ्नथ । कपालस्यगतिंसर्वे आश्रितागणनायकाः
ततोदेवगणाभीतास्तमायान्तं महासुरम् । गर्जमानं महानादं भ्रममाणं महाप्रभम्
विभिदुश्शूलसङ्घातैरसिभिर्मुसलैस्तथा । सम्मोह्यशरजालेन ततोभूमौन्यपातयन्
हतेतस्मिन्महादेवो देवान्प्रोवाच वै तदा । अहोदर्पोऽतिमूढस्य दर्पेण निधनं गतः ॥
एतस्मिन्नन्तरे व्यास! तत्कपालात्सुभैरवाः ।
दीप्तास्या मातरः सर्वाः प्रचण्डास्त्रामहाबलाः ॥ १५ ॥
अभ्यधावंस्तमुद्देशं महादेवं न्यवेदयन् ।
दैत्यान्ताभक्षयन्तिस्म भित्त्वा भित्त्वा महाबलम् ॥ १६ ॥
कपालमातरस्तस्मात् ख्याताःक्षेत्रे महाबलाः ।
महाकपालस्तस्माद्वै सदृशः परिकीर्तितः ॥ १७ ॥
स्थापितस्य कपालस्य भित्त्वा तदभवत्पुरा ।
ख्यातं शिवतडागश्च सर्वपापप्रणाशनम् ॥ १८ ॥
तद्यापि महादिव्यंसरस्तत्रप्रकाश्यते । त्रिषुलोकेषु विख्यातं गन्धर्वगणसेवितम्
पात्रस्थमुद्धृतंवापि शीतोष्णंकथितंजलम् । पुनातिरौद्रसरसोऽश्वमेधावभृथोयथा
प्रागाद्ब्रह्मापितंदेशंदेवतानांशतैर्वृतः । स्वर्गलोकस्यनिश्रेणीकीर्तिताब्रह्मणास्वयम्
अत्र त्यजन्ति ये प्राणान् रुद्रलोकं व्रजन्ति ते ।
धन्या व्यास नरा मर्त्ये महाकालवने स्थिताः ॥ २२ ॥
रौद्रे सरसि ये स्नान्ति जलं वाऽपि पिबन्ति ये ।
स्वधर्माचारनिरताः पश्यन्तीशानमीश्वरम् ॥ २३ ॥

इति स्वर्गगता देवाः स्पृहां कुर्वन्ति नित्यशः ॥ २४ ॥
इदं शुभं दिव्यमधर्मनाशनं महाकपालं सुरपूजितं सदा ।
महाप्रभं पापहरं सनातनं सुरेशलोकादिषु दुर्लभं सदा ॥ २५ ॥
तपोरतैः सिद्धगणैरभिष्टुतं यथानभःस्थं दिननाथमण्डलम् ।
एकाग्रचित्तः शृणुयात्प्रसादतस्त्रिविष्टपं गच्छति सोऽभिनन्दितः ॥ २६ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमे-
ऽवन्तीखण्डे माहिषकुण्डरुद्रसरोमाहात्म्यं नाम
दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः

कुटुम्बेश्वरतीर्थवर्णनम्

सनत्कुमार उवाच

अथाऽतसम्प्रवक्ष्यामितीर्थंत्रैलोक्यविश्रुतम् । स्वर्गभूतंमहेशस्यकुटुम्बेश्वरनामकम्
तस्मिंस्तीर्थेनरःस्नानं करोतिश्रद्धयान्वितः । मुच्यते सर्वपापेभ्यः सप्तजन्मकृतैरपि
शुचिःपश्यति यो देवं कृत्वा श्राद्धं यथाविधि ।
सर्वाँ ल्लोकानतिक्रम्य शिवलोकं स गच्छति ॥ ३ ॥
यस्तु सर्वाणि शाकानि कन्दानि विविधानि च ।
तीरे चास्य प्रयच्छेत्तु स प्राप्नोति परां गतिम् ॥ ४ ॥
पौषे सितप्रतिपदे अष्टम्यां वा समाहितः । एकेनैवोपवासेन अश्वमेधफलंलभेत् ॥
आश्विन्यां पौर्णमास्याञ्च शुचिः पश्यति मानवः ।
पट्टबन्धं महेशस्य सविपाप्मा दिवं व्रजेत् ॥ ६ ॥

चैत्रेमासि सितेपक्षे पञ्चम्यां समुपोषितः । कर्पूरंकुङ्कुमञ्चैव मृगनाभिसचन्दनम्
निवेदयति देवाय नैवेद्यं घृतपायसम् । सुरूपञ्चैवविप्रेन्द्रं सभार्यंभोजयेद्द्विजम् ॥
रुद्रलोकमवाप्नोति यावदिन्द्राश्चतुर्दश । अतः परं प्रवक्ष्यामि तीर्थंविद्याधरस्यतु ॥
तत्र स्नात्वा शुचिर्भूत्वा विद्याधरपतिर्भवेत् ॥ १० ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमे-
ऽवन्तीखण्डे कुटुम्बेश्वरतीर्थमाहात्म्यं नामै-
कादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः

विद्याधरतीर्थमाहात्म्यवर्णनम्

व्यास उवाच

कथंतीर्थमिदंक्षेत्रं जातमत्रमहामुने! । प्रसादाद्ब्रूहिमेब्रह्मञ्छ्रोतुमिच्छामिसाम्प्रतम्

सनत्कुमार उवाच

विद्याधरपतिः कश्चिदासीद्रूपधरःपुरा । ग्रथितापारिजातस्य मालातेनमनोरमा ॥
गृहीत्वासचतांमालां गतोवासववेश्मनि । नृत्यन्तीवासवस्याग्रेदृष्टातेनचमेनका ॥
दत्तातस्यैतदातेन सामालानृत्यसंसदि । सामेनकातुतत्स्थाने मालयामोहितासती॥
कोपाविष्टेनशक्रेण शप्तोविद्याधरस्तदा । पृथिव्यांगच्छपापिष्ठ!नृत्यभङ्गस्त्वयाकृतः
विद्याधरपदं त्यक्त्वा मम शापाच्च साम्प्रतम् ।
एवमुक्तस्तु शक्रेण वाक्यं विद्याधरोऽब्रवीत् ॥ ६ ॥
अजानतामयानाथ अपराधःकृतोऽधुना । अनुग्रहमतोदेव कुरु मे त्वं प्रसादतः ॥ ७॥
एवमुक्तस्सशक्रोवै विद्याधरमुवाचह । गच्छावन्तीं त्वमद्यैव यत्रास्तेगाङ्गटीगुहा ॥

तस्याश्चोत्तरभागेतु विद्यतेतीर्थमुत्तमम् । ख्यातंतत्त्रिषुलोकेषु नाम्नाविद्याधरंशुभम्
भक्त्यातत्रकृतेस्नाने विद्याधरपतिर्भवेत् । अतस्त्वमपितत्रैव कुरु स्नानं प्रयत्नतः ॥
एवमुक्तःसशक्रेण आगतोऽवन्तिमण्डले । स्नानं कृतश्च तेनैव तीर्थे तस्मिन् मनोरमे
प्रभावात्तस्य तीर्थस्य स विद्याधरपोऽभवत् ।
एवं व्यास!समाख्यातं तीर्थं विद्याधरं शुभम् ॥ १२ ॥
तत्रपुष्पाणियोदद्याच्चन्दनञ्चविलेपनम् । लभेत्समस्तभोगान्सइहलोकेपरत्र च ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमे ऽवन्तीखण्डे
विद्याधरतीर्थमाहात्म्यंनाम द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः

मर्कटेश्वरस्नानेनशीतलारोगभयनाशवर्णनम्

सनत्कुमार उवाच

अतःपरंप्रवक्ष्यामि मर्कटेश्वरमुत्तमम् । तत्रतीर्थं चविख्यातं सर्वकामप्रदायकम् ॥
तस्मिंस्तीर्थे नरः स्नात्वा गोशतस्य फलं लभेत् ।
विस्फोटानां प्रशान्त्यर्थं बालानाञ्चैव कारणे ॥ २ ॥
माषेण मिश्रितान्कृत्वा मसूरांस्तत्र कुट्टयेत् ।
शीतलायाः प्रभावेण बालाः सन्तु निरामयाः ॥ ३ ॥
ये पश्यन्ति नरा भक्त्या शीतलान्दुरितापहाम् ।
न तेषां दुष्कृतं किञ्चिन्न दारिद्र्यं द्विजोत्तम!॥ ४ ॥
न च रोगभयं तेषां ग्रहपीडा तथैव च ॥ ५ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
शीतलामाहात्म्यंनाम त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः

स्वर्गद्वारमाहात्म्यवर्णनम्

सनत्कुमार उवाच

स्वर्गद्वारेनरः स्नात्वा दृष्ट्वा देवञ्च भैरवम् । श्राद्धंतत्रैवकुर्वीत पितॄनुद्दिश्य भक्तितः ।
पितॄंश्चसनरोव्यास तारयेदात्मना सह । स्वर्गद्वारेणसोऽभ्येति रुद्रस्यपरमं पदम्
भैरवस्याऽग्रतोदेवी पूर्वेतिष्ठतिचाम्बिका । तां तु दृष्ट्वानरः स्त्रीवा मुच्यतेसर्वपातकैः
महानवम्यांपुरुषःकृत्वाबस्तमयंबलिम् । महिषंवासुरांमांसं मालां बिल्वमयींशुभाम्
भक्त्या निवेदयेद्देव्यै सर्वसिद्धिमवाप्नुयात् ।
तत्र स्नात्वा नरो भक्त्या पूजां कृत्वा शिवस्य च ॥ ५ ॥
स्वर्गद्वारेण सोऽभ्येति रुद्रस्य भवनं द्विज! ॥ ६ ॥
इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमे ऽवन्तीखण्डे
स्वर्गद्वारमाहात्म्यंनामचतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः

राजस्थलसमीपेचतुःसमुद्रस्थितिवर्णनम्

सनत्कुमार उवाच

स्नात्वाचतुस्समुद्रेतुपश्येद्राजस्थलंशिवम् । यस्यदर्शनमात्रेण पुत्रवाञ्जायतेनरः ॥
समुद्रास्सन्तिचत्वारः क्षारक्षीरदधीक्षवः । समीपेतस्यदेवस्य सुद्युम्नेनप्रतिष्ठिताः

व्यास उवाच

लक्षयोजनपर्यन्तंजम्बूद्वीपं सुशोभनम् । मर्यादायांस्थापितोऽयंसमुद्रःक्षारसञ्ज्ञितः

शाकद्वीपेद्विलक्षेतु क्षीराब्धिस्संप्रतिष्ठितः । दध्यब्धिश्चकुशद्वीपे चतुर्लक्षेप्रतिष्ठितः

शाल्मले त्विक्षुजलधिर्ह्यष्टलक्ष प्रतिष्ठितः ।

चत्वारस्ते समाख्याताः समुद्रा भूमिमण्डले ॥ ५ ॥

राजस्थलसमीपे तु कथमेकत्रतां गताः ।

सनत्कुमार उवाच

सुद्युम्नो नामराजाऽऽसीत् पुरा कल्पेषु धार्मिकः ॥ ६ ॥

तस्यपत्नीवरारोहा नाम्नाख्यातासुदर्शना । सा दालभ्यंमुनिंदृष्ट्वा पप्रच्छसुतकाम्यया॥

भगवन्केनदानेन स्नानेनविधिनाऽथवा । सर्वलक्षणसम्पूर्णः पुत्रोलभ्यो मयाकथम्

दालभ्य उवाच

विहितस्तेपुरापुत्रि! सर्वपुत्रेषुसत्तमः । स्वयम्भूतेनदेवेन ब्रह्मणालोककारिणा ॥ ९

ते भर्ता शङ्करं देवमाराध्य तत्प्रसादतः ।

आनयिष्यत्यवन्त्यां चेच्चतुरोऽब्धीन्स्वरूपतः ॥ १० ॥

तेषुराज्ञाकृतेस्नाने तव पुत्रोभविष्यति । शङ्कराराधनेपुत्रितस्मात्प्रेरयवल्लभम् ॥ १

दालभ्यस्यैववाक्येन विचित्राख्यानकेनच । प्रस्थापयामासपतिं शङ्कराराधनेषु च

सगत्वातोषयामास शङ्करं गन्धमादने । सन्तुष्टः प्राहःशशिसूर्याग्निलोचन !॥ १३

अवन्तीं गच्छ राजेन्द्र ! पुत्रं प्राप्स्यसि शोभनम् ।

मच्छासनाज्जलधरा गमिष्यन्ति कुशस्थलीम् ॥ १४ ॥

मरुरूपेस्थलेराजन् समीपेशङ्करस्यच । द्रक्ष्यसि त्वं नरश्रेष्ठ जलधींस्तत्रसङ्गता

अभ्यर्थितास्त्वया तत्र स्थास्यन्ति कलया सदा ।

एवमुक्त्वा महादेवो जगामाऽदर्शनं विभुः ॥ १६ ॥

सुद्युम्नोभार्ययासार्द्धमाजगामकुशस्थलीम् । आगतांस्तुकुशस्थल्यांसमुद्रांश्चददर्श

तांस्तुदृष्ट्वानमश्चक्रे राजस्थलसमीपतः । तंवैदृष्ट्वाचसुद्युम्नं प्रणतंभक्तवत्सलाः ॥ १

प्रोचुर्वारिधयस्सर्वे वरं वरय सुव्रत !। सवव्रेमनसापुत्रं सर्वलक्षणसंयुतम् ॥ १९

उवाचचपुनाराजायावत्तिष्ठतिमेदिनी । स्थातव्यंतावदत्रैव राजस्थलसमीपतः ॥ २

समुद्राऊचुः

तावत्स्थास्यामएवात्र यावत्कल्पावसानकम् । भविष्यतिचतेपुत्रः सर्वलक्षणसंयुतः

अत्र ते स्नानमात्रेण तस्मात्स्नानं समाचर ।

स्थले चात्रशुभे राजन् ! स्थास्यामः कलया सह ॥ २२ ॥

एवंव्यास ! समुद्राश्च सुद्युम्नेनावतारिताः । कुरुतेतेषुयोयात्रां तस्यपुण्यफलंश्रृणु ॥

स्नानंकृत्वामहापुण्येसमुद्रेक्षारसञ्ज्ञके । कुर्याच्छ्राद्धंततोव्यास पितृणांभक्तितत्परः

पूजयेच्चमहादेवं स्थलस्थं पार्वतीपतिम् । मण्डनानिततोदद्याद्ब्राह्मणे वेदपारगे ॥

पात्रंताम्रमयंकार्यं लवणेनप्रपूरितम् । सहिरण्यञ्चदातव्यं ब्राह्मणेवेदपारगे ॥ २६ ॥

सप्तधान्यसमायुक्तं वेणुजंवस्त्रवेष्टितम् । सदक्षिणंफलैर्युक्तमर्घ्यं दद्यात्प्रयत्नतः ॥

क्षीराब्धिचततोगत्वा स्नानंकुर्याच्चपूर्ववत् । क्षीरंतत्रप्रदातव्यं ताम्रपात्रेप्रपूरितम् ॥

दध्यब्धौचतथाकृत्वा दद्याद्दध्योदनंशुभम् । इक्षवब्धौचतथाकृत्वादद्याद्विप्रेगुडंशुभम्

यात्रां कृत्वा तु वै व्यास! गाश्च दद्यात्पयस्विनीम् ।

एवं यः कुरुते यात्रां राजस्थलसमीपतः ॥ ३० ॥

भव्यां हि लभते लक्ष्मीं पुत्रांश्चाऽपि मनोरमान् ।

मृतःस्वर्गमवाप्नोति यावदिन्द्राश्चतुर्दश ॥ ३१ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे

राजस्थलेश्वरसमीपेचतुस्समुद्रमाहात्म्यंनामपञ्चदशोऽध्यायः ॥१५ ॥

षोडशोऽध्यायः

शङ्कारादित्यमाहात्म्यवर्णनम्

सनत्कुमार उवाच

श्रृणुव्यास! महातीर्थं नाम्नाशङ्करवापिका । क्रीडमानेनदेवेन निर्मितंतीर्थमुत्तमम्
प्रक्षिप्तंदेवदेवेन कपालक्षालनंजलम् । वापीगतंकृतंयस्मादतः शङ्करवापिका ॥ २

अर्काष्टम्यां नरः स्नात्वा दिशासु विदिशासु च ।
पूर्वादिक्रमतोयाच्च वापीमध्ये तथैव च ॥ ३ ॥

हविष्यान्नयुतान्व्यासदद्याच्चकरकान्नवान् ।शाकमूलांश्चविप्रेभ्यस्तस्यपुण्यफलंश्रृणु

परत्र चेह ये लोकाः सर्वभोगसमन्विताः ।
तत्र तत्र समायान्ति भुक्त्वैश्वर्यमनुत्तमम् ॥ ५ ॥

ये नराः कीर्त्तयिष्यन्ति माहात्म्यमतिभावुकाः ।
रुद्रलोकेऽपि ते पूज्यास्तेभ्योऽस्तु सततं नमः ॥ ६ ॥

सनत्कुमार उवाच

ततो वैदेवदेवेशः पिनाकी वृषभध्वजः । तुष्टावप्रयतोभूत्वादेवदेवंदिवाकरम् ॥ ७

आजगाम दिवानाथः सन्तुष्टः प्राह शङ्करम् ।

सूर्य्य उवाच

वरं वरय भूतेश! वरदोऽस्मि ददामि ते ॥ ८ ॥

तमाहवरदश्चेत्त्वं याच्यमानं कुरुष्व मे । अंशेनस्थीयतामत्र हितार्थं सर्वदेहिनाम्
अवतीर्णोरविस्तत्र श्रुत्वामाहेश्वरंवचः । ततोदेवाधिदेवेशो ययौख्यातिमहामति

शङ्करादित्यनामेति लोकानां शान्तिकारकः ।
देवादैत्याश्च गन्धर्व्वा विस्मितास्सह किन्नरैः ॥ ११ ॥

अहोधन्यमिदं स्थानं यत्राऽऽस्ते त्रिपुरान्तकः ।

भास्करोऽपि च तत्रस्थस्तीर्थमाहात्म्यवर्णने ॥ १२ ॥

ततस्तुष्टाश्चतेसर्वे ब्रह्माद्यास्सुरसत्तमाः । देवेशंपूजयामासुर्देवमादित्यशङ्करम् ॥

मूर्त्तिमन्तश्च ते देवा अवतीर्य्य च शोभनम् ।
स्थापयित्वाऽब्रुवन् वाक्यं ये त्वां स्तोष्यन्ति मानवाः ॥ १४ ॥

नदुःखंजायतेतेषांजरामरणदुःखजम् । सवयज्ञेषुयत्पुण्यंसर्वदानेषुयत्फलम् ॥ १५ ॥
तस्माच्चवाधिकंह्यत्र शङ्करादित्यदर्शनात । व्याधयोनाधयश्चैव दारिद्र्यं नकदाचन
एश्वर्यञ्चातुलंतेषां जायतेभुविसर्वदा । नरोगोनचदारिद्र्यं वियोगोनचबन्धुभिः ॥
जायतेमुनिशार्दूल! शङ्करादित्यदर्शनात् । इत्येवं देवदेवेन पुरा वै शूलपाणिना ॥ १८

स्थापितं परमं तीर्थं स्वनाम्ना मुनिसत्तम! ॥ १६ ॥

इति श्रीस्कान्देमहापुराणएकाशातिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे
शङ्करादित्यमाहात्म्यंनाम षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः

नीलगङ्गागन्धवतीप्रभाववर्णनम्

सनत्कुमार उवाच

एकस्मिन्समयेव्यास ! कपालक्षालनायवै । शुद्धोदकंगृहीत्वातु कपालेनमहेश्वरः ॥
प्रक्षाल्यचाक्षिपद्भूमौतत्रतीर्थमनुत्तमम् । नाम्नागन्धवतीपुण्यानदीत्रैलोक्यविश्रुता

ब्रह्मणो रुधिरेणाऽपि परिपूर्णाऽभवत् क्षणात् ।
तस्यां स्नानं सदा शस्तं स्वयं देवेन भाषितम् ॥ ३ ॥

श्राद्धंकृतंतर्पणञ्च तत्सर्वंचाक्षयंभवेत् । वायुभूतास्तुपितरस्तस्यास्तीरेतुदक्षिणे ॥

तिष्ठन्ति मुनिशार्दूल! चिन्तयन्ति स्वगोत्रजम् ।

आगमिष्यति पुत्रो नो नप्ता वा सन्तताविह ॥ ५ ॥

संयावंपायसंवापिश्यामाकंसन्निवारकम् । सक्तुक्षौद्रतिलैर्युक्तंपिण्डंदास्यतिवैकदा
तेनपिण्डप्रदानेन तृप्तिर्भवतिचाक्षया । यस्तुस्नात्वाचवैपिण्डं दद्याद्वैचन्द्रपर्वणि ।

पितरो द्वादशाब्दानि तृप्तिं यास्यन्ति तस्य वै ।
येऽत्रागत्य सुविद्वांसो मानवा वै तथा द्विज! ॥ ८ ॥

पितॄन्सन्तर्पयिष्यन्ति स्वर्गस्तेषांसदाऽक्षयः । तत्रयद्दीयतेदानंत्रुटिमात्रंतुकाञ्चनम्
अक्षयंतस्यतत्प्रोक्तंब्रह्मणावैस्वयम्भुवा । गङ्गाद्वारे प्रयागे च कुरुक्षेत्रे च पुष्करे ।

वाराणस्यां गयायाञ्च मासात्तृप्तिर्भविष्यति ।
तुष्टाश्चपितरो नृणां दास्यन्ति काङ्क्षितान्वरान् ॥ ११ ॥

योऽयमुद्दिश्यवैकाममिहश्राद्धंकरिष्यति । तस्यतज्जायतेसर्वंमृतस्यपरामागतिः
अष्टमीनवमीचैवामावस्यावाथपूर्णिमा । सर्वास्वेतासुवैव्यास!रवेः सङ्क्रमणेतथा
ब्रह्मेन्द्ररुद्रदेवांश्च सूर्याग्निब्रह्मदेवताः । विश्वेदेवान्सगन्धर्वान् यक्षांश्चमनुजान्पशून्

सरीसृपान् पितृगणान् यच्चान्यद्भुवि संस्थितम् ।
श्राद्धं वै श्रद्धया कुर्वन् प्रीणयत्यखिलं जगत् ॥ १५ ॥

मासिमासिसितेपक्षे पञ्चदश्यांद्विजोत्तम! । इन्दुक्षयेयदामैत्रंविशाखाचैवरोहिणी
श्राद्धेपितृगणास्तृप्तिंप्रयान्तिचतथार्चिताः। वासवाजैकपादर्क्षेपितॄणांतृप्तिमिच्छताम्
भक्त्या श्राद्धंप्रकुर्वीतपितरस्तेनतर्पिताः । अपिधन्याः कुले जाता अस्माकंतृप्तिहेतवे
येकुर्वन्तिचवैश्राद्धं पिण्डान्येनिर्वपन्तिच । तेनपिण्डप्रदानेन तृप्तिर्नोभविताऽक्षया

इहैत्य वै पुण्यजलेषु सम्यक्स्नात्वा नरः स्वान्नु लभेत कामान् ।
यान् प्राप्य च प्रेतगणैः समेतः स मोदते देववृतोऽर्थसिद्धः ॥ २० ॥
चित्तञ्च वित्तञ्च यशोविशुद्धं देशस्तुकालः कथितो विधिश्च ।
पात्रं यथोक्तं परमाञ्च भक्तिं नृणां प्रयच्छन्ति हि वाञ्छितानि ॥ २१ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
नीलगङ्गागन्धवतीप्रभाववर्णनंनामसप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः

दशाश्वमेधमाहात्म्यवर्णनम्

सनत्कुमार उवाच

दशाश्वमेधिकेस्नात्वाद्दृष्ट्वादेवंमहेश्वरम् । दशानामश्वमेधानांफलंप्राप्नोतिमानवः
मनुनामानवेन्द्रेण राज्ञाचैवययातिना । रघुणोशनसाचैवलोमशेनमहर्षिणा ॥ २ ॥
अत्रिणाभृगुणाचैव दत्तात्रेयेणधीमता । पुरूरवसापुण्येन नहुषेणनलेनच ॥ ३ ॥
अत्रस्नानेनसंप्राप्तं दशाश्वमेधिकंफलम् । संप्राप्तेद्वापरस्यान्ते राज्ञावाष्कलिनातथा
दशानामश्वमेधानां फलं प्राप्तंद्विजोत्तम !। कृष्णवर्णंतथालिङ्गं पूजितंभक्तितः सदा
दृष्ट्वास्पृष्ट्वाचतंदेवं प्रागुक्तंलभतेफलम् । चैत्रेमासिसिताष्टम्यां देवंसंपूज्यभक्तितः

अश्वं दद्याच्च विप्राय सुरूपं च गुणान्वितम् ।
यावन्ति तस्य रोमाणि गण्यन्ते सङ्ख्यया द्विज ! ॥ ७ ॥

तावद्वर्षसहस्राणिशिवलोकेमहीयते । शिवलोकात्परिभ्रष्टः सार्वभौमोभवेद्भुवि ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायांपञ्चमेऽवन्तीखण्डे
दशाश्वमेधमाहात्म्यंनामाऽष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः

एकानंशामाहात्म्यवर्णनम्

सनत्कुमार उवाच

एकानंशांनमस्कृत्य देवींत्रैलोक्यविश्रुताम् । पूजांकृत्वाविधानेनसर्वसिद्धिफलंलभेत्

अणिमादिगुणान् सर्वान् गुटिकां सिद्धमञ्जनम् ।

खड्गं च पादुके चैव बिलवासं रसायनम् ॥ २ ॥

सर्वं तुष्टा प्रयच्छेत्तु नाऽत्र कार्या विचारणा ।

सुरामांसोपहारैश्च भक्ष्यभोज्यैश्च पूजिता ॥ ३ ॥

सर्वान्कामान्नृणां देवी तुष्टा दद्याच्च सर्वदा । महानवम्यांयोदेवीं महिषेण प्रपूजयेत्

मेषेण च यथालाभं सर्वान्कामानवाप्नुयात् ।

व्यास उवाच

कथं देवी समुत्पन्ना एकानंशेति विश्रुता ॥ ५ ॥

तत्सर्वं श्रोतुमिच्छामि सर्वपापप्रणाशनम् ।

सनत्कुमार उवाच

पुरा कृतयुगस्यादौब्रह्मा लोकपितामहः ॥ ६ ॥

निशांसस्मारभगवान् स्वांतनुंपूर्वसम्भवाम् । ततोभगवतारात्रिरुपतस्थेपितामहम्

तां विविक्ते समालोक्य ब्रह्मोवाच विभावरीम् ।

विभावरि! महाकार्ये!व्यवधाने ह्युपस्थिते ॥ ८ ॥

यत्कर्तव्यं त्वया देवि! शृणु कार्यस्य निश्चयम् ।

तारको नाम दैत्येन्द्रः सुरशत्रुरनिर्जितः ॥ ९ ॥

तस्माद्भयेनवैदेवास्त्रस्ता सर्वेदिवौकसः । तस्माद्रुद्रे महेशोवै जनयिष्यतिचेद्वर

सुतंसभवितातस्य तारकस्यान्तकःकिल । शङ्करस्याऽभवत्पत्नी सतीदक्षसुतातु

सापितुःकुपिताभद्रेकस्मिंश्चित्कारणान्तरे । भवित्री हिमशैलस्यदुहितालोकपावनी

विरहेण हरस्तस्या मत्वा शून्यं जगत्त्रयम् । अतपद्धिमशैलस्य कन्दरे सिद्धसेविते

प्रतीक्षमाणस्तज्जन्म किञ्चित्कालं वसिष्यति ।

तस्मात्सुतप्ततपसो भविता यो महाप्रभुः ॥ १४ ॥

सभविष्यतिदैत्यस्यतारकस्यनिवारकः । जातमात्रातुसादेवीस्वल्पसञ्ज्ञैवभामिनी

विरहोत्कण्ठिता बाढं हरसङ्गमलालसा । तयोःसुतप्ततपसोस्संयोगःस्यात्सुगुप्तयोः

पार्वती हरयोस्तस्मात्सुराणां शक्तिकारिणम् ।

विघ्नं त्वया विधातव्यं यथा ताभ्यां तथा शृणु ॥ १६ ॥

गर्भस्थितेऽथतांदेवीं स्वेनरूपेणरञ्जय । ततो रहसिशर्वस्तां विभिन्नानन्दपूर्वकम्

भर्त्सयिष्यतिकालीति ततःसाकुपितासती । प्रयास्यतितपःकर्तुंततस्सातपसायुता

जनयिष्यति यं शर्वादिन्दुवज्ज्योतिमण्डलम् ।

स भविष्यति हन्ता वै सुरारीणां न संशयम् ॥ २० ॥

त्वयाऽपिदानवा देवि!हन्तव्यालोकदुर्जयाः । यावच्चनसतीदेहे सङ्क्रान्तगुणसञ्चयः

तत्सङ्गमेनतावत्तु दैत्यवंशो भविष्यति । एवंकृते त्वयादेवि तपः कालीकरिष्यति

समाप्तनियमा सा च यदागौरीभविष्यति । तदातुचैवसारूप्यं शैलजासम्प्रदास्यति

ततस्तवाऽपि सहजा सैकानंशा भविष्यति ।

रूपांशेन च संयुक्ता त्वमुमा सम्भविष्यसि ॥ २४ ॥

एकानंशेतिलोकस्त्वां वरदे!पूजयिष्यति । भेदैर्बहुविधाकारैस्सर्वगांकामसाधनीम्

ॐकारवक्त्रा गायत्री त्वमेव ब्रह्मचारिणी ।

आक्रान्तरुचिराकारा राज्ञां चाहवशालिनाम् ॥ २६ ॥

विशां त्वं कमला देवि! शूद्राणां जननी स्वयम् ।

ज्ञानिनां ज्ञेयरूपा त्वं त्वं गतिः सर्वदेहिनाम् ॥ २७ ॥

त्वञ्च कीर्तिमतां कीर्तिस्त्वं भूतिस्सर्वदेहिनाम् ।

रतिदारकचित्तानां प्रीतिस्त्वं स्नेहवर्तिनाम् ॥ २८ ॥

त्वं शोभाकृतभूषाणां त्वं शान्तिः शान्तिकर्मणाम् ।
त्वं भ्रान्तिस्त्वल्पबोधानां त्वं कीर्तिः क्रमयाजिनाम् ॥ २९ ॥
महावेला समुद्राणां विलासस्त्वं विलासिनाम् ।
सम्भूतिस्त्वं पदार्थानां स्थितिस्त्वं लोकशालिनाम् ॥ ३० ॥

इत्यनेकविधैर्देवि!रूपैर्लोकेषुचार्चिता । ये त्वां पश्यन्ति वरदे! पूजयिष्यन्तिवापिये ते सर्वकामानाप्स्यन्ति नियतंनात्रसंशयः । इत्येवंसासमुत्पन्नाब्रह्मणासंस्तुतासती

एकानंशा महादेवी ध्यातव्या साऽपि भक्तितः ॥ ३३ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे
एकानंशामाहात्म्यंनामैकोनविंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः

हरसिद्धिमाहात्म्यवर्णनम्

सनत्कुमार उवाच

अथातःसम्प्रवक्ष्यामि हरसिद्धिंसुसिद्धिदम् । पार्वत्याहरणेयत्र सिद्धिःप्राप्ताहरेणच बलिनौदानवौजातौनाम्नाचण्डप्रचण्डकौ । उत्साद्यत्रिदिवंसर्वं गिरिकैलासमागतौ दृष्ट्वा तत्रगिरीशन्तु उद्यताक्षैकहस्तकम् । पिनाकं वरखट्वाङ्गं गृहीत्वा दक्षिणेकरे देविदेवीतिजल्पन्तंदासस्तेऽस्मीतिवादिनम् । यावदेकन्तुफलकंतावद्द्यूतंप्रवर्तताम् ऋणीभूतेतदादेवेतौ प्राप्तौ देवकण्टकौ । उत्सादिताःशिवगणानन्दिनाप्रतिषेधितौ

ततस्ताभ्यां तदा नन्दी शूलाभ्यां प्रविदारितः ।
समं सव्यदक्षिणाभ्यां सुस्राव रुधिरं बहु ॥ ६ ॥

नन्दिनंताडितंदृष्ट्वातदासत्क्रियनन्दनम् । ध्याताहरेणसादेवीप्रणताप्राक्ततःस्थिता

वध्यतांतौ महादैत्यौ वधामीतिवचोऽब्रवीत् ।
तदा तया हतौ दृष्टौ दानवौ बलगर्वितौ ॥ ८ ॥

हरस्तामाह हे चण्डि!संहृतौदुष्टदानवौ । हरसिद्धिरतोलोके नाम्नाख्यातिंगमिष्यसि ततः प्रभृति सादेवी हरसिद्धिप्रदायिनी । हरसिद्धिरितिख्याता महाकाले बभूवह यःपश्येत्परयाभक्त्याहरसिद्धिनरोत्तमः । सोऽक्षयांल्लभतेकामानमृतःशिवपुरंव्रजेत्

आदिसिद्धिं महादेवीं नित्यं व्योमस्वरूपिणीम् ।
हरसिद्धिं प्रपश्येद्यस्सोऽभीष्टं लभते फलम् ॥ १२ ॥

यःस्मरेद्धरसिद्धीति मन्त्रञ्च चतुरक्षरम् । न वैरिणोभयन्तस्य दारिद्र्यं नैवजायते नरोमहानवम्यां यो हरसिद्धिं प्रपूजयेत् । महिषञ्च बलिं दद्यात्सभवेद्भूपतिर्भुवि नवम्यां पूजिता देवी हरसिद्धिर्हरप्रिया । तुष्टा नृणां सदाव्यास!ददात्यनवमंफलम् सापुण्या सापवित्राच सासर्वसुखदायिनी । स्मृता सम्पूजिता दृष्टा धनपुत्रसुखप्रदा महानवम्यां ये व्यास!हन्यन्ते महिषादयः । सर्वेतेस्वर्गतियान्ति घ्नतांपापंनविद्यते

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
हरसिद्धिमाहात्म्यं नाम विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः

वटयक्षिणीमाहात्म्यवर्णनम्

सनत्कुमार उवाच

मासमेकन्नरोभक्त्यापश्येद्योवटयक्षिणीम् । पूजयेत्स्वर्णपुष्पैश्चतस्यसिद्धिर्महीयते

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
वटयक्षिणीमाहात्म्यंनामैकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः

चतुर्दशयात्रावर्णनम्

सनत्कुमार उवाच

पिशाचकेनरःस्नात्वाचतुर्दश्यांविशेषतः । तिलान्ददातियोभक्त्यानपिशाचः प्रजायते

येनचोद्दिश्ययद्दत्तं तदक्षयनरंभवेत् । तत्कुलंहिपिशाचत्वान्मुच्यतेनात्रसंशयः ॥ २ ॥

यस्य नाम्ना नरः स्नाति पिशाचत्वात्स मुच्यते

कुम्भान्वा करकान्वाऽपि योऽत्र दद्यात्समण्डकान ॥ ३ ॥

तस्यवैशाश्वतीमुक्तिः कुलेप्रेतोनजायते । शिप्रागुप्तेश्वरंदृष्ट्वा रुद्रभक्तोजितेन्द्रियः

मुच्यते सर्वपापेभ्यः कञ्चुकेन फणी यथा ।

स्नात्वाऽगस्त्येश्वरं पश्येद्योऽतिभक्त्याऽथ मानवः ॥ ५ ॥

त्यक्त्वा यमगृहं व्यास! रुद्रलोकं स गच्छति ।

शिप्रायां यो नरः स्नात्वा पश्येद्ढुण्ढेश्वरं शिवम् ॥ ६ ॥

सोऽश्वमेधफलंव्यास! लभतेनात्र संशयः । देवेनात्रपुराव्यास वादितोडमरुर्यतः

देवस्तेनसमाख्यातो नाम्नाडमरुकेश्वरः । भक्त्यापश्येन्नरोयस्तु देवंडमरुकेश्वरम्

नैवव्याधिभयंतस्य मृतः शिवपुरंव्रजेत । अनादिकल्पेशंयस्तु भक्त्यापश्यतिमानवः

राज्यंसलभतेस्वर्गं यथादेवः पुरन्दरः । देवानामप्यसौव्यास!स्पर्द्धनीयस्सदाभवेत्

कल्पकोटिशतंसाग्रं भोगयुक्तस्तुमोदते । पश्येत्तिमन्द्रेश्वरंयस्तुवीरभद्रञ्चचण्डिकाम्

सोऽत्रैवलभतेसिद्धिं जयंसर्वत्रमानवः । स्वर्णजालेश्वरं दृष्ट्वा स्नात्वातीर्थेत्रिविष्टपे

स्वर्णेनपूजयेद्देवं सर्वपापैः प्रमुच्यते । स्नात्वापश्येन्नरोभक्त्या यःशिवंकर्कटेश्वरम्

सपतोनभयंतस्य दारिद्र्यंनैवजायते । यः पश्येत्परयाभक्त्या महामायांसनातनीम्

विष्णुमायाविनिर्मुक्तस्सयातिपरमंपदम् । अर्चयेत्परयाभक्त्या यः कपालेश्वरंनरः

समुच्यतेमहापापैर्यद्यपिब्रह्महाभवेत् । स्वर्गद्वारेनरस्स्नात्वा दृष्ट्वादेवञ्चभैरवम्

दर्शनात्तस्यदेवस्य शतयज्ञफलं लभेत् ॥ १७ ॥

इति श्रीस्कान्देमहापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे चतुर्दशयात्रानामद्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः

हनुमत्केश्वरमाहात्म्यवर्णनम्

सनत्कुमार उवाच

अथान्यत्सम्प्रवक्ष्यामि देवंत्रिदशपूजितम् । हनुमत्केश्वरंनाम भुक्तिमुक्तिफलप्रदम्

शैवेसरसियः स्नात्वा पश्येद्धनुमत्केश्वरम् । कल्पकोटिसहस्राणिवायुलोकेसमोदते

व्यास उवाच

हनुमत्केश्वरोयस्तु ह्युक्तः पूर्वस्त्वयानघ । कथांकथयह्येतस्य व्रतपूर्वांसनातनीम्

सनत्कुमार उवाच

त्रैलोक्यकण्टकः पूर्वो रावणोनामराक्षसः । विष्णुनारामरूपेण लङ्कायांविनिपातितः

घातयित्वातुतंदुष्टं सीतामादायजानकीम् । वानरैस्सहऋक्षैश्च नगरींस्वामुपागतः

तत्रराज्यमनुप्राप्य ऋषिभिः परिवारितः । कथावसानेरामेण ह्यगस्त्योमुनिसत्तमः

पृष्टोऽधिकोद्वयोर्वापिशम्भुर्वातजयोऽस्तुकः । तदादाशरथिंप्राहअगस्त्योमुनिसत्तमः

अतोपम्योयथादेवो युद्धेशौर्येमहेश्वरः । ज्ञेयोवायुसुतस्तद्वत्सत्यमेतद्ब्रवीमिते ॥

एवंश्रुत्वाथहनुमान्यच्छिवेनोपमामम । कृतामुनिवरेणेह प्रत्यक्षं राघवस्यहि ॥ ६ ॥

गमिष्येनगरींलङ्कां लिङ्गमेकं प्रयाचितुम् । राक्षसेन्द्रं महाभागं विभीषणमकल्मषम्

ततोगतस्सलङ्कायां विभीषणमुवाचह । देहिमेत्वंमहाभाग लिङ्गमेकञ्चशोभनम् ।

उक्तश्चराक्षसेन्द्रेण गृहाणैतद्यथारुचि । एतानिषड्वैलिङ्गानि रावणस्थापितानिवै

त्रैलोक्यविजयात्पूर्वं ममभ्रात्रामहात्मना । एतेषु यदभीष्टन्ते लिङ्गंकथय सुव्रत! ॥

तत्प्रयच्छामितेऽद्यैव सत्यमेतत्प्लवङ्गम! । ततोजग्राहहनुमाल्लिँङ्गंमौक्तिकसन्निभम्
यदेतद्दृश्यतेवीर! तत्पप्रच्छममानघ । श्रुत्वा हनुमतोवाक्यमथोवाचविभीषणः ॥
दत्तमेतन्महावीर लिङ्गंयत्कृतवानसि । श्रूयतेहिपुराकृत्तं लिङ्गमेतद्धनेश्वरः ॥ १६ ॥
रुद्रभक्त्यासमायुक्तस्त्रिकालमप्यपूजयम् । रावणेनयदाबद्धस्तदानींहिधनेश्वरः ॥ १७
लिङ्गस्यास्यप्रभावेण विमुक्तस्समपद्यत । प्रसादात्तस्यलिङ्गस्य धनेशोधनरक्षकः

गृहीत्वा तन्महालिङ्गं स्वस्थो जातोऽथ वानरः ।

सनत्कुमार उवाच

गृहीत्वा तु ततो लिङ्गं प्रस्थितो विमलेऽम्बरे ॥ १९ ॥

सप्तमेदिवसेचैवसम्प्राप्तोऽवन्तिकांपुरीम् । संस्थाप्यरुद्रसरसस्तीरेस्नानमथाकरोत्
महाकालस्यपूजार्थं गमनंप्रत्यचिन्तयत् । उद्धर्तुकामस्तल्लिङ्गमुद्धर्तुंनशशाकसः ॥

ततो व्यवस्थितो देवः प्राह तं वायुनन्दनम् ।

अस्मिन् क्षेत्रे हनूमंस्त्वं स्वाम्ना स्थाप्य पूजय ॥ २२ ॥

हनुमत्केश्वरश्चाथ लोकेख्यातं भविष्यति । शैलवच्चोन्नतं लिङ्गं स्थापितंवायुसूनुना
शनौपश्येन्नरोयस्तु हनुमत्केश्वरंशिवम् । तस्यशत्रुभयंनास्ति सङ्ग्रामेजयमाप्नुयात
नचचौरभयंतस्य नदारिद्र्यंनदुर्गतिः । तैलाभिषेकंयः कुर्याद्धनुमत्केश्वरं शिवम्
तस्यरोगाः प्रलीयन्तेग्रहपीडानजायते । येपश्यन्तिनराभक्त्यातेषांमोक्षोभविष्यति

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे
हनुमत्केश्वरमाहात्म्यंनामत्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशोऽध्यायः

यमेश्वरमाहात्म्यवर्णनम्

सनत्कुमार उवाच

यमेश्वरन्तुयःपश्येत्स्नापयित्वातिलाम्भसा । कुङ्कुमेनसमालिप्य पूजयेदुत्पलैस्ततः
दहेत्कृष्णागुरुंधूपं दापयेत्तिलतण्डुलान् । यएवमर्चमेद्देवमीश्वरंशूलहस्तकम् ॥ २ ॥

यत्र कुत्र मृतस्यापि यमः पितृसमो भवेत् ॥ ३ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
यमेश्वरमाहात्म्यंनामचतुर्विंशोऽध्यायः ॥ २४ ॥

पञ्चविंशोऽध्यायः

रुद्रसरोमाहात्म्यवर्णनम्

सनत्कुमार उवाच

कथयामिपरंव्यास!तीर्थंतीर्थेषुचोत्तमम् । नाम्नारुद्रसरः प्रोक्तं त्रिषुलोकेषुविश्रुतम्

तत्र स्नात्वा शुचिर्भूत्वा पश्येत्कोटिवरं शिवम् ।

मुच्यते सर्वपापेभ्यो रुद्रलोकं स गच्छति ॥ २ ॥

श्राद्धंतत्रैवकृत्वातु शृणुयात्फलमाप्नुयात् । दशानामश्वमेधानां वाजपेयशतस्य च ॥
फलंकोटिगुणंव्यास!लभतेनात्रसंशयः । पितॄनुद्दिश्ययत्किञ्चित्कोटितीर्थेप्रदीयते

तत्सर्वं कोटिगुणितं जायते नाऽत्र संशयः ।

कोटितीर्थे नरस्स्नात्वा ध्यायेद्यःपरमाक्षरम् ॥ ५ ॥

मुच्यतेसर्वपापेभ्यो निर्मोकेनयथोरगः । प्रातरुत्थाययोविप्र तत्रस्नानंकरोतिवै ॥ ६

कोटितीर्थेनरःस्नात्वा सप्तरात्रोषितः शुचिः ॥ ७ ॥

चान्द्रायणसहस्रस्य फलंप्राप्नोति मानवः । जागरंतत्रकुर्याद्यो ह्यनन्तं फलमश्नुते गन्धपुष्पार्चनं कृत्वा महास्नपनपूर्वकम् । यएवंनयतेरात्रिं सोपवासोजितेन्द्रियः लभते सर्वकामित्वं यत्सुरैरपि दुर्लभम । कार्त्तिक्यामथवैशाख्यां देवंतत्रप्रपूजयेत् गन्धपुष्पैश्च कालीनैस्तथावस्त्रैः सुशोभनैः । कर्पूरंकुसुमञ्चैव श्रीखण्डमगुरुं तथा समभागानिकृत्वातु शिलापृष्ठे च पेषयेत् । अनुलिप्य महाकालंरुद्रस्यानुचरोभवेत्

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे रुद्रसरोमाहात्म्यंनाम पञ्चविंशोऽध्यायः ॥ २५ ॥

षड्विंशोऽध्यायः

महाकालयात्रामाहात्म्यवर्णनम्

सनत्कुमार उवाच

अथ यात्रां प्रवक्ष्यामि महाकालस्य यत्नतः ।
शिवश्रेयस्करीं पुण्यां पुण्यलोकप्रदायिनीम् ॥ १ ॥
स्नात्वा सरसि रुद्रस्य दृष्ट्वा कोटीश्वरं शिवम् ।
नमस्कृत्य ततो गच्छेन्महाकालं सनातनम् ॥ २ ॥

गन्धैःपुष्पैर्नमस्कारैःसम्पूज्यत्रिदशेश्वरम् । प्रणिपत्यततोगच्छेद्देवंकपालमोचनम् । तत्रवैदेवदेवेशःकपालं न्यस्तवान्क्षितौ । कपालेतत्क्षणान्न्यस्तेतत्राभूल्लिङ्गमुत्तमम् कपालमोचनंनाम सर्वपापप्रणाशनम् । तत्र वै स्नपनं कुर्यादाज्यंपलशतन्तुवै ॥ तदर्धार्धेनपादेन वित्तशाठ्यविवर्जितः । कालेपूर्णे स विप्रेन्द्र!शिवलोके महीयते नमस्कृत्य ततोगच्छेत्कपिलेश्वरमुत्तमम् । दर्शनात्तस्यदेवस्य मुच्यते ब्रह्मघातकः हनुमत्केश्वरंदेवं ततोगच्छेत्समाहितः । ऐश्वर्यमतुलं व्यास! दर्शनादस्य जायते

ततोगच्छेन्महादेवंपिप्पलादं सनातनम् । यस्यदर्शनमात्रेणमुक्तिःस्याद्द्विजसत्तम! स्वप्नेश्वरंततोगच्छेद्भक्तिश्रद्धासमन्वितः । दर्शनादस्यदेवस्य दुःस्वप्नश्चविनश्यति

ततो गच्छेन्महादेवमीशानं विश्वतोमुखम् ।
यस्य दर्शनमात्रेण विश्वस्यैव पतिर्भवेत् ॥ ११ ॥

सोमेश्वरन्ततोगच्छेज्जितक्रोधोजितेन्द्रियः । कुष्ठरोगादिदोषेभ्योदर्शनादस्यमुच्यते वैश्वानरेश्वरंव्यास ततोगच्छेत्समाहितः । तस्यवृद्धिस्सदालोकेजायतेतस्यदर्शनात् बीजापूरकहस्तन्तु लकुलीशन्ततो व्रजेत् । रुद्रत्वं दर्शनात्तस्य जायते नात्रसंशयः ततो गच्छेन्महादेवं गणपेश्वरमुत्तमम् । यस्य दर्शनमात्रेण जायन्ते सर्वसिद्धयः

अभ्यर्थितस्सदादेवैः पूजितस्सिद्धिकारणात् ।
तेनाभ्यर्थितपूर्वोऽयं विख्यातो विघ्ननायकः ॥ १६ ॥

वयोवृद्धं ततो गच्छेन्महाकालं सनातनम । न रोगो नजराव्याधिर्दर्शनान्नात्र संशयः

विघ्ननाशं ततो गच्छेत्प्राणीशं देवमुत्तमम् ।
स्नानं शतघटैस्तस्य कुर्याद्भक्त्या समाहितः ॥ १८ ॥

तस्यचैवकृते स्नाने लभ्यन्ते सर्वसिद्धयः । स्वर्गश्चापिसदा व्यास!दर्शनादस्यजायते मार्गगतमनुल्लङ्घ्य दण्डपाणिं ततो व्रजेत् । यस्यदर्शनमात्रेण यमलोकोन दृश्यते पुष्पदन्तं ततोगच्छेद्भक्तिश्रद्धासमन्वितः । यस्यदर्शनमात्रेण मुच्यते सर्वपातकैः ॥ गुह्यंचवमहाकालं ततो गच्छेत्समाहितः । यस्यदर्शनमात्रेण गुह्यपापैः प्रमुच्यते ततो गच्छेत्समाधिस्थो दुर्वासेश्वरमुत्तमम् । यस्यदर्शनमात्रेण कृतकृत्योनरोभवेत्

श्वासावरोधनं कृत्वा दुर्वासस्य समीपतः ।
गौरीं गत्वा महादुर्गां त्यजेच्छ्वासमनन्तरम् ॥ २४ ॥
तत्रोच्छ्वासो विमं क्तःयस्तामर्चेत्सुसमाहितः ।
कालेश्वरं ततो गच्छेद्देवदेवं महेश्वरम ॥ २५ ॥

यस्य दर्शनमात्रेण यमलोकं नपश्यति । बधिरेशं ततो गच्छेद्देवदेवं महेश्वरम् ॥ यस्य दर्शनमात्रेण बधिरत्वंनजायते । यात्रेश्वरन्ततो गच्छेद्यात्रापूर्णफलप्रदम् ॥

कीर्त्तयेदात्मनोनाम स्थानं गोत्रञ्चनत्रवै । न कीर्त्तयेद्यदानाम सायात्राविफलीभवेत्

देवस्याऽग्रे ततो व्यास!उपविश्य समाहितः ।
भक्तियुक्तः स्तुतिं ब्रूयान्नमस्कृत्वा पुनः पुनः ॥ २९ ॥
मया समर्पिता यात्रा त्वत्प्रसादान्महेश्वर! ।
संसारसागराद् घोरान्मामुद्धर जगत्पते! ॥ ३० ॥

अनेन विधिना यस्तु महाकालं प्रदक्षयेत् । प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा
गोलक्षं द्विजवर्य्याय दत्त्वायल्लभतेफलम् । तत्फलंदेवदेवस्य सकृत्कृत्वाप्रदक्षिणम्
भक्त्या परमयायुक्तो महाकालं प्रदक्षयेत् । पदेपदे यज्ञफलमितिमेशङ्करोऽब्रवीत् ॥
षष्टिकोटिसहस्राणिषष्टिकोटिशतानिच । पूजितानिभवन्त्यत्र यात्रेश्वरसमर्चनात्
यएवंकुरुतेयात्रां शिवध्यानपरायणः । सवस्त्रन्दक्षिणां दद्यात्तस्यपुण्यफलंशृणु
सप्तजन्मकृतात्पापान्मुच्यतेनात्र संशयः । एवं यात्रां समाप्याऽथगत्वाच स्वगृहंनरः

यात्रादैवतसंख्यान्वै षड्विंशतिद्विजोत्तमान् ।
भोजयेच्छिवभक्तांश्च शिवध्यानपरायणान् ॥ ३७ ॥
सवस्त्रां दक्षिणां दत्त्वा प्राप्यानुज्ञां विसर्जयेत् ।
यात्राक्रमेण चैकैकं तीर्थान्तरमनुव्रजेत् ॥ ३८ ॥

धर्मोपदेशकेपश्चात् सर्वोपस्करसंयुताम् । धेनुम्पयस्विनींदद्याद्वित्तशाठ्यविवर्जितः

भुञ्जीताथ स्वयंव्यास! सर्वभृत्यसमन्वितः ।
दीनानाथदरिद्रान्धविकलांश्चापि भोजयेत् ॥ ४० ॥

यदत्रफलमुद्दिष्टं तद्वदामिशृणुष्वमे । कुलानां शतमुद्धृत्य मातापित्रोस्समाहितः

कल्पकोटिसहस्राणि शिवलोके स मोदते ॥ ४२ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
महाकालयात्रामाहात्म्यं नाम षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्यायः

वाल्मीकेश्वरमहिमवर्णनम्

सनत्कुमार उवाच

वाल्मीकेरीश्वरं व्यास! भक्त्या देवं प्रपूजयेत् ।
मौनी ध्यानपरोभूत्वा सुकवित्वमवाप्नुयात् ॥ १ ॥

व्यास उवाच

कथमत्रसमुत्पन्नो कोवाल्मीकेश्वरःप्रभुः । यस्यदर्शनमात्रेण कवित्वमुपजायते ॥

सनत्कुमार उवाच

आसीद्व्यासपुराविप्रःसुमतिर्भृगुवंशजः । रूपयौवनसम्पन्नातस्यभार्याऽथकौशिकी
तस्यपुत्रःसमुत्पन्नस्त्वग्निशर्मेतिनामतः । सपित्राप्रोच्यमानोऽपिवेदाभ्यासंनमन्यते
ततोबहुतिथे काले अनावृष्टिरजायत । तदापि बहवश्चाऽसौ दक्षिणामाश्रितोदिशम्
ततोऽसौसुमतिर्विप्रः सभार्यःससुतस्तथा ।विदिशंकाननंप्राप्तःकृत्वाचाश्रममाश्रितः

आभीरैर्दस्युभिः सार्द्धं सङ्गोऽभूदग्निशर्मणः ।
आगच्छति यथा तेन यस्तं हन्ति स पापकृत् ॥ ७ ॥

स्मृतिर्नष्टागतावेदा गतंगोत्रंगताश्रुतिः । कस्मिंश्चिदथकाले तु तीर्थयात्राप्रसङ्गतः

सप्तर्षयःपथा तेन सुव्रताः समुपस्थिताः ।
अग्निशर्माऽथतान्दृष्ट्वा हन्तुकामोऽब्रवीदिदम् ॥ ९ ॥

वस्त्राणीमानिमुञ्चध्वं छत्रकोपानहौतथा । हन्तव्याहिमयायूयं गन्तारोयमसादने
तस्यतद्वचनंश्रुत्वा अत्रिर्वचनमब्रवीत् । अस्मत्पीडनजंपापं कथंतेहृदिवर्तते ॥ ११ ॥

वयं तपस्विनो भूत्वा तीर्थयात्राकृतोद्यमाः ।

अग्निशर्मोवाच

ममास्ति माताऽथ पिता सुतो भार्या गरीयसी ॥ १२ ॥

पोषयामि सदातांस्तु एतन्मे हृदि संस्थितम् ।

अत्रिरुवाच

पित्रादीननुपृच्छत्वं स्वकर्मोपार्जितं प्रति ॥ १३ ॥

यद्युष्मदर्थंक्रियते पापंतत्कस्यकथ्यताम् । चेन्नैकथयन्तिस्ममामृषाप्राणिनोवधीः

अग्निशर्मोवाच

नकदाचिन्मयानेतु संपृष्टाईदृशंवचः । युष्माकंवचसामेऽद्य प्रतिबोधः प्रवर्तते ॥ १५

गत्वा पृच्छामि तान्सर्वान् कस्य भावश्च कीदृशः ।

यूयमत्रैव तिष्ठध्वं यावदागमनं मम ॥ १६ ॥

इत्युक्त्वाताञ्चगामाशुपितरंस्वमुवाचह । धर्मस्यप्रतिघातेन प्राणिनांपीडनेनच ॥

सुमहद्दृश्यतेपापं कस्यैतन्कथ्यतांमम । पिताप्राहाथतन्माता नापुण्यमावयोरिह

त्वंजानासिकुरुषे यत्कृतंभोग्यंपुनस्त्वया । तयोस्तद्वचनंश्रुत्वा भार्यांवचनमब्रवीत्

तयाप्युक्तंनमेपापं पापमेतत्तवैवतु । तद्वाक्यमश्रवात्पुत्रं बालोऽहमितिसोऽब्रवीत्

तज्ज्ञात्वाभाषितंतेषां चेष्टितञ्चैवतत्त्वतः । नष्टोऽहमितिमन्वानः शरणंमेतपस्विनः

क्षिप्त्वाथलकुटंकृष्णयेनवैजन्तवोहताः ।प्रकीर्यकेशांस्त्वरितोऋषीणामग्रतःस्थितः

प्रणम्य दण्डपातेन ततो वचनमब्रवीत् ।

न मे माता न च पिता न भार्या न च मे सुतः ॥ २३ ॥

सर्वैस्तैः परित्यक्ताऽहं भवतांशरणंगतः । सुष्ठूपदेशदानान्मांनरकात्त्रातुमर्हथ ॥

एवंतंवादिनंदृष्ट्वा ऋषयोऽत्रिमथाब्रुवन् । भवतोवचनादस्य प्रतिबोधस्समागतः ॥

भवताऽयमनुग्राह्यः शिष्योभवतुतेमुने! । तथेत्युक्त्वाथतम्प्राह इमंध्यानसमाचर ॥

अनेनध्यानयोगेन पापपुञ्जंप्रणाशय । संस्थितोवृक्षमूलेत्वं परांसिद्धिंगमिष्यसि ॥

इत्युक्त्वा ते ययुस्सर्वे सकामः सोऽपि तत्र वै ।

तद्ध्यानस्थोऽभवद्योगी वत्सराणि त्रयोदश ॥ २८ ॥

निवृत्तास्तुयथातेन मुनयस्तत्प्रशुश्रुवुः । उद्गीतध्वनिन्तेनवल्मीकेविस्मयान्वितः

ततस्तु दृष्ट्वा वल्मीकं काष्ठीभूतो हशङ्किभिः ।

तं दृष्ट्वोत्थापयामासुर्मुनयो नयसंयुतम् ॥ ३० ॥

नमश्चक्रेऽथतान्सर्वान् समुनिमुनिपुङ्गवान् । तान्प्राहप्रणतोभूत्वातपसादीप्ततेजसः

प्रसादाद्भवतामद्य ज्ञानंलब्धंमयाशुभम् । दीनोऽहमुद्धृतस्सर्वैर्मग्नोऽहंपापकर्दमे ॥ ३२

श्रुत्वा तस्येति तद्वाक्यमूचुः परमधार्मिकाः ।

वल्मीकेऽस्मिन् स्थितः पुत्र!यतस्त्वमेकाग्रचित्ततः ॥ ३३ ॥

वाल्मीकिरिति ते नाम भुवि ख्यातं भविष्यति ।

इत्युक्त्वामुनयोजग्मुः स्वां दिशं तपसान्विताः ॥ ३४ ॥

गतेषुमुनिमुख्येषु वाल्मीकिस्तपताम्वरः । कुशस्थल्यामथागम्य समाराध्यमहेश्वरम्

तस्मात्कवित्वमासाद्य चक्रे काव्यं मनोरमम् ।

रामायणञ्च यत्प्राहुः कथासु प्रथमं स्थितम् ॥ ३६ ॥

ततः प्रभृति देवेशो वाल्मीकेश्वरसञ्ज्ञकः ।

ख्यातोऽवन्त्यां ततो व्यास!कवित्वदायको नृणाम् ॥ ३७ ॥

इति श्रीस्कान्देमाहापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे वाल्मीकेश्वरमहिमवर्णनंनामसप्तविंशतितमोऽध्यायः ॥ २७ ॥

अष्टाविंशोऽध्यायः

तीर्थमाहात्म्यवर्णनम्

सनत्कुमार उवाच

शुक्रेश्वरंसमभ्यर्च्य सितपुष्पैविलेपनैः । प्रणिपत्यततोभक्त्या रुद्रलोकेमहीयते ॥

भीमेश्वरंनरोदृष्ट्वा भक्त्यासम्पूज्ययत्नतः । नभयलभतेव्यास!रणेरात्रौजलेऽनले ॥ २

गर्गेश्वरंस्नापयित्वा तिलतैलेनमानवः । बिल्वपत्रैस्तुसम्पूज्य धर्मवृद्धिमवाप्नुयात्

उपोषितश्चतुर्दश्यां तिलप्रस्थतिलाम्भसा ।

स्नापयित्वा तिलैरिष्ट्वासदा सौख्यमवाप्नुयात् ॥ ४ ॥

गोसहस्रंनरोदत्वाभावंकृत्वाविशेषतः । भवबन्धविनिर्मुक्तोरुद्रलोकेसगच्छति ॥

कामेश्वरंसमभ्यर्च्य कुङ्कुमादिविलेपनैः । कामिकेनविमानेन यातिस्वर्गंनसंशयः

चूडामणिंनमस्कृत्य नवम्यांकार्त्तिकेसिते । नवियोनिंनरोयाति धर्मबुद्धिस्तुजायते

चण्डेश्वरंसमभ्यर्च्यकृष्णाष्टम्यामुपोषितः । निर्माल्योल्लङ्घनोत्थेनसशोकेननलिप्यते

इत्यादितीर्थानि महेश्वरस्य पुण्यानि सर्वाणि नरोऽभिगम्य ।

विशुद्धचित्तो भुवि भावितात्मा प्रयाति शम्भोर्भवनं सुरम्यम् ॥ ६ ॥

इति श्रीस्कान्देमाहापुराणे एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे तीर्थमाहात्म्यंनामाष्टाविंशोऽध्यायः ॥ २८ ॥

एकोनत्रिंशोऽध्यायः

तीथप्रसङ्गपञ्चे शानीयात्रावर्णनम्

व्यास उवाच

गुह्यस्थानेपवित्राणि कीर्तितानित्वयामुने! । प्रमाणंकथयस्वाद्य महाकालवनस्यमे

सनत्कुमार उवाच

यथाश्रुतंमयापूर्वं गदतोब्रह्मणस्स्वयम् । तत्तेऽहंसम्प्रवक्ष्यामि शृणुत्वंगदतोमम

योजनस्यैवपर्यन्तं चतुर्दिक्षूपशोभितम् । सौवर्णैस्तोरणैश्चैव मुक्तादामविलम्बिभिः

द्वाराणि तत्र शोभन्ते काञ्चनैः कलशैः स्थितैः ।

सितपद्ममुखैर्द्वारैरनेकैर्मणिमण्डितैः ॥ ४ ॥

महेश्वरप्रयुक्ताश्च द्वाराध्यक्षामहाबलाः । द्वारेषुतेषुशोभन्ते लोकानुग्रहकारकाः

पिङ्गलेशः स्थितः पूर्वे बालरूपोविभावसुः । तीर्थस्याभिमुखेगौरो गुरुर्गणरथानुगः

दक्षिणेऽपि महायोगी नाम्ना कायावरोहणः ।

बिल्वेशः पश्चिमे द्वारे क्षेत्रस्याभिमुखं स्थितः ॥ ७ ॥

नियुक्तो वै महेशेन वारुणीन्दिशमास्थितः ।

उत्तरान्दिशमाश्रित्य स्थितश्चैवोत्तरेश्वरः ॥ ८ ॥

साधकस्सर्वकार्याणामादिष्टश्शङ्करेणसः । मानवायेवसन्त्यत्र क्षेत्रमध्येसुधार्मिकाः

मृताहरपुरंयान्ति विमानैस्सर्वकामिकैः । कृष्णपक्षेचतुर्दश्यामथवार्कैन्दुसङ्गमे ॥

पञ्चेशानींनमस्कृत्य प्रतिलोमानुलोमतः । उपोषितोदिनैकेन ध्यायमानोमहेश्वरम्

मुच्यतेसर्वपापैस्तु बहुजन्मकृतैरपि । एवंचविप्रयोयात्रां पञ्चेशानींसमारभेत् । १२

अनेनैवस्वदेहेन रुद्रलोकंसगच्छति । पञ्चेशानीमथान्यांते सुखेनक्रियतेयथा ॥

तथाश्रु गुप्रवक्ष्यामिसर्वपापप्रणाशिनीम् । प्रातःस्नात्वारुद्रसरस्येकादश्यांसमाहितः

श्राद्धं कृत्वा महाकालं नत्वा ईशानमीश्वरम् ।

पिङ्गलेशंततः प्राप्य स्नात्वा श्राद्धं समाचरेत् ॥ १५ ॥

उपगम्यततोदेवं गणेशंपिङ्गलेश्वरम् । गन्धैः पुष्पैश्च धूपैश्च तमभ्यर्च्यनिवर्तयेत ॥

महाकालेश्वरम्प्राप्य भूयस्स्नातोजितेन्द्रियः । अर्चयेद्देवदेवेशं स्वयंभूतंसनातनम्

ईशानेगमयेद्रात्रिंकृत्वावैनक्तभोजनम् । ध्यायमानोमहेशानं भमौविन्यस्यविग्रहम् ॥

द्वादश्यांपूर्ववत्सर्वं प्रातस्स्नात्वाव्रजेन्नरः । कायावरोहणेगत्वा पिङ्गलेश्वरवद्यजेत्

त्रयोदश्यामथाप्येवं बिल्वेशंपश्चिमेऽर्चयेत् । चतुर्दश्यांतथासौम्ये पूजयेदुत्तरेश्वरम्

अमायान्तुशुचिस्स्नातो महाकालेश्वरं व्रजेत् ।

गन्धैः पुष्पैश्चधूपैश्च नैवेद्यैर्विविधैस्तथ ॥ २१ ॥

गीतनृत्यादिकंकृत्वा प्रणिपत्यक्षमापयेत् । यात्रांकृत्वातुपूर्वोक्तां ततोनिजगृहंव्रजेत्

ब्राह्मणान् भोजयेत् पञ्च शिवभक्तिपरायणान् ।

प्रणम्य देवरूपांश्च महाकालेऽपि तान्द्विजान् ॥ २३ ॥

पूजयित्वाहिरण्येन सूक्ष्मवस्त्रैस्तथानवैः । रथंपिङ्गलकेदद्याद्गजंकायावरोहणे ॥ २४

दत्त्वाबिल्वेश्वरेचाश्वं वृषंदत्त्वाथचोत्तरे । धेनुं दद्यान्महाकाले सर्वोपस्कारसंयुताम्

यएवंकुरुतेव्यास तस्यपुण्यफलं शृणु । पितृकैर्मातृकैस्साद्धं कुलैस्सदिविमोदते

अप्सरोगीतनृत्याढ्यैर्विमानैस्सार्वकामिकैः ॥ २७ ॥

इति श्रीस्कान्देमहापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे पञ्चेशानीयात्रामाहात्म्यंनामैकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥

त्रिंशोऽध्यायः

सप्तदेवीनांमाहात्म्यवर्णनम्

सनत्कुमार उवाच

यस्तुप्रदक्षिणां कुर्यान्नियमेमकुशस्थलीम् । प्रदक्षिणीकृता तेन सप्तद्वीपावसुन्धरा
यस्तुपद्मावतींपश्येदर्चयेत्पङ्कजैर्नरः । दद्याद्धूपंमनैवेद्यं मृतोब्रह्मपुरंव्रजेत् ॥ २
स्वर्णशृङ्गाटिकां व्यास! कुसुमैःस्वर्णसन्निभैः ।
समभ्यर्च्य महाभक्त्या स याति शिवमन्दिरम् ॥ ३ ॥
अवन्तिकान्तुयः पश्येद्देवींत्रैलोक्यविश्रुताम् । कामगेनविमानेनयातिपौरन्दरंपदम्
अर्चयेत्पङ्कजैर्भक्त्यायोदेवीममरावतीम् । अमरैस्सहसंहृष्टो मोदतेदिविसर्वदा
देवीमुज्जयिनींभक्त्या यःपश्यतिसमाहितः । सर्वैश्वर्यसमायुक्तो रुद्रलोकेमहीयते
विशालांचैवयः पश्येद्रुद्रभक्त्यासमाहितः । मुच्यतेत्रिविधैःपापैर्नात्रकार्याविचारणा

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे सप्तदेवीनांमहिमवर्णनंनामत्रिंशत्तमोऽध्यायः ॥ ३० ॥

एकत्रिंशोऽध्यायः

अक्रूरेश्वरमहिमवर्णनम्

सनत्कुमार उवाच

शृणुव्यासमहातीर्थं पुण्यंयद्ब्रह्मणार्चितम् । अक्रूरेश्वरमित्याख्यंयत्रसिद्धःपितामहः
तत्र देवार्चनंकृत्वा कृष्णाष्टम्यामुपोषितः ।
जितेन्द्रियश्शुचिर्दान्तो रुद्रलोकमवाप्नुयात् ॥ २ ॥
न वदेत्केनचित्सार्द्धं नरः प्रातस्समुत्थितः । दृष्ट्वाऽक्रूरेश्वरंदेवं हेमदानफलं लभेत् ॥

इति श्रीस्कान्देमहापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डेऽक्रूरेश्वरमहिमवर्णनंनामैकत्रिंशोऽध्यायः ॥ ३१ ॥

द्वात्रिंशोऽध्यायः

मन्दाकिनीमाहात्म्यवर्णनम्

सनत्कुमार उवाच

यस्तु पश्यति ब्रह्माणं शुचिस्स्नातो जितेन्द्रियः ।
मुच्यते पातकाद्घोराद् ब्रह्मलोकमतो व्रजेत् ॥ १ ॥
पद्मासनस्थितोब्रह्मा ध्यायमानःपरम्पदम् । वशिष्ठाद्यैर्मुनिवरैर्विज्ञप्तः कर्मसम्भवात्

ऋषय ऊचुः

आदित्यामरुतस्साध्या वसवश्चाश्विनावुभौ ।
पितरो ये च लोकानां पूज्यन्ते भुवि मानवैः ॥ ३ ॥
महार्कास्तारकायक्षा दिग्गजाश्चानलानिलाः । अमीदेवावयंसर्वे प्रपठ्यन्तेत्वदंशतः

कं वै ध्यायसि देवेश! एतत्सर्वं ब्रवीहि नः ।

ब्रह्मोवाच

द्वे विद्ये तत्त्वरूपे ये परा चैवाऽपरा तथा ॥ ५ ॥

ज्ञेये मम स्वरूपेण मूर्त्तेमूर्त्तात्मिके सदा ।

ऋषय ऊचुः

पितामह!कथं विष्णो भवतः परमंविभुम् ॥ ६ ॥

येनास्माकं परासिद्धिर्जायते तव दर्शनात् ॥ ७ ॥

ब्रह्मोवाच

माहेश्वरंपरंक्षेत्रं कुशस्थलीतिशब्दितम् । यज्ञार्थिनामयादेवः श्रीकण्ठः पार्वतीपति

याचितस्तेनदेवेन उक्तोऽहंतत्रशम्भुना । समन्ताद्योजनंसाग्रं क्षेत्रमेतत्पितामह! ॥ ९

मयादत्तंतवविभो!महाकालवनादृते । वारितोऽपिमयातत्र वनेगुप्तोहिरोपतः ॥ १०

आरब्धोवैततोयज्ञो नारायणपरिग्रहात् । ज्ञातस्तथाऽपिमेयज्ञो देवदेवेनशम्भुना ॥

यज्ञवाटकपर्दीशस्ततोभिक्षार्थमागतः ।याज्ञिकैस्सोऽथतत्रोक्तोमाऽत्रतिष्ठजुगुप्सित

कर्पादनाच ते तत्र उक्तायास्यामतत्पुनः । एवमुक्त्वाकपालंतुभूमौसंस्थाप्य तत्र हि

स्नातुंनदींययौ शिप्रां कपर्दीपरमेश्वरः । उक्तं तस्मिन्गतेशिप्रांकपर्द्दिनिद्विजातिभि

कथं हि क्रियते होमः कपाले सदसि स्थिते ।

अकपालानि शौचानि पुरा प्रोक्तानि सूरिभिः ॥ १५ ॥

तत्कपालं सदस्येन उत्क्षिप्तं पाणिना स्वयम् ।

तस्मिन् क्षिप्तेऽभवच्चाऽन्यत्क्षिप्तेक्षिप्तेऽभवत्पुनः ॥ १६

एवंनान्तःकपालानां प्राप्यतेमुनिसत्तमैः । रुद्रंकपर्दिनं नत्वा शरणं ते समागताः ॥

ततस्सदर्शनंप्रादाद्भक्तयातुष्टोमहेश्वरः । कपालपाणिर्भगवान् मामुवाच पुनः प्रभुः

वरंवरयभोब्रह्मन्! यत्तेमनसिवर्तते । नास्त्यदेयं मया तुभ्यं सर्वं दास्यामि तत्त्वतः

ब्रह्मोत्तरमिदंस्थानं मया दत्तं चतुर्मुख! । कारयस्वयथाकामं तथावर्णचतुष्टयम् ॥२०

एवं वदन्तं वरदमीशानंपरमेश्वरम् । तथेतिचोक्त्वा सदसि नममान्योवरोवृतः ॥ २१

उज्जयनीति वैनाम कुशस्थलयानिवेशितम् । कुण्डंमन्दाकिनीतत्र मयाकृतमनन्तरम्

तत्रविप्रकृतेस्नाने सर्वपापैःप्रमुच्यते । तस्यां संस्थापयेद्विक्षुचतुरोऽथ घटाञ्छुभान्

सतिलांस्तान्सवस्त्रांश्च सफलान् मण्डनैस्सह ।

कार्त्तिक्यामथ माघ्यांञ्च चतुर्विद्भ्यःप्रदापयेत् ॥ २४ ॥

प्रथमंचऋग्वेदाय यजुर्वेदायदक्षिणम् । पश्चिमंसामवेदाय अथर्वणे तथोत्तरम् ॥ २५

वेदानुद्दिश्यचाप्येवं प्रीयतां मे पितामहः । कृतेचैवंहि यत्पुण्यं तच्छृणुध्वंसमाहिताः

सर्वतीर्थेषुयत्पुण्यं मन्दाकिन्यां तथाभवेत् । सहस्रगुणितंस्नानंजाप्यंलक्षगुणंभवेत्

दानंकोटिगुणंज्ञेयं मन्दाकिन्यांनसंशयः । कार्त्तिकेमासिसम्प्राप्ते गोदानंतत्रकारयेत्

घृतधेनुश्चकार्त्तिक्यांमाघ्यांतिलमयींतथा । जलधेनुंतुवैशाख्यांदत्त्वामुच्येतपातकात्

वाचिकं मानसं पापं कर्मजं यच्च दुष्कृतम् ।

विनश्येत्किल्बिषं सर्वं मन्दाकिन्यास्तु दर्शनात् ॥ ३० ॥

मन्दाकिनीसमं तीर्थं पृथिव्यां नैवदृश्यते । यस्य दर्शनमात्रेण ब्रह्मलोके स मोदते

मन्दाकिन्यां तु यःस्नानं कृत्वा श्राद्धं प्रदास्यति ।

दर्शे च पूर्णिमायां वा पितृलोके स मोदते ॥ ३२ ॥

पितामहन्तुयोभक्त्यां नित्यं पश्यतिमानवः । अश्वमेधसहस्रेण राजसूयशतेन च ॥

युज्यतेनात्रसन्देहः सत्यमेतत्तपोधनाः! । ततोमन्वन्तरेऽतीते प्राप्तेवैवस्वतेपुनः ॥

तेनैवोन्मत्तवेषेण ऊर्ध्वशेफोमहेश्वरः । प्रविष्टोब्राह्मसत्त्रेतु दृष्टस्तैर्द्विजसत्तमैः ॥ ३५

तं ब्राह्मणाः शपन्तिस्म निन्दां कुर्वन्ति चापरे ।

अपरे पांशुभिः शिश्नं घ्नन्ति तस्याऽशपन्द्विजाः ॥ ३६ ॥

लोष्ट्रैर्लगुडकैश्चान्ये घ्नन्तितंबलगर्विताः । जटामुकुटकंकेचिद्धृत्वाकर्षन्तिचापरे ॥

पृच्छन्तिव्रतचर्यांवै व्रतंकेनप्रदर्शितम् । अत्रचैवस्त्रियस्सन्ति कथमेवंत्वयाकृतम् ॥

ब्रह्मणाचेदृशीचर्या विष्णुनावाकृतास्वयम् । गिरिशेनाऽपिदेवेन केनेदंदुष्कृतंकृतम्

माविडम्बयदेवेशं बद्धोह्यसित्वमद्यनः । एवन्तैर्हन्यमानस्तु ब्राह्मणैस्तत्रशङ्करः ॥ ४०

स्मितं कृत्वाब्रवीत्सर्वान् ब्राह्मणान् परमेश्वरः ।

ममाभिघ्नन्ति किं यूयमुन्मत्तं नष्टचेतसम् ॥ ४१ ॥

यूयंकारुणिकास्सर्वे मित्रभावेव्यवस्थिताः । तमेवंवादिनंदेवं जालमरूपधरंहरम्
माययातस्यदेवस्य मोहितास्तेद्विजातयः । पुनः कपर्दिनं जघ्नुःपाणिपादेनवैद्विजाः
ताड्यमानस्तुतंविप्रैः परंकोपमुपागमत् । ततोदेवेनतेशप्ता यूयंवेदविवर्ज्जिताः ॥
ऊर्ध्वजूटास्सलगुडाः परदारोपजीविनः । रताद्यूतेचवेश्यायां पितृमातृविवर्ज्जिताः
नपुत्रेपितृवित्तंच विद्यावाऽपिभविष्यति । शेफोममहतोयैश्च तेसर्वेन्द्रियवर्ज्जिताः

रौद्राभिक्षान्तु भिक्षन्तः परपीडोपजीविनः ।
आत्मानं वर्णयिष्यन्ति धनधान्यविवर्जिताः ॥ ४७ ॥

यैश्चनत्रकृताविप्रैर्न्यमानेकृपामयि । तेषांधनश्चपुत्राश्च दासीदासादयश्चवै ॥ ४८ ॥
कुलोत्पन्नाश्चवैनार्यो भविष्यन्तिवरान्मम । एवंशापंवरं दत्वा गतोऽन्तर्द्धानमीश्वरः
ततोद्विजागनेदेवे मत्वातंशङ्करंविभुम् । अन्वेषयन्तोयत्नेन महाकालवनंगताः ५० ॥

स्नात्वा सरसि रुद्रस्य जपन्तः शतरुद्रियम् ।
जाप्यावसाने तान्देवोऽशरीरिण्या गिराऽब्रवीत् ॥ ५१ ॥

अनृतंनमयाप्रोक्तं क्लेशेष्वपिकुतस्सुखे । भूयोऽप्यनुग्रहंविप्रायुष्माकं करवाण्यहम्

शान्तादान्ताश्चयेविप्रा भक्तिमन्तो मयि स्थिताः ।
न तेषां छिद्यते वंशो न धनं न च सन्ततिः ॥ ५३ ॥

अग्निहोत्ररतायेच भक्तिमन्तोजनार्दने । पूजयन्तिचब्रह्माणं तेजोराशिन्दिवाकरम् ॥

नाशुभं विद्यते तेषां येषां साम्ये स्थिता मतिः ।
एतावदुक्त्वा देवेशो तूष्णीमासीज्जगत्प्रभुः ॥ ५५ ॥

एवंशापंवरंलब्ध्वा देवदेवान्महेश्वरात् । आजग्मुस्सहितास्सर्वे यत्रदेवः पितामहः

विरञ्चिमथ ते जाप्यैस्तोषयन्तः पुरःस्थिताः ।
तुष्टस्तानब्रवीद् ब्रह्मा मत्तोऽपि व्रियतां वरः ॥ ५७ ॥

ब्रह्मणस्तेनवाक्येन तुष्टाः सर्वेद्विजोत्तमाः । कोवरोयाच्यतांविप्राः परितुष्टेपितामहे
एकेतत्राब्रुवन्विप्रा वेदान्वैवृणवामहै ।ततोऽन्यैश्चधनंधान्यं कृतमेवाविशङ्कितैः ॥ ५६

अन्ये प्राहुः किमस्माकं धनैस्तुष्टे पितामहे ।
अग्निहोत्रादिवेदाश्च शास्त्राणि विविधानि च ॥ ६० ॥

शान्ताआढ्याश्चयेलोका वरदानाद्भवन्तुनः । एवंप्रजल्पतांतत्र विप्राणांकोपआविशत्
परस्परंवरार्थेऽथ युद्धंकर्तुंमुद्यताः । युध्यन्तेसायुधाः केचित्केचित्तत्रोपसर्पकाः
उदासीनाश्चयेविप्रास्ते चमौनेनसंस्थिताः । दृष्ट्वैवंभगवान्प्राह विप्रान्युद्धंप्रकुर्वतः

यस्मादुपद्रुतं विप्रैः शालायां वाह्यसंस्थितैः ।
तस्मादामूलतो विप्रा गुल्मो युद्धेविसर्प्पकः ॥ ६४ ॥
उदासीनस्तु यो गुल्मो वृत्तिहीनोभविष्यति।
वेदास्तस्यभवेयुर्वै यस्त्वासीन्मौनसंस्थितः ॥ ६५ ॥
तृतीयस्सायुधो गुल्मो योद्धुकामस्तु यः स्थितः ।
चातुर्विधस्सर्वैविप्रा वृत्तिहीनोभविष्यति ॥ ६६ ॥

परदारासु वेश्यायां द्यूतेचौर्यैसदारतः । नज्ञानंनचमोक्षः स्यात्तेषांवैदुष्टचेतसाम् ॥
ऐवमुक्त्वाययौब्रह्मा वैराजं भवनोत्तमम् । एवंमेपरमंक्षेत्रं मुनयोऽवन्तिमण्डले ॥ ६८
यांदेवनगरींलोके प्रवदन्तीहमानवाः । तस्यान्तुयेद्विजाश्शान्ता वसन्तिक्षेत्रवासिनः
नतेषांदुर्लभंकिञ्चिन्ममलोकेभविष्यति । कोकामुखेकुरुक्षेत्रे नैमिषेपुष्करेषुच ॥
वाराणस्यांप्रयागेच तथाबदरिकाश्रमे । गङ्गाद्वारेप्रभासेच गङ्गासागरसङ्गमे ॥ ७१ ॥
रुद्रकोट्यांविरूपाक्षे मित्रस्याऽपितथावने। तीर्थेष्वेतेषुक्षेत्रेषुयासिद्धिर्द्वादशाब्दिका
प्राप्यतेमानवैर्लोके या मासेनैवलभ्यते । उज्जयिन्यांनसन्देहो ब्रह्मचर्यैमनोयदि ॥
तीर्थानांप्रवरंतीर्थं क्षेत्राणामवित्रोत्तमम् । सदाभिरुचिरंमह्यमेतद्वैमुनिसत्तमाः ॥

मन्दाकिन्यास्तु माहात्म्यं क्षेत्रस्योत्पत्तिरुत्तमा ।
भूयः किमन्यदिच्छन्ति श्रोतुं वैद्विजसत्तमाः ॥ ७५ ॥

सनत्कुमार उवाच

एतत्तेब्रह्मणोवाक्यंश्रुत्वाव्यासतथाविधम् । वशिष्ठाद्याश्चमुनयःपरंध्यानमथोगताः

ध्यात्वा तु सुचिरं कालं तत्र वासे मनो दधुः ।

साग्निहोत्रास्सपत्नीका गताश्चावन्तिमण्डले ॥ ७७ ॥
महाकालवनंदृष्ट्वाशिप्राञ्चैवमहानदीम् । श्मशानमूषरञ्चैवनदींगन्धवतींतथा ॥ ७८ ॥
कोटितीर्थमुपस्पृश्यचक्रुर्वासञ्चतत्रवै । स्मृत्वातद्ब्रह्मणोवाक्यंरुचिस्तेषांतदाभवत्
अरुन्धत्यावशिष्ठश्च गमनंप्रतिमोदितः । उवाचतांमहात्मासौ स्वांभार्यांमुनिसत्तमः
महाकालः सरिच्छिप्रा गतिश्चैवसुनिर्मला ।
उज्जयिन्यां विशालाक्षीवासः कस्य न रोचते ॥ ८१ ॥
स्नानंकृत्वानरोयस्तु महानद्यांहिदुर्लभम् । महाकालंनमस्कर्ता नैवमृत्युंसशोचयेत्
मृतः कीटः पतङ्गो वा रुद्रस्यानुचरोभवेत् । यत्रैषाश्रूयतेमुक्तिः कथंसात्यज्यतेमया
एवं प्रजल्प्याथमुनिप्रधानस्तत्रैव वासं सहसा चकार ।
वनस्य व्युष्टिं परिकीर्तयंस्तु स्थितस्समहैवात्र मुनिप्रधानैः ॥ ८४ ॥
इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
मन्दाकिनीमाहात्म्यवर्णनंनाम द्वात्रिंशत्तमोऽध्यायः ॥ ३२ ॥

त्रयस्त्रिंशोऽध्यायः

शङ्करादित्यमाहात्म्यवर्णनम्

सनत्कुमारउ वाच
अवन्त्यामङ्कपादाख्ये पश्येद्रामजनार्द्दनौ । ययोर्दर्शनमात्रेण यमलोकंनपश्यति ॥
व्यास उवाच
कथंतावङ्कपादाख्ये यातावत्रमहामुने! । नपश्येद्यमलोकं स यद्यपिब्रह्महाभवेत् ॥ २
सनत्कुमार उवाच
भारावतारणार्थाय देवौरामजनार्दनौ । अवतीर्णौयदोर्वंशेदिव्यरूपौमहाद्युती ॥ ३
कंसंहत्वाथचाणूरमुग्रसेनंनराधिपम् । अभिषिच्यस्वयंराज्ये यदुसिंहउवाचतम्

किंकार्यंतेमयाब्रूहि कर्तव्यन्तेसुतेहते ॥ एवमुक्तस्सराजावै उग्रसेनोऽब्रवीदिदम् ॥५
सर्वंसम्पत्स्यतेकृष्ण!भवतोहिनदुर्लभम् । विज्ञाताखिलविज्ञानौभवितारावुभावपि
गच्छेतामुज्जयिन्यांवै कृतविद्यौभविष्यथः । ततस्सान्दीपनिंविप्रं जग्मतूरामकेशवौ
कण्ठस्थांश्चक्रतुर्वेदानाचारमखिलञ्चतौ । सरहस्यंधनुर्वेदं ससंहारंतथैवच ॥ ८ ॥
अहोरात्रैश्चतुःषष्ट्यातदद्भुतमभूद्द्विज! । सान्दीपनिरसम्भाव्यंतयोःकर्मातिमानुषम्
विचिन्तयतौतदामेनेप्राप्तौचन्द्रदिवाकरौ । ततःकिञ्चित्सनोवाचस्नातुंतीर्थमथोययौ
शिष्यैस्तु सहितो विप्रो महाकालमथाविशत् ।
शिष्यैस्सह प्रविष्टौ द्वौ तदा तौ रामकेशवौ ॥ ११ ॥
वन्द्यमानोमहाकालस्तदाकेशवमब्रवीत् । त्वयानाथेनदेवानां मनुष्यत्वेहितिष्ठता ॥
सुखमासीच्चसाधूनामज्ञानानाञ्चसर्वदा । जनपीडाकरायेतु सदा वा बलदर्पिताः ॥
युवाभ्यांतेहतास्सर्वेकंसप्रमुखतोनृपाः । मुनिसिद्धसुरादीनांस्थितिःकार्यात्वयानघ
करिष्यामि तमित्युक्त्वा स नमस्यस्ततो ययौ ।
दृष्ट्वा सान्दीपनिं शिष्या ऊचुरेवं दिनेदिने ॥ १५ ॥
कोपिनाश्रद्दधत्तेषांवचस्त्वत्यद्भुतंयतः । स्वयंययौततोद्रष्टुमाश्चर्यंशिष्यभाषितम्
ततस्तथोत्थितः शब्दः संश्लेषश्च तथा तयोः ।
तावागतौ गृहं तत्र गुरुर्वचनमब्रवीत् ॥ १७ ॥
नवैज्ञातौमयावीरौयदिवृष्णिकुलोद्भवौ । ततस्सान्दीपनिंकृष्णःकृतकृत्योऽब्रवीद्वचः
गुर्वर्थंकिन्ददामीतिसहरामेणहर्षितः । तच्छ्रुत्वावचनंहृद्यं गुरुःप्रोवाचहर्षितः ॥ १९ ॥
पुत्रमिच्छाम्यहंत्वत्तोयोमृतोलवणाम्भसि । पुत्रएकोहिमेजातस्सचापितिमिनाहतः
प्रभासेतीर्थयात्रायां त्वमेवतमिहानय । तथेतिचाब्रवीत्कृष्णो रामस्यानुमतेगतः ॥
तंसमुद्रउवाचेदं दैत्यः पञ्चजनोमहान् । तिमिरूपेणतंबालं ग्रस्तवान्मयिसंस्थितः
ततः पञ्चजनं हत्वा ग्राहरूपंमहाबलम् । तन्मध्यस्थंचजग्राह शङ्खंग्रस्तोहियः पुरा ॥
जलमध्यस्थितेनैवग्राहेणातीवलीलया । तस्योदरेयदाबालंनददर्शजनार्द्दनः ॥ २४ ॥
यमालयगतंमत्वा तदावरुणमब्रवीत् । भगवन्यादसामीश रथोमेदीयताम्महान् ॥

येनाहवेहिनाञ्जित्वापश्येयंप्रेनपंयमम् । पुराजिरेहतादैत्यादानवाबलदर्पिताः ॥ २६ ॥
मयायेनरथेनाद्य समह्यंदीयतांरथः । न्यासभूतोरथोयस्ते विधृतोपरतेरणे ॥२७ ॥
मयाधर्मं पुरस्कृत्यदीयतांसह्यपाम्पते! । एतच्छ्रुत्वाप्रहृष्टात्माज्ञात्वाकार्यार्थिनंहरिम्
ददौतुरथमक्षोभ्यं रणेतस्मैसुरासुरैः । ततोहरिस्समालोक्य रथंरत्नपरिष्कृतम् ॥
द्वीपिचर्मपरीधानं वैयाघ्रपरिवारितम् । नानाचित्रविचित्राङ्गं गरुडध्वजराजितम् ॥
संयुक्तंशैव्यसुग्रीवमेघपुष्पबलाहकैः । अजेयन्देवदेवेन्द्रदानवासुरराक्षसैः ॥ ३१ ॥
अनेकायुधसम्पूर्णंमणिविद्रुमभूषितम् । सहस्रसूर्यप्रतिमंचारुचक्रंचतुर्युगम् ॥ ३२ ॥
किङ्किणीशतशोभाढ्यं घण्टाचामरचन्द्रिकम् ।
संवर्त्ताकारविषमं खगेन्द्रवरकेतनम् ॥ ३३ ॥
दृष्ट्वाकृष्णस्सरामस्तु मुमुदे वीतविस्मयः । प्रदक्षिणमुपागत्य देवताभ्यः प्रणम्यच
आरुरोह रथं विष्णुर्विमानं साग्रजोऽजनः ॥ ३५ ॥
ततो जगाम त्वरितो जनार्द्दनो जगन्निवासो यमलोकमाश्रिताम् ।
दिशं सहस्रैः किरणैर्वृताम्पुरीं ददर्श शङ्खं परिगृह्य चाच्युतः ॥ ३६ ॥
तत्रप्रध्मापयामास शङ्खंखड्गधनुर्धरः । तेनशब्देनवित्रस्ताः कृतान्तालयवासिनः
नरकान्तर्गतामर्त्याः पापाचारपरायणाः । सुखमापुः प्रशान्ताश्चवह्नयःकृष्णदर्शनात्
शस्त्राणि कुण्ठतां प्रापुर्यन्त्राणि विविधानि च ।
विदीर्णानि तदा चाशु देवदेवस्य दर्शनात् ॥ ३९ ॥
असिपत्रवनंनाम शीर्णपर्णमजायत । रौरवंनामनरकमभैरवमभूत्तदा ॥ ४० ॥
अभैरवंभैरवाख्यं कुम्भीपाकमपाचिकम् । शृङ्गाटंशृङ्गसदृशं लोहसूच्यप्यसूचिका ॥
दुस्तरासुतराजाता नदीवैतरणानृणाम् । नरकान्तेतदाजातेगतेविश्वेश्वरेविभौ ॥
पापक्षयात्ततस्सर्वे तेमुक्तानरकान्नराः । पदमव्ययमासाद्य दृष्ट्वा विष्णुं तमोपहम् ॥
विमानेषुसहस्रेषु ह्यारूढास्तेसमन्ततः । समीक्ष्यपुण्डरीकाक्षं मुक्तास्तेसर्वपातकात्
ततश्शून्यंमुनेजातं सर्वंनिरयमण्डलम् । दर्शनात्तस्यदेवस्य विष्णोर्विश्वस्वरूपिणः
ततोदूताः कृतान्तस्यकृष्णश्चयुद्धकारिणम् । वारयामासुरव्यग्रा विशन्तंनरकान्प्रति

किङ्करा ऊचुः

मावीरानेनमार्गेण रथमानयमानवाः । प्रयान्त्यधोगतिं पापात्परस्त्रीस्वापहारकाः
यमादिष्टानराः पापाद्ये मोच्या वर्षकोटिभिः ।
दृष्ट्वा तएवसद्यस्त्वां गतास्स्वर्गमथावृताः ॥ ४८ ॥
एतच्छ्रुत्वावचस्तेषां कृपयापीडितोभृशम् । पुनः प्रोवाचमधुहा मोक्षायाहमुपागतः
सर्वेषांस्वर्गदाताऽहं यमलोकनिवारकः । अञ्जसायमराड्दूता यमायाख्यातमेव च ॥
एतच्छ्रुत्वावचोदूतास्सत्वरायममागताः । सर्वमाचक्षिरेवृत्तं यथानारकिमोक्षणम् ॥
ततोयमोरुषाविष्टः प्राहतान्यमकिङ्करान् । यः कश्चिदागतोमर्त्यो मर्यादाभेदकृन्नरः
तंगत्वावारयध्वंवै गृहीत्वानीयतामिह । अयन्नरान्तकोयातु किङ्करस्सहकिङ्करैः
एवमुक्तो यमेनाथ किङ्करस्सनरान्तकः । गत्वातंवारयामास वाग्भिरुग्राभिरच्युतम्
यदानवारितस्तस्थौ तदाक्रुद्धोनरान्तकः । तदाशरैरतीवोग्रैस्ताडितस्तेनकेशवः ॥
बलदेवोऽपिसमरे ताडितोविविधैश्शरैः । तावुभौताडितौघोरैः समन्ताद्यमकिङ्करैः
आदायधनुषीदिव्ये जघ्नतुर्यमकिङ्करान् । बाणैरनेकसाहस्रैः क्रुद्धौरामजनार्द्दनौ ॥
नरान्तकोऽपिसमरे बलेनबलिनार्दितः । पपातगदयाभिन्नो मूर्ध्निनिर्गतलोचनः ॥
ततोनरान्तकेवीरे पतितेयमकिङ्करे । किङ्कराणामभूत्सैन्यमातंरणपराङ्मुखम् ॥
तेदूतारामकृष्णाभ्यां हन्यमानाभयातुराः । यमायकथयामासुर्नरान्तकनिपातनम् ॥
ततोयमोययौक्रुद्धः समन्तात्किङ्करैर्वृतः । ततः प्राह यमः क्रुद्धोनोजितोऽहंपुरापरैः
ततोवादित्रघोषैस्तु मुरजानकगोमुखैः । नानाडमरुकाद्यैश्चचित्रगुप्तेचगच्छति ॥
देवाविद्याधराः सिद्धा द्रष्टुं प्राप्ता महाबलम् ।
कृतान्तस्य रणेऽक्षोभ्यं कामपालं जगत्पतिम् ॥ ६३ ॥
ततस्तेकिङ्कराः सर्वेचित्रगुप्तेननोदिताः । रथामावृत्यबाणौघैः प्रबबाधुस्समन्ततः ॥
बलश्चकेशवं सङ्ख्ये जघ्नतुस्तावुभावपि । रणेचविविधैर्बाणैश्चित्रगुप्तस्यपश्यतः
विदार्यचसहस्राणि किङ्कराणांसमन्ततः । कृतान्तानीकिनीमध्ये कृतान्तइवकेशवः
चचार रणदुर्द्धर्षः कामपालेन पालितः ॥ ६७ ॥

ततश्चित्रगुप्तोरणेकिङ्करौघं विदीर्णं निरीक्ष्याऽर्तनादंचकार ।
शरैः पञ्चभिः कृष्णमायान्तमाजौ जघानाष्टभिर्वक्त्रदेशे सभिन्नः ॥ ६८ ॥
शरार्तोरथोपस्थआसीत्तदानीं तमालोक्यभिन्नं रणे नष्टसञ्ज्ञम् ।
रथं स्वं समादाय यातः कृतान्तस्ततश्चित्रगुप्तेशरार्ते प्रसुप्ते ॥ ६९ ॥
रणे कीर्त्तिलुप्तेभयक्षोभयुक्ताः स्वसैन्यैश्चयुक्ताभयार्तानिषण्णाः ।
प्रधानाश्चभग्नाविचित्राश्च भग्नास्ततश्चित्रगुप्तं निशम्याऽथ भग्नम् ॥ ७०॥
सकालस्तमायान्तमालोक्यदूराद्वरं सैन्यमादाय देवारिशत्रुम् ।
विनाशाय युध्यद्युगान्ते प्रजानां यथा वाडवो ज्वालवृद्धः प्रवृत्तः ॥ ७१ ॥
तमायान्तमालोक्य कालं करालं शरैरावृणोदन्तकं कालकल्पैः ।
स कालः करालं समादायदण्डं मुमोचाच्युते पश्यतान्देवतानाम् ॥ ७२ ॥
ततः कालदण्डः प्रजानां विनाशो हरेस्सन्निकाशं समभ्याजगाम ।
ततो देवगन्धर्वयक्षामुनीन्द्राः परं विस्मयं प्रापुरन्वीक्ष्य रामम् ॥ ७३ ॥
ज्वलन्तञ्च जग्राह कालस्य दण्डं स रामो वरं लीलयानन्तमूर्तिः ।
कालदण्डे गृहीते बलेनाहवे मोक्तुकामे पुनः कालनाशाय वै ॥ ७४ ॥
तूर्णमभ्येत्य तत्रान्तरे पद्मजस्तं रणे वारयामास कृष्णंतदा ॥ ७५ ॥
मां मुञ्चेत्यब्रवीद्वेधाः कालं कालायुधं बल! ।
त्वयावलबतावीर चराचरधराधरा! । धार्यतेशिरसादेव संसारेनास्ति ते समः ॥ ७६
त्वयाविश्वपतिर्विष्णुरुत्सङ्गेनसदोह्यते । कोऽन्योऽस्तित्वत्समोरामयोजगद्वहनेक्षम
जगत्स्रष्टाजगद्गोप्ताजगद्धर्ताजगत्पतिः । पाल्यतेयस्त्वयासोऽपिविष्णुर्विश्वैकनायक
कस्ते स्तुतिकरोऽस्तीह को गुणान्वेत्तुमर्हति ।
ततो वयं त्वदङ्कस्था विष्णुनाभिभवायनाः ॥ ७९ ॥
इत्युक्त्वाबलदेवञ्च वासुदेवंपुनर्वचः । उवाच चतुरास्यस्तु स्तुतिपूर्वंवृतस्सुरैः
कृष्ण!कृष्ण!करालास्य! कालस्यास्य कृपां कुरु ।
यत्तो भवन्तमायान्तं विष्णुं विश्वैकनायकम् ॥ ८१ ॥

वेत्तिनायंजगन्नाथ नरकार्णवतारकम् । त्वयावैभगवन्पूर्वंयमः संस्थापितः पदे ॥
नृणांदुष्कृतकर्तॄणां नरकाययमः प्रभो! । तस्मादस्य जगन्नाथ क्षम्यतांपुरुषोत्तम!
विभो!कृतापराधस्यब्रूहियत्तेविवक्षितम । एतच्छ्रुत्वाऽब्रवीत्कृष्णोधातःश्रृणुगुरोर्मम
सान्दीपनेस्समानीतस्सुतस्तेनागताविह । समर्प्यतांगुरुश्रेष्ठ श्रेष्ठायगुरुदक्षिणा ॥
आवाभ्यां या प्रतिज्ञाता तस्मात्सा पाल्यतां विभो! ।
एतत्पितामहः श्रुत्वा यमं समरनिर्जितम् ॥ ८६ ॥
समाहूयाऽब्रवीद्विष्णुर्य्यद्ब्रवीति कुरुष्व तत् ।
तच्छ्रुत्वा धर्म्मराजस्तु विरञ्चिमिदमब्रवीत् ॥ ८७ ॥
भगवन्विश्वकृल्लोकेनैषमार्गस्त्वयाकृतः । यमलोकमनुप्राप्तः कायहीनः शरीरवान् ॥
शरीरसहितोयाति नैतदत्रप्रपद्यते । तच्छ्रुत्वाहिपुनर्ब्रह्मा विश्वस्यास्यविभुःस्वयम्
विश्वकृद्विश्वहृद्यस्माद्यदिच्छति करोतु तत् ।
तस्मादर्पय पुत्रं त्वं मुनेस्सान्दीपनेश्च वै ॥ ९० ॥
नरकायं पुनः कृत्वा तञ्चानयमहामते । तच्छ्रुत्वाधर्मराजस्तु पुत्रंसान्दीपनेस्तथा ॥
ससर्जबालरूपञ्चतदात्मानंतदुद्भवम् । अर्पयामासकृष्णायबालंरूपसमन्वितम् ॥९२ ॥
समक्षंदेवतानाञ्च तदद्भुतमिवाभवत् । ततःप्राप्यगुरोः पुत्रं प्रभुःप्रीतःप्रजापतिम्
प्राह प्राप्तो मया ब्रह्मन् स्वरूपो द्विजदारकः ।

श्रीकृष्ण उवाच

अद्यप्रभृति लोकेश! देशे मच्चरणाङ्किते ॥ ९४ ॥
अवन्त्यामङ्कपादाख्ये मृतानेक्षन्तितेयमम् । महाकालोत्तरे देवमाद्यं वै पुरुषोत्तमम्
विश्वरूपञ्चगोविन्दं शङ्खोद्धारंचकेशवम् । येपश्यन्तिकुशस्थल्यामेतेषांमूर्तिपञ्चकम्
तेनरानगमिष्यन्तिविरञ्चेनिरयंक्वचित् । तथैवागमनादत्र मम रामस्य नारकाः ॥९७
विमुक्तास्ते त्वया घोरात् प्राप्नुवन्त्यखिला दिवम् ।
इत्युक्ते वचने वेधाः प्रोवाच प्रीतिमान्हरिम् ॥ ९८ ॥
यत्त्वयोक्तं वचःकृष्णतदस्तुसकलंसदा । ये च त्वामादिपुरुषं प्रथमंपुरुषोत्तमम् ॥

प्रणम्य ये च द्रक्ष्यन्ति स्नात्वा शिवसरस्यपि ।
अधोज्वलं महाकालं सोऽश्वमेधफलं लभेत् ॥ १०० ॥
एवमुक्तो हरिः पुत्रमादायबलेन (हलिना) सह (?) ॥ १०१ ॥
आपृच्छयवेधसंदेवमारुरोहरथंततः । शङ्खमापूरयामास कृतकार्योजनार्द्दनः ॥ १०२ ॥
मोक्षायनिरयस्थानं नृणांवैपापकर्मणाम् । ततस्तेनशङ्खशब्देन स्मरणेनाच्युतस्य च
दिव्यान्विमानानारुह्य दिवमेवाखिलागताः ।
शून्यंतन्मण्डलं जातं नारायणसमागमे ॥ १०४ ॥
कालो पि दण्डमासाद्य बलदेवात्पुरःपुरम् ।
प्रविवेश ततो धाता तत्रैवान्तरधीयत ॥ १०५ ॥
कृष्णोऽपिबलवान्वीरः प्राप्तउज्जयिनींपुरीम् । बलदेवसहायस्तुसरथेनाशुगामिना
ततस्सान्दीपनेः पुत्रमर्पयामासकेशिहा । गुरवेयत्प्रतिज्ञातं सतस्मादनृणोऽभवत्
एवंसान्दीपनेः पुत्रंदृष्ट्वात्रपुनरागतम् । नागरास्तत्रराजाच विस्मयंपरमंययुः ।
तौर्वारावर्चयामासुर्मत्वादेवोत्तमोत्तमौ । सान्दीपनिरुवाचेदं तौचरामजनार्द्दनौ
इह स्थास्यति वः कीर्तिर्यावदाभूतसम्प्लवम् ।
स्थाने तु वयमेतस्मिन् स्थास्यामो यदुनन्दनौ ॥ ११० ॥
नविज्ञातौमयावीरौ यदुवृष्णिकुलोद्भवौ । नरनारायणौदेवौ देवकार्यार्थमागतौ
नात्र भूयुर्भवेत नस्यापि न दुर्गतिः । प्राप्नोत्यत्रत्रस्नातश्चेत्स्वर्गलोकेमहीयते
शङ्खिनंविश्वरूपञ्चमाधवञ्चक्रिणंतथा । चत्वारिविष्णुक्षेत्राणि अङ्कपादस्तुपञ्चमः
एषां यात्रां प्रवक्ष्यामि यथा कार्या मनीषिभिः ।
मन्दाकिन्यां कृतस्नानो दृष्ट्वा रामजनार्दनौ ॥ ११४ ॥
शङ्खोद्धारे ततस्स्नात्वा प्रपश्येद् बलकेशवौ ।
स्नानं कृत्वाततः कुण्डे गोविन्दञ्च समर्चयेत ॥ ११५ ॥
चक्रिणञ्चततोदृष्ट्वा विश्वरूपंततोव्रजेत् । तस्याग्रतः कर्रीकुण्डेस्नानंकृत्वायथाविधि
पुनस्तेन प्रकारेण प्रपश्येद् बलकेशवौ ।

स्नानं कृत्वा ततः कुण्डे गोविन्दञ्च समर्चयेत् ॥ ११७ ॥
तथैव चक्रहस्तौ तौ दृष्ट्वा केशवमाव्रजेत् ।
शिप्राम्भसि नर स्स्नात्वा भक्त्या सम्पूज्य केशवम् ॥ ११८ ॥
परावृत्याङ्कपादेतु तां रात्रिंगमयेच्छुचिः । प्रातर्वैभोजयेत्तत्र पञ्चविप्रांश्चसुव्रतान् ॥
गोदक्षिणाशशङ्खिनेतु विश्वरूपायवैहयः । गोविन्दाय गजः प्रोक्तस्सर्वंदद्याच्चकेशवम्
उपोष्य द्वादशींविप्रायाङ्कपादंसमर्चयेत् । गन्धपुष्पैश्चधूपैश्चनैवेद्यैर्विविधैस्तथा ॥
श्राद्धंयःकुरुतेसर्वं तस्यपुण्यफलं शृणु । कुलानांशतमुद्धृत्य विमानैस्सार्वकामिकैः
गीतनृत्यादिभोगैश्च वैकुण्ठे सुचिरंवसेत् । पुनर्लोकमिमंप्राप्य पवित्रेजायतेकुले ॥
प्राप्नोत्यनन्तसन्तानं विष्णुलोकं पुनर्व्रजेत् ॥ २४ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डेऽङ्कपादमाहात्म्यंनामत्रयस्त्रिंशत्तमोऽध्यायः ॥ ३३ ॥

चतुस्त्रिंशोऽध्यायः

चन्द्रादित्यमाहात्म्यवर्णनम्

सनत्कुमार उवाच

अथान्यं सम्प्रवक्ष्यामि देवं त्रैलोक्यविश्रुतम् ।
चन्द्रादित्यमितिख्यातं चन्द्रादित्यार्चितम्पुरा ॥ १ ॥
यस्तंसमर्चयेद्देवं सुरासुरनमस्कृतम् । गन्धैः पुष्पैस्तथाधूपैर्नैवेद्यैर्विविधैस्तथा ॥
चन्द्रादित्यादिसालोक्यं प्रयाति सार्वकामिकैः ।
विमानैस्सूर्यसङ्काशैर्यावच्चेन्दुदिवाकरौ ॥ ३ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे चन्द्रादित्यमाहात्म्यंनामचतुस्त्रिंशत्तमोऽध्यायः ॥ ३४ ॥

पञ्चत्रिंशोऽध्यायः

करभेश्वरमाहात्म्यवर्णनम्

सनत्कुमार उवाच

करभेशंततोगच्छेद्देवदेवं महेश्वरम् । यस्य दर्शनमात्रेण कुयोनौ नैव जायते ॥ १

व्यास उवाच

करभेशकथांदेव श्रोतुमिच्छामितत्त्वतः । कथंदेवस्समुत्पन्नः करभेशेतिसञ्ज्ञित

सनत्कुमार उवाच

पुरादेवगणैस्सार्द्धं देवदेवो महेश्वरः । वनेऽस्मिन् क्रीडयामास परमाह्लादसंयुतः

क्रीडन्बहुतिथेकाले शङ्करः करभोऽभवत् । नज्ञायतेसर्वदेवैः शङ्करः करभाकृतिः ॥ ४

अन्वेषयन्तितंदेवास्ततोविस्मयसंयुताः । नपश्यन्तियदातत्र यं देवंशूलपाणिनम्

देवैःपृष्टस्ततोब्रह्मा क्वास्तिदेवोमहेश्वरः । ध्यातोऽपिब्रह्मणादृष्टो गुप्तयोगप्रभुर्हरः ॥६

देवैस्सार्द्धंततोब्रह्मा पप्रच्छगणनायकम् । नदृष्टश्शङ्करोऽस्माभिर्गतः कुत्रविनायक

कथयस्व नमस्तुभ्यं दास्यामो लड्डुकान् विभो! ।
एवमुक्तस्तदा हृष्टः प्रोवाच गणनायकः ॥ ८ ॥

करभोऽयंमहादेवो दृश्यतां विबुधोत्तमाः । श्रुत्वाचैवंवचोदेवाः प्रहृष्टाः करभंयु

ज्ञातोऽस्माभिर्महादेवो जल्पन्त इति ते स्वयम् ।
गत्वा चैव ततः सर्वे चतुर्दिक्षुस्थितास्स्वयम् ॥ १० ॥

विचिन्त्येतिकथंज्ञातः शङ्करोविस्मयंगतः । त्यक्त्वाथकारभंरूपं देवदेवोमहेश्वरः

लिङ्गमुत्पादयामास देवंयत्करभेश्वरम् । तंदृष्ट्वाथसुरास्सर्वे साष्टाङ्गंप्रणतिंस्थिता

ततः प्रभृति विख्यातश्शङ्करः करभेश्वरः ।
स्नात्वा चैव शुचिर्भूत्वा यस्तमर्चयते शिवम् ॥ १३ ॥

गन्धपुष्पैश्चनैवेद्यैः श्रृणुतेषांचयत्फलम् । सर्वमेधेषुयत्पुण्यं सर्वदानेषुयत्फलम्

ततोऽधिकं स लभते नात्र कार्या विचारणा ॥ १५ ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे करभेश्वरमाहात्म्यंनामपञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

षट्त्रिंशोऽध्यायः

गणेशमाहात्म्यवर्णनम्

सनत्कुमार उवाच

लड्डुकैश्चततोदेवैर्विघ्ननाथस्समर्चितः । तदाप्रभृतिविख्यातो विघ्नेशोलड्डुकप्रियः

यस्समर्चयतेभक्त्या तस्यविघ्नंनजायते । तस्मैददातिसन्तुष्टस्सर्वकामान्विनायकः

नक्ताहारश्चतुर्थ्यांच स्नात्वाशिप्रांविशेषतः । रक्ताम्बरधरोभूत्वा रक्तपुष्पैर्विनायकम्

रक्तचन्दनतोयेन मन्त्रैस्स्नपनपूर्वकम् । चन्दनेनापिरक्तेन तंविलेप्य प्रपूजयेत् ॥ ४

धूपंदद्यात्तथादिव्यं सुगन्धलड्डुकप्रियम् । नैवेद्येलड्डुकादंयाआज्यखण्डपरिप्लुताः

नतस्यजायतेव्यास भयंविघ्नं कदाचन । लभतेचतथाभीष्टं मृतश्शिवपुरंव्रजेत् ॥ ६

अवतीर्णः पुनर्लोके जायतेवसुधाधिपः । मतिमान् पुत्रवाञ्छूरो नात्रकार्याविचारणा

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे गणेशमाहात्म्यंनामषट्त्रिंशोऽध्यायः ॥ ३६ ॥

सप्तत्रिंशोऽध्यायः

सोमेश्वरादिवर्णनम्

सनत्कुमार उवाच

कुसुमेशंसुरद्वारे सुरासुरनमस्कृतम् । श्रद्धयापूजयेद्यस्तु शिवलोके स मोदते ॥ १ ॥
जयेश्वरन्तुयः पश्येद्देवदेवंमहेश्वरम् । जयीस्यात्सर्वकार्येषु शिवलोकंसगच्छति ॥
शिवद्वारेशिवलिङ्गमर्चयेन्मानवोयदि । त्रिदिवंयातियानेन गाणपत्यञ्चविन्दति ॥
अथान्यं सम्प्रवक्ष्यामि मार्कण्डेश्वरमुत्तमम् ।
मार्कण्डेयो मुनिर्यत्र तप्तवान्सुमहत्तपः ॥ ४ ॥
दृष्ट्वा तंशङ्करं देवं वाजपेयफलंलभेत् । सर्वपापविशुद्धात्मा चिरायुर्जायतेनरः ॥
शृणु व्यास!महास्थानमस्यां पुर्यां समुत्तमम् ।
यत्र तिष्ठति सा देवी ब्रह्माणी हंसवाहिनी ॥ ६ ॥
भक्तानांपूरयेदाशांपुत्रवत्परिपालयेत् । यथा माता तथादेवी दृष्टाशान्तिपरैरपि ॥ ७
अर्चिताब्रह्मणासातु स्तुतादेवीसुरोत्तमैः । अर्चयेद्गन्धपुष्पैश्च नैवेद्यैस्सर्वसिद्धिदाम्
अपियाब्रह्मणःपूर्वमभूद्देवीसुसिद्धिदा । यस्स्नात्वाब्रह्मसरसिपश्येद्ब्रह्मेश्वरंशिवम्
भवबन्धविनिर्मुक्तो ब्रह्मलोकेसमोदते । अथान्यत्सम्प्रवक्ष्यामि यज्ञवापीमनुत्तमाम्
यत्रवैब्रह्मणापूर्वमिष्टोयज्ञस्सदक्षिणः । यज्ञार्थंयत्कृतंकुण्डं यज्ञवापीचसास्मृता ॥
पशुश्च पातितो यस्मात्तस्मात्पशुपतिःस्मृतः ।
तस्यां स्नात्वा शुचिर्भूत्वा पश्येत्पशुपतिं तु यः ॥ १२ ॥
उद्धरेत्सपितॄन्व्यास! पशुयोनिगतानपि । सुवर्णमणिमुक्ताढ्यैर्विमानैस्सर्वकामगैः
याति रुद्रपुरं दिव्यंयत्रदेवोमहेश्वरः । रूपकुण्डे नरस्स्नात्वा सुरूपोजायतेतथा १४
स्वर्गे सदैव गन्धर्वैस्स्पृहणीयवपुर्भवेत् ।
कुण्डेस्नात्वाऽप्यनङ्गे यश्शुचिर्भूत्वा समाहितः ॥ १५ ॥

पश्येच्च देवदेवेशमनङ्गेनार्चितम्पुरा । कामंसलभतेऽभीष्टं मृतोयाति शिवालयम् ॥
आषाढेतुसिताष्टम्यां जागरंयस्तुकारयेत् । केदारेयत्फलंप्रोक्तं तत्समानमवाप्नुयात्
करीकुण्डे नरस्स्नात्वा विश्वरूपन्तुयोर्चयेत् ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ १८ ॥
अजागन्धेनरः स्नात्वा दृष्ट्वाब्रह्मेश्वरंशिवम् । ब्रह्महत्यासमंपापं तत्क्षणात्सव्यपोहति
चक्रतीर्थेनरस्स्नात्वा चक्रस्वामिनमर्चयेत् । जायतेसनरोव्यास! चक्रवर्तीसदाभुवि
सिद्धेश्वरञ्च यः पश्येत् स्नात्वा सुविधिपूर्वकम् ।
कामिकेन विमानेन रुद्रलोकं स गच्छति ॥ २१ ॥
सोमवत्यांनरस्स्नात्वासोमेश्वरमथार्चयेत् । सोमवन्निर्मलोभूत्वासोमलोकेसमोदते

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे सोमेश्वरादिवर्णनंनामसप्तत्रिंशत्तमोऽध्यायः ॥ ३७ ॥

अष्टत्रिंशत्तमोऽध्यायः

सोमवतीतीर्थमाहात्म्यवर्णनम्

व्यास उवाच

तीर्थंसोमवतीनाम लिङ्गंसोमेश्वरंतथा । अभूदेतत्कथंनाम श्रोतुमिच्छामितत्त्वतः ॥

सनत्कुमार उवाच

शृणुव्यासयथोत्पन्नं सोमतीर्थंसुशोभनम् । सोमेश्वरंतथालिङ्गमेतत्सत्यंवदामिते
यो देवो भगवान्सोमो लोकस्याप्यायनं परम् ।
आसीत्तस्य पुरा व्यास! पिता विप्रो महातपाः ॥ ३ ॥
अवन्त्याञ्च महाभागो योऽत्रिनामातपोनिधिः ।
वर्षाणां त्रीणि दिव्यानि सहस्राणि तपो महत् ॥ ४ ॥

ऊर्ध्वबाहुस्सवैतेपे ब्रह्मध्यानपरायणः । ऊर्ध्वंगतंततोव्यास ब्राह्मंतेजोमहात्मनः ॥
नेत्राभ्यांतस्यसुस्राव काशयंश्चदिशोदश । तेजस्तत्सहसादृष्ट्वा ततोदेशोद्भवंस्वतः ॥
दिशश्च तद्यदा व्यास! सर्वान्धर्तुमशक्नुवन् ।
सुस्राव च तदा दिग्भ्यस्तद्धितेजोऽतिदुस्सहम् ॥ ७ ॥
लोकांश्चभासयन्सर्वान् धरण्यांवैपपातह । सोमोजातस्ततस्तेनशीतांशुश्चजनप्रियः
सरित्सोमासमुत्पन्ना व्यासतेनैवतेजसा । प्रविष्टासानदींशिप्राममृतेनातिपूरिता ॥
ततस्सोमवती शिप्रा विख्याता ह्यतिपुण्यदा ।
सोमयुक्तां नदीं शिप्रां दृष्ट्वा पापं व्यपोहति ॥ १० ॥
ख्याताचत्रिषुलोकेषु पापिनांपुण्यदायिनी । ब्रह्महावासुरापोवास्तेयोवागुरुतल्पगः
चत्वारोऽप्यत्रपापेन मुच्यन्तेदर्शनाद्ध्रुवम् । अमासोमौयदायुक्तौसोमवत्यांतदामुने
स्नानंदानंचयोधीमाञ्जपहोमंसमाचरेत् । अक्षयंतस्यतत्सर्वं यावच्चन्द्रदिवाकरौ ॥
तिलोदकप्रदानेनपिण्डदानेनकालिज! । अकालेकालिकींतृप्तिं पितृणाञ्चयथोदिता ॥
सर्वत्रदुर्लभाशिप्रा सोमस्सोमग्रहस्तथा । सोमेश्वरस्सोमवारस्सकाराःपञ्चदुर्लभाः
शिप्रासोमजलंव्यास कोटितीर्थफलप्रदम् । अमासोमसमायोगेपितृतीर्थसमंस्मृतम्
अमायांसोमवारश्चेद्व्यतीपातोयदाभवेत् । शतगुणंगयायास्तुसोमवत्यांप्रकीर्तितः
एवंसोमवतीतीर्थं जातमत्रमहामुने! । सोमंदृष्ट्वाथपतितं क्षितौब्रह्माजगद्गुरुः ॥
रथे तं स्थापयामास लोकानां हितकाम्यया ।
स तु वेदमयो व्यास! धर्मज्ञस्सत्यसङ्ग्रहः ॥ १६ ॥
युक्तोवाजिसहस्रेण ब्रह्मणाप्रेरितस्तदा । दृष्ट्वासोमंततोदेवा रथे तंब्रह्मणायुतम् ॥
तुष्टुवुस्सर्वभावेन हृष्टाः सर्वे समाहिताः ।
तस्य संस्तूयमानस्य तेजस्सोमस्य भास्वरम् ॥ २१ ॥
आप्यायमानं त्रीँल्लोकान् पापतधरणीतले । ब्रह्मातेनरथेनाथ सागरान्तांवसुन्धराम्
त्रिःसप्तकृत्वोतिशयाच्चकारसप्रदक्षिणम् ।तस्ययत्पतितंतेजोव्याससोमस्यशीतलम्
तदेवौषधयोदिव्याजाताभुविसुनिर्मलाः । याभिर्धार्योह्ययंलोकः प्रजाश्चैवचतुर्विधाः

तुष्टोऽथभगवान्सोमो जगतस्सर्वदोमुने! । दशवर्षसहस्राणि तेपेऽतिदुस्सहंतपः
ततस्तस्मैददौस्वाम्यंब्रह्मालोकपितामहः । बीजौषधीनांविप्राणांसोमोराजाबभूवह
सप्तविंशतिसोमाय दाक्षायण्योमहाव्रताः । पत्न्यःप्राचेतसोदक्षोददौनक्षत्रसञ्ज्ञकाः
सतत्प्राप्यमहद्राज्यं सोमोभार्यायुतस्तदा । समारेभेराजसूयं सहस्रशतदक्षिणम् ॥
होताचभगवानत्रिरध्वर्युर्भगवान्भृगुः । हिरण्यगर्भश्चोद्गाता ब्रह्माब्रह्मत्वमेयिवान् ॥
सदस्यो भगवान् विष्णुस्सनकादिमुखैर्वृतः ।
ददौ स दक्षिणां सोमस्त्रीँल्लोकान्सुसमाहितः ॥ ३० ॥
सिनीवालीकुहूश्चैव द्युतिः पुष्टिः प्रभावसुः ।
कीर्तिर्धृतिश्च लक्ष्मीस्तं देव्यो दिव्यास्सिषेवरे ॥ ३१ ॥
प्राप्यावभृथमव्यग्रस्सर्वदेवर्षिपूजितः । अतीवराजतेचन्द्रो दश प्रोद्भासयन्दिशः ॥
तस्य तत्प्राप्य दुष्प्राप्यमैश्वर्यमृषिसंस्कृतम् ।
विबभ्राम मतिर्व्यास! तदामृतमयस्य च ॥ ३३ ॥
बृहस्पतेस्तदा भार्यां तारानाम्नीं यशस्विनीम् ।
जहार तमसा साध्वीमवमान्याङ्गिरस्सुतम् ॥ ३४ ॥
वाच्यमानस्तदा सोमो देवैर्देवर्षिभिस्तथा ।
नैव व्यसर्जयत्तारां तस्मा आङ्गिरसाय च ॥ ३५ ॥
बृहस्पतेस्ततः पक्षं शक्रोजग्राहकोपतः । सहिशिष्योमहातेजाः पितुः पूर्वं बृहस्पतेः
ततोयुद्धमभूत्तत्र सुघोरंशक्रसोमयोः । देवानां दानवानाञ्च व्यासत्रासङ्करंमहत्
सर्वेभीतास्ततोदेवा ब्रह्माणंशरणंगताः । अग्रतोब्रह्मणोयुद्धं कथितंसोमशक्रयोः
देवानांवचनं श्रुत्वा सार्द्धंदेवैः पितामहः । आगत्य युद्धसमयेऽवारयद्देवदानवान् ॥
वारितास्ते स्थितास्तत्र युद्धं त्यक्त्वा सुरासुराः ।
तारामादाय स तदा ददावाङ्गिरसे द्विजः ॥ ४० ॥
ताञ्चसप्रसवां दृष्ट्वा आहभार्यांबृहस्पतिः । अन्यदीयोनतेयोन्यां गर्भोधार्यःकथञ्चन
उत्ससर्जततस्तारां कुमारंदेवरूपिणम् । ऐषिकास्त्रंसमादाय ज्वलन्तमिवपावकम्

स तेजो जातमात्रोऽपि देवानामाक्षिपद्यशः ।

ततस्संशयमापन्ना ऊचुस्तारां दिवौकसः ॥ ४३ ॥

कस्यायं ब्रूहिसुभगे!सोमस्याथबृहस्पतेः । नाचचक्षेदेवतानां वेधाः पप्रच्छताम्पुनः

यदत्रसत्यंतद्ब्रूहि तारे!कस्यसुतोह्ययम् । साप्राञ्जलिरुवाचेदं ब्रह्माणं वरदं विभुम्

सोमस्येति महासौम्यः कुमारो देवसन्निभः ।

सोमस्य तं सुतं ज्ञात्वा परिष्वज्य पितामहः ॥ ४६ ॥

बुधइत्यकरोन्नाम तस्यपुत्रस्यवैतदा । परदारापहाराच्च यत्पापं तनुदुस्सहम् ॥ ४

तेनसोमोऽभवत्कुष्ठीक्षयरोगयुतस्तदा । ततोराज्येस्वकं पुत्रंस्थापयित्वायथाविधि

अवन्तीमाजगामाशु सोमोदेवदिदृक्षया । सोमाहे सोमवत्याश्च अमायोगेजितेन्द्रियः

स्नात्वा सम्पूजयामास सोमस्सोमेश्वरं ततः ।

तस्य भक्त्या च सन्तुष्टः प्राह सोमं महेश्वरः ॥ ५० ॥

मत्प्रसादाद्वपुः कान्तं तव सोम!भविष्यति ।

सोमेश्वरमितिख्यातं भुक्तिमुक्तिप्रदायकम् ॥ ५१ ॥

एवंतुव्यास!तत्तीर्थं लिङ्गं चैवातिदुर्लभम् । कथितंतथ्यभावेन मयातुष्टेनसाम्प्रतम्

श्रावणं प्राप्य यो मासं सोमनाथं जितेन्द्रियः ।

नित्यं पश्येन्नरोव्यास! तस्यपुण्यफलं शृणु ॥ ५३ ॥

सौराष्ट्रे सोमनाथस्य पूजायाः प्रत्यहं फलम् ।

लभते स नरो व्यास! नात्र कार्या विचारणा ॥ ५४ ॥

इति श्रीस्कान्दे महापुराण एकाशीति साहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे सोमवतीतीर्थमाहात्म्यंनामाऽष्टत्रिंशत्तमोऽध्यायः ॥ ३८ ॥

एकोनचत्वारिंशोऽध्यायः

नरकेश्वरनरकतीर्थमाहात्म्यवर्णनम्

सनत्कुमार उवाच

तार्शस्यनरकस्यास्य माहात्म्यंशृणुसाम्प्रतम् । तीर्थेचनरकेस्नात्वादृष्ट्वादेवंमहेश्वरम्

न पश्येन्नरकं क्वाऽपि यद्यपि ब्रह्महा भवेत् ।

व्यास उवाच

कियन्तो नरकास्तात! कस्मिन्स्थाने प्रतिष्ठिताः ॥ २ ॥

पतन्तिकेनपापेन पापिनस्तेषुदुःखिताः । तत्कथंप्राणिनस्तत्रगच्छन्तिपापकारिणः

एतत्सर्वं समाख्याहि यदि तुष्टोऽसि मे प्रभो! ॥ ४ ॥

सनत्कुमार उवाच

शृणुष्वनरकान्व्यास! यावन्तोयत्रसंस्थिताः । नलभ्यन्तेयथातेतु सत्यमेतद्वदामिते

पातालनिलयास्सर्वे विख्याता दुःखदास्सदा ।

पुण्यप्लावेन ते सर्वे तिर्यग्यान्ति स्वकर्मभिः ॥ ६ ॥

रौरवश्शूकरोरौद्रस्तालोविनशकस्तथा । तप्तकुम्भस्तुतप्तायो महाज्वालस्तथैव च

कुम्भीपाकः क्रकचनस्तथा चैवातिदारुणः ।

कृमिभुक्तिश्च रक्ताख्यो लालाभक्षश्च गण्डकः ॥ ८ ॥

अधोमुखश्चास्थिभङ्गो यन्त्रपीडनकस्तथा । सन्दंशोरुधिराङ्गश्च असिपत्रकुभोजनौ

इत्येवमादयस्सर्वेनरकाभृशदारुणाः । यमस्यविषयेसन्ति श्रुता हि भयदायिनः १०

पतन्तिपुरुषास्तेषु पापकर्मरताश्चये । पतिताश्चप्रपच्यन्ते नराः कर्मानुरूपतः ॥ ११

यातनाभिर्विचित्राभी रौद्रकर्मक्षयोभृशम् । सुगाढंहस्तयोर्बद्ध्वा तप्तशृङ्खलयानराः

महावृक्षस्यशृङ्गेषु लम्ब्यन्ते यमकिङ्करैः ।

शोचन्तः स्वानि कर्माणि तूष्णीं तिष्ठन्ति निश्चलाः ॥ १३ ॥

अग्निवर्णैः शङ्कुभिश्च लोहदण्डैस्सकण्टकैः ।
हन्यन्ते किङ्करैर्घोरैस्समन्तात्पाकारिणः ॥ १४ ॥

ततःक्षणात्प्रतप्यन्तेवह्निना चविशेषतः । समन्ततः प्रक्षिप्यन्ते कृत्ताश्चजर्जरीकृताः
कूटसाक्ष्यंतथासम्यक् पक्षपातेनयोवदेत् । यश्चान्यदनृतंब्रूयात्सनरोयातिरौरवम् ॥
सुरापोब्रह्महा हर्ता सुवर्णस्यचशूकरम् । प्रयान्तिनरकञ्चैव तैस्संसर्गमुपैति यः १७
भ्रूणहागुरुहन्ताच गोघ्नश्चमुनिसत्तम! । यान्त्येते नरकं रौद्रं ये च विश्वासघातकाः
स्वर्णस्तेयीचवैताले तथैवगुरुतल्पगः । करोतिकर्मवैनिन्द्यं यश्चगाः प्रतिषेधयेत्
नरोविनशकेयाति नरकेभृशदारुणे । स्वामिद्रोहीच योरौद्रस्तप्तकुम्भेसपात्यते ॥
तप्तलोहेषुपच्येत यस्तुभक्तंपरित्यजेत् । स्नुषांसुताञ्चयोगच्छेन्महाज्वालेसपात्यते
कुम्भीपाकेप्रयात्येव पादैरूर्ध्वैरधोमुखः । देवदूषयितारश्च वेदविक्रयकास्तथा ॥ २२
परस्त्रीगामिनोयेच यान्तिककचनेतुते । चौरोऽतिदारुणेयाति मर्यादाभेदकस्तथा
देवद्विजपितृद्वेष्टा रत्नदूषयिताच यः । सयातिकृमिभक्षेवै रक्ताख्येच पतन्तिवै ॥ २४
पितृदेवगुरूणाञ्च सपर्यां न करोति यः । लालाभक्षेसयात्युग्रे कूटकर्मकरोतियः
अन्त्यजेभ्योग्रहीताच नरकेयात्यधोमुखे । अस्थिभङ्गेप्रयात्येव एकोमिष्टान्नभुङ्नरः
कृतघ्नः पिशुनः क्रूरः कूटमानीविडम्बकः । यन्त्रपीडनके याति परगुह्यप्रकाशकः ॥
लाक्षामांसरसानाञ्च तिलानाञ्चरसस्यच । विक्रयीब्राह्मणोयाति सन्दंशेनात्रसंशयः
मधुहाग्रामहन्ताच यातिवैतरणींनदीम् । वर्णाश्रमविरुद्धंच कर्मकुर्वन्तियेनराः ॥ २६
कर्मणामनसावाचा महानद्यांप्रयान्तिते । गुरूणामवमन्ताच शास्त्रदूषयिताचयः ॥
असिपत्रेप्रयात्येव तथापर्वविलङ्घकः । धनयौवनमत्तायै मर्यादाभेदिनो नराः ॥ ३१
ते यान्ति नरके घोरे असिपत्रे तिदारुणे । असंस्कृतश्चयो विप्रो वृषलांसेवतेऽतुवै
वृषलीमिथुनाच्चैव पततस्तावुभावपि । उच्छिष्टायेस्पृशन्तीह गामग्निजननींद्विजान्
तेपच्यन्तेकुभोज्येहि मित्रद्वेषीविशेषतः । पङ्क्तिभेदंदिवास्वप्नं येनराब्रह्मचारिणः
पुत्रैरध्यापितायेवै तेपतन्तिकुभोजने । एतेचान्येच नरकाः शतशोऽथसहस्रशः ।
तत्र दुष्कृतकर्माणः पच्यन्ते यातनागताः ।

नृणां स्वर्गाश्च यावन्तस्तावन्तो निरयास्तथा ॥ ३६ ॥
पापं कृत्वा तु बहुलं प्रायश्चित्तपराङ्मुखाः ।
कृते पापे च वै तापो यस्य पुंसः प्रजायते ॥ ३७ ॥

प्रायश्चित्तन्तुतस्यैकं शिवसंस्मरणंपरम् । तस्मादहर्निशंशम्भुं संस्मरन्पुरुषोत्तमम्
नयातिनरकंशुद्धस्सङ्क्षीणाखिलपातकः । कार्त्तिकस्यासितेपक्षे याभवेच्चचतुर्दशी
तस्यां दीपः प्रदातव्यो देवदेवस्य चाग्रतः ॥ ४० ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
नरकेश्वरनरकतीर्थमाहात्म्यं नामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

चत्वारिंशोऽध्यायः

दीपदानमाहात्म्येशिवशिवासम्वादवर्णनम्

व्यास उवाच

दीपेऽस्मिन्यत्फलंदत्तं विधिनायेनदीयते । तत्सर्वंब्रूहिमेतात!दीपोत्पत्तिञ्चशोभनम्

सनत्कुमार उवाच

पुराकृतयुगेशम्भुः पार्वतींशङ्करोयदा । अभिप्रयाचितुंयातस्तयापिसोऽभियाचितः

पार्वत्युवाच

शरीरेकृष्णताशम्भो ममास्तेरूपहारिणी । तस्माद्याचेभृशंशम्भोप्रसीददिव्यलोचन
भवेनवर्णितासावैअतीवशोभनामम । लोचनेपक्ष्मपङ्क्त्येव शोभतेऽतितरांसदा
सिताब्जसंस्थितो भृङ्गो यथा शोभयते च तम् ।
तया तथा याचितोऽसौ धूर्जटिर्वृषभासनः ॥ ५ ॥

विरूपरूपकर्ता त्वं नश्रृणोषिवचोयदा । तदात्वहंसुवैराग्याच्चरेयं दुष्करंतपः ॥
भवस्तयापि चोक्तस्तु तस्या वै पाणिमग्रहीत् ।

कदाचिच्छङ्करो देवो रतिं याचितवान् प्रियाम् ॥ ७ ॥

रतिंदत्तवतीसातु जहासनामकीर्तयन् । सुदुःखिताभवत्सातु तंविहायपराङ्मुखी
उवाचरोषसंयुक्ता स्मरन्तीदेवभाषितम् । तपोवनंव्रजाम्यद्य सुगौरत्वोपलब्धये ॥
सुवर्णरूपरूपिणी यदा पुनर्भवामि चेत्तदातवानुरागिणी भवामि चैव नान्यथा ॥१०
इतीदमेव जल्पती जगाम विन्ध्यपर्वतं हरश्शुशोच तां ततो गताक्व साविहाय माम्
स्मरत्तदेव चेष्टितं यदेव पूर्वभाषितं तदैव मे वृथामतिर्मुदा यदा नमानिता॥
यतोमया हिमाद्रिजा समस्तलोकसुन्दरी पुरैवनाभिनन्दितागताविहायमामिति ॥
इतीदमेव सोऽवदद्गतस्त्वदर्शनं ततः प्रियावियोगमीदृशं गुरुंनसोढुमुत्सहे ॥ १४
ततोजगत्तदाभवन्महाभयेनसंयुतम् सुरासुरामहर्षयः परंविषादमभ्ययुः ॥ १५
विहायमन्दिराणितेपरंविषादमागताः । हरेस्तुतिंपराश्चतेप्रचक्रुरद्भुतोपमाम् ॥ १६

सनत्कुमार उवाच

नदृश्यतेयदारुद्रो देवोबालेन्दुशेखरः । नष्टालोकं जगत्सर्वं कान्तारमभवत्तदा ॥ १
त्रीणिनेत्राणि रुद्रस्य यतस्सूर्येन्दुवह्नयः । गतेरुद्रे न ते भान्ति जगत्यस्मिंश्चराचरे

ततस्तमसि दुस्तारे सम्भूते लोमहर्षणे ।
अन्योन्यं हि न पश्यन्ति सुरा दैत्यास्तमोवृताः ॥ १९ ॥

एषाबुद्धिस्ततस्तेषामुत्पन्नाकार्यसिद्धये । ययाबुद्ध्याजगन्नाथो ज्ञायतेपार्वतीपतिः
नष्टालोकोविनातेनशशिसूर्याग्निचक्षुषा । परस्परंब्रुवन्तिस्मदुःखितास्तेविसञ्ज्ञया
हेदेव!हेमुने!सिद्ध हेऋषे हेनिशाचर! । हेदैत्यहेदनुश्रेष्ठ! हेमनुष्यनिदेशक! ॥ २

गतोऽसि कां दिशं तात ! को वा लब्धस्त्वया विभो! ।
क्व च विश्रामभूमिस्ते किंस्विदालम्बनंतव ॥ २३ ॥

पाथेयमस्ति किञ्चित्तेदैशिकोवाथकुत्रचित् । प्रकाशं वाहनं छत्रमशनं शयनं गृहं

क्व च वासः कथं ते चाप्यथवा चित्तनिर्वृतिः ।
बन्धुः पुत्रोऽस्ति वा तात वृक्षच्छाया सुशीतला ॥ २५ ॥

एवंप्रकारंकरुणं समाभाष्यपरस्परम् । भूयश्चिन्तापरास्सर्वे देवाश्चेन्द्रपुरोगमाः

भूमेर्विवरमाश्रित्य प्राणिनोयेवसन्त्यपि । रसातलेचदैतेयास्संस्थिताः पन्नगाश्चये
नतेषांविद्यतेसूर्योनेन्दुर्नान्येमहाग्रहाः । नाग्निर्दैवमुखंविद्युन्नैव तारककोटयः ॥ २८

केनालोकेन पश्यन्ति समानि विषमाणि च ।
नरकस्था नरा लोकं केन पश्यन्त्यलोकनात् ॥ २९ ॥

विचरंस्तु सनःकोवा मनोरथशतप्रदः । तृष्णाम्भः क्षुधितान्नञ्च श्रान्तानामथवाहनम्
श्रमे शयाजलेनौश्च रागेसत्परिचारकः । श्रेष्ठौषधिरसद्रोगे सम्पदोव्याधिसङ्कटे ॥
सुहृद्विदेशेछायोष्णेनिर्धूमशिशिरेशिखी । महाभयेपरित्राणं प्रकाशश्चमहानिशि ॥
सर्वदाचैवसर्वेषां मनोरथशतप्रदः । एकएवभवेद्योनस्तन्नजानीमहे वयम् ॥ ३३ ॥
ब्रुवन्तस्त इतिव्यास!शुश्रुवुर्मधुरांगिरम् । श्रुतपूर्वांनभोमध्याद्विष्णोरतुलकर्मणः ॥

न जानन्ति स्थितः कुत्र भाषते केशवो विभुः ।
शृणुध्वमिति मे वाक्यं सर्वे चैव समाहिताः ॥ ३५ ॥
दानमेकं सदा सम्यक् चिन्तामणिसमं स्मृतम् ।
सर्वेषामेव दानानां दीपदानं प्रशस्यते ॥ ३६ ॥

तच्चदेयमतःसर्वे शृणुध्वंतत्त्वतोभृशम् । मयारसातले पूर्वं नागानामनुकम्पया ॥ ३७
उत्पादितोदीपवरो येनध्वस्तमिदंतमः । एवंभूतस्तुवायूनामप्रधर्ष्योमहाप्रभः ॥

निष्कम्पो निर्मलो हृद्यःसुन्दरो भास्करप्रभः ।
नात्युष्णो नातिशीतश्च दिव्ययोगसमुद्भवः ॥ ३९ ॥

तेर्दीपप्रकाशेनगोकर्णान्निर्वृतिंययुः । नागा शेषादयः सर्वे नोद्यमानाश्चसङ्घशः ४०
तदादीपसहस्राणिददुस्तेवैशिवाग्रतः । पर्वतेषुसमुद्रेषु वनेषूपवनेषुच ॥ ४१ ॥
नदीतीरेषु सर्वत्र दीपान्प्रज्वाल्यरेमिरे । भुञ्जानाः फलमूलानि दिव्यानीक्षुरसंतथा
परमान्नञ्च मांसानि मकरन्दं घृतोदनम् । चन्द्रशालिभवंभक्तं ताम्बूलंसत्सुधागतम्
मद्यमष्टप्रकारंतु भार्यापीतावशेषकम् । शयनेषु महार्हेषु हृद्यासु वनराजिषु ॥ ४४ ॥
वृक्षमूलेषुसर्वेषु वनच्छायोपशोभिषु । रमन्तेस्मचतेसर्वेउद्वेष्टन्तःपरस्परम् ॥ ४५ ॥

कामतन्त्रोपदिष्टैस्तु चेष्टितैश्चुम्बनादिभिः ।

सूर्यतापभयान्मुक्ताश्चन्द्ररश्मिभयाच्च ते ॥ ४६ ॥
विमुक्ताश्च भयाद् घोरात् पिपीलिकोद्भवात्तथा ।
सूर्यतापेन दाहःस्याच्छीतं चन्द्रमरीचिभिः ॥ ४७ ॥
मयूरनकुलाद्यैश्च पिपीलीसरणाद्भयम् । सौवर्णान्दीपकान्कृत्वाद्विजेभ्यस्तेददुःपुनः
तेन पातालमाश्रित्य कृत्वा भोगवतीम्पुरीम् ।
वसन्ति सुखिनस्तत्र स्वर्गादष्टगुणान्सदा ॥ ४६ ॥
एवमन्धतमोदेवाः पातालाद्दीपतोगतम् । एतद्गुह्यंमयाख्यातं भवतांचानुकम्पया ॥
दीपदानमतो यूयं कुरुध्वं सुसमाहिताः ।
दीपाग्निना विना नैव तमो दारु प्रदह्यते ॥ ५१ ॥
नारायणपरादेवा निशम्याथ समाहिताः । पप्रच्छुस्तेपुनः सर्वे हृष्टादामोदरम्विभुम्
ब्रूहि नोग्निं जगन्नाथ! सदीपोयेन जायते । घोरेतमसिवैमग्ना नाग्निंजानीमहेवयम्
देवानांमानसोवह्निरथकृष्णो न कीर्तितः । तेनदीपं च प्रज्वाल्य देवाःशिवपरायणाः
ददुस्ते शिवमुद्दिश्य सर्वाभीष्टफलप्रदम् ।
दत्ते दीपे ततो देवैर्नष्टो हृष्टो महेश्वरः ॥ ५५ ॥
तिमिरंतद्गतश्चापि जगद्येनजडीकृतम् । ततोदेवाः सुखम्प्रापुः स्वर्गेसेन्द्रपुरोगमाः
दीपदानफलं ज्ञात्वा दैतेयाश्चापि विस्मिताः ।
राज्यं भोगान्वितम्प्राप्य सार्द्धं स्त्रीभिश्च रेमिरे ॥ ५७ ॥
तथैवतत्फलंज्ञात्वा व्यास!यक्षाश्चविस्मिताः । पूजयित्वामहादेवंपुष्पैश्चनिर्मलेर्जलैः
ददुर्दीपसहस्राणि सर्वेशिवपरायणाः । स्वस्थानेचाभवन्सर्वे दीपदानाच्चशोभनात्
स्वेच्छया भुञ्जते भोगान् बन्धुभृत्यादिसंयुताः ।
निराहारास्ततो व्यास! पिशाचा वै निराश्रयाः ॥ ६० ॥
दीपदानफलंज्ञात्वा सर्वे तेपरिविस्मिताः । चाण्डालादग्निमानीय ददुर्दीपंशिवेरताः
दीपदानफलात्तेवै पुत्रदारसमन्विताः । लिह्यमानंगतरसं पूतिपर्युषितं तथा ॥ ६२ ॥
उच्छिष्टं सूतिकास्पृष्टममेध्यश्चातिलङ्घितम् ।

भुञ्जानास्ते सदाहृष्टा रमन्ते दुष्टभूमिषु ॥ ६३ ॥
विद्याधरास्तथामर्त्याः सिद्धाश्चशिवमानसाः । दीपदानफलंज्ञात्वाददुर्दीपंशिवाग्रतः
दीपदानात्ततःसर्वे सर्वभोगसमन्विताः । स्थानेषुमुदिताःस्वेषु रमन्ते सुखिनः सदा
तिमिरंतद्गतञ्चैव व्यास!लोकेषुदीपतः । ततोघोरंस्थितंसम्यक् प्रेतलोकेषुसर्वदा
प्रेतलोकंतदा दृष्ट्वा घोरेणतमसावृतम् । दामोदरंजगन्नाथमूचुः सर्वे सुरोत्तमाः ॥
घोरञ्चैवतमोहत्वाप्रसन्नास्तेसदाविभो । गन्धर्वाश्चतथायक्षाः सिद्धाविद्याधरोरगाः
वयञ्चैवतथामर्त्याःसर्वेभोगैश्चसंयुताः । स्थानेषुच सदास्वेषु रमन्ते सुखिनोभृशम्
प्रेतलोके नरायेवै घोरेणतमसावृता । वसन्ति च जगन्नाथ ! वर्तन्तेश्चातिदुःखिताः
नतैःकृतंशुभंकर्म कृष्णालंपापमोहितैः । नतेषां विद्यतेकिञ्चिद्यत्प्रकाशंकरोति च ॥
घोरेतमसितेमग्नास्तत्रनार्केन्दुवह्नयः । नसहायोनजायेयं नालम्बोनच दैशिकः ॥
न वाहनं न शय्या च केवलं तु महत्तमः ।
तत्राष्टाऽविंशतिः ख्याता घोरा नरकभूमयः ॥ ७३ ॥
तमोमयाश्च ता सर्वाः पापिनां भयदाः सदा ।
सुखं तत्र कथं कृष्ण! लभन्ते दुःखिता नराः ॥ ७४ ॥
दारिद्र्य दुःखरोगैश्च मायामोहैश्च सर्वदा ॥ ७५ ॥

सनत्कुमार उवाच

इतिश्रुत्वातु देवानां प्रार्थनांगरुडध्वजः । उवाचवचनंहृद्यं मनोरथफलप्रदम् ॥
शृणुध्वं त्रिदशास्सर्वे यत्प्रवक्ष्यामिवोवचः । अवन्त्यांवर्ततेतीर्थं सद्यःपापहरंपरम्
अनर्काख्यंमहापुण्यंसर्वतीर्थोत्तमोत्तमम् । कार्त्तिकस्यासितेपक्षेचतुर्दश्यांसमाहितः
तत्र स्नात्वा नरो यस्तु यमध्यानपरायणः ।
संगृह्य वै तिलान्कृष्णान् पितृभक्तो जितेन्द्रियः ॥ ७६ ॥
दक्षिणाभिमुखोभूत्वा मध्याह्नेसुरसत्तमाः !। अपसव्यंतथाभूत्वा मन्त्रैःसन्तर्पयेद्यमम्
यमाय धर्मराजाय मृत्यवेचान्तकायच । वैवस्वताय कालाय दक्षाय मनवेतथा ॥
कृष्णाय कृष्णगुप्ताय प्रेतलोकपरायच । हरयेरविपुत्राय कालिन्दीसोदराय च ॥

तथा वै श्राद्धदेवाय पितॄणां पतये तथा।
मन्त्रैरेभिर्नमःप्रान्तैरोङ्काराद्यैस्सुशोभनैः॥ ८३॥
जलाञ्जलिंसदर्भाम्वै दद्यात्तुतिलसंयुताम्। सन्तर्पयेद्यमंदेवं तिलपात्रं समाहितः॥ प्राज्ञोविप्रायवैदद्याद्वित्तशाठ्यविवर्जितः। अनेनविधिनायस्तु तर्पयेच्चयमं विभुम् पितरस्तस्यमुच्यन्ते निरयेयेगताअपि। रात्रिंतत्राथसम्प्राप्य मानवः कीर्तिसंयुतः नमः पितृभ्यः प्रेतेभ्यो नमोधर्मायविष्णवे। नमस्सूर्यायरुद्राय कान्तारपतयेनमः एभिर्मन्त्रैर्यमंदीपं योदद्याद्घृतपूरितम्। कार्त्तिकन्तु समग्रन्तु वर्द्धन्तेतस्यसम्पदः
सम्पूर्णे कार्त्तिके चैवं दीपोद्यापनमारभेत्॥ ८९॥
दिवाकराहेऽस्तमिते च सूर्ये दीपस्य वृत्तिं पुरुषप्रमाणम्।
यूपाकृतिं यज्ञियदारुणा च करोति धीमान्यमभक्तिचित्तः॥ ९०॥
निक्षिप्य भूमावथहस्तमात्रं मूर्ध्नि द्विहस्ताष्टदलान्विताश्च।
धार्याश्चतत्रशुभपट्टिकाश्च छिद्रे प्रयुक्ताश्चतुरङ्गुलेन॥ ९१॥
तत्कर्णिकायान्तु महाप्रकाशो देयो हि दीपः परया च भक्त्या।
दिगुन्मुखा दीपवरास्तथाष्टौ दलेषु तस्याघृतपूर्यमाणाः॥ ९२॥
अनङ्गवल्ल्याङ्कितवस्त्रखण्डं नवं सुरक्तं ह्यथवा सुशुक्लम्।
वर्त्यै प्रदेयश्च ततो हि दद्यात्स्निग्धे त्वखण्डे सुसमे प्रशस्ते॥ ९३॥
तच्छालिपिष्टो परिसन्निधाय यथा न निर्याति न कम्पते च।
कृत्स्नात्प्रकार्यस्त्रिगुणप्रमाणो मध्यस्थितःस्यादथ दीपराजः॥ ९४॥
दलेषु शोभार्थमतीव कुर्यान् मनोरथप्रत्युपलब्धये च।
घण्टाष्टकं लम्बितपुष्पदामसवस्त्रशोभान्वितमत्रकार्यम्॥ ९५॥
सँल्लिप्य भूमिं त्वथ गोमयेन पुनः सुगन्धेन जलेन लिप्त्वा।
कुर्याद्विचित्रं त्वथ मण्डलञ्च दलाष्टकम्वै कमलञ्च रम्यम्॥ ९६॥
ततो जलं शीतलमानयित्वा आपूर्य चाष्टौकलशांस्तु रम्यान्।
निधाय मूर्ध्निक्रमशो हिधीमान् फलानिमूलानितथेक्षुकाणि॥ ९७॥
मध्वाज्ययुक्तादधिदुग्धपूपा नैर्ऋत्यकोणादथ दक्षिणान्तम्।
धर्माय दद्यादथ शङ्कराय दामोदरायाप्यथ वेधसे च॥ ९८॥
प्रजापतिभ्यःक्रमशो हि भक्त्या प्रेतेभ्यइन्द्राय तथा पितृभ्यः।
हेमादिपात्रं तिलपूर्णमेव दद्याद् द्विजानाञ्च सदक्षिणञ्च॥ ९९॥
गावो हिरण्यं रजतञ्च वस्त्रं फलादिमूलानि यवाश्चधान्यम्।
गृहं रथं कुञ्जरमश्वमेव मनोज्ञमन्यं हृदये हि यच्च॥ १००॥
विद्याधिकेभ्यो द्विजसत्तमेभ्यः पौराणिकेभ्यश्च तथा द्विजेभ्यः।
एकैकसम्प्रीणनमत्र कुर्याद्दीपैर्दलस्थैश्च यमादिकानाम्॥ १०१॥
धर्माय देयस्त्वथ मध्यदीप आज्ञाञ्च लब्ध्वा स्वगुरोः सकाशात्।
नृत्येन गीतेन सुशोभनेन युक्तं सुवाद्येन च कारयेच्च॥ १०२॥
एतत्समग्रं विधिवच्चकुर्यात्स्वशक्तिमादौ स्वधनं समीक्ष्य।
आहूय विप्राञ्छुभभावयुक्तान् वदेच्चधीमान्परया च भक्त्या॥
दीपान् समग्रानपि वर्जयित्वा सर्वं नयेयुः स्थितमत्र विप्राः॥ १०३॥
प्रदक्षिणीकृत्य विसृज्य विप्रांस्ततो भवेद्वै स च नक्तभोजी।
एवं कृते नागलोकाद् विशिष्टं सुखम्भवेत्प्रेतलोके स्थितानाम्॥ १०४॥
एवमेव नरो व्यास! दीपदानं करोति यः।
तस्यैव यत्फलम्प्रोक्तं तदिहैकमनाः शृणु॥ १०५॥
विमानैःकामिकैर्दिव्यैरप्सरोगणसेवितैः। उह्यमानोदिवं यातियावच्चन्द्रदिवाकरौ
इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे दीपदानमाहात्म्यं नाम चत्वारिंशोऽध्यायः॥ ४०॥

एकचत्वारिंशोऽध्यायः

रामेश्वरतीर्थमाहात्म्यवर्णनम्

सनत्कुमार उवाच

अथान्यं सम्प्रवक्ष्यामि केदारेश्वरमुत्तमम् । प्रवरं सर्वतीर्थानां सर्वलोकेषु विश्रुतम्
तत्रस्नात्वाशुचिर्भूत्वा यःपश्यतिमहेश्वरम् । केदारेयत्फलं प्रोक्तं तदत्रापिलभेन्नरः
सर्वपापविनिर्मुक्तः स्वकीयकुलसंयुतः । विमानेनार्कवर्णन शिवलोकेसमोदते ॥ ३
जटाश्रृङ्गेनरः स्नात्वा शुचिर्भूत्वाजितेन्द्रियः । दृष्ट्वा जटेश्वरं देवं ततःपापाद्विमुच्यते
महास्नपनमादौच कृत्वागच्छेच्छिवम्प्रति । मातृकंपैतृकंचैव कुलानांतारयेच्छतम्
इन्द्रतीर्थेनरः स्नात्वा दृष्ट्वाचेन्द्रेश्वरं शिवम् । विमुक्तः सर्वपापेभ्यः शक्रलोकेमहीयते
कुण्डेश्वरं तु यः पश्येच्छिवध्यानपरायणः। लभतेसनरोव्यास! शिवदीक्षाफलंशुभम्
गोपतीर्थेनरः स्नात्वा दृष्ट्वागोपेश्वरंशिवम् । शिवलोकं सवैयाति ह्यमृतादमरोयथा
स्नात्वातुचिपिटातीर्थे शिवंदेवंप्रणम्यच । तिर्यग्योनिंनरो नैव प्रयातिमुनिपुङ्गव! ॥
विजयेघनरः स्नात्वाआनन्देश्वरपूजनात् । विमुक्तःसर्वपापेभ्यःस्वर्लोकेविजयीभवेत्

अथान्यं सम्प्रवक्ष्यामि कुशस्थल्यां विनिर्मितम् ।
देवं रामेश्वरं व्यास! भुक्तिमुक्तिप्रदायकम् ॥ ११ ॥

चित्रकूटात्पुरारामो मैथिल्यालक्ष्मणेनच । अत्ररामं समागत्य पप्रच्छमुनिसत्तमम् ॥

रामोवाच

कानितीर्थानिपुण्यानि किंवाक्षेत्रंमहामुने! । यत्रगत्वानवाप्नोतिवियोगःसहबान्धवैः
अनेनवनवासेन मरणेनपितुः प्रभो । भरतस्यवियोगेन प्रतप्येऽहं त्रिभिर्मुने! ॥ १४ ॥
तद्वाक्यं राघवेणोक्तं श्रुत्वाविप्रर्षभस्तदा । ध्यात्वातुसुचिरं कालमिदंवचनमब्रवीत्
साधुपृष्टंत्वयावीर रघूणां वंशवर्धन । ममपित्राकृतं क्षेत्रं प्रयाच्यशिवमादरात् ॥

अवन्तीविषये राम पुरा तस्मिन् कुशस्थली ।

उज्जयिनीति वै नाम्ना ख्याति लोके गता विभो! ॥ १७ ॥

तस्यांगत्वादशरथं पिण्डदानेनतर्पय । सुरासुरगुरुस्तत्र महाकालोव्यवस्थितः ॥
देवःसदाशिवोराजन् वाञ्छितार्थफलप्रदः । दृष्टेतस्मिञ्जगन्नाथे वियोगोनैवजायते
तत्र गच्छन्तियेविप्रा राजानोवैमहाबलाः । लभन्तेतेपरं स्थानं यत्रदेवोमहेश्वरः ॥

तीर्थानामपि तत्तीर्थं भोविष्णोऽवन्तिमण्डले ।
आजगाम ततोऽवन्तीं सा शिप्रा यत्र पुण्यदा ॥ २१ ॥

तस्यांस्नात्वाततोरामस्तर्पयामासपूर्वजान् । महाकालं यदाद्रष्टुं प्रतस्थेरघुनन्दनः

वाण्या ततोऽशरीरिण्या देवदेवेन भाषितम् ।
भोभोराघव! भद्रन्ते स्वनाम्ना स्थापयस्व माम् ॥ २३ ॥

अत्रस्थानं मयादत्तं माविचारय राघव! । ततोहृष्टमनारामो लक्ष्मणंवाक्यमब्रवीत्
अनुगृहीतः सौमित्रे देवदेवेनशम्भुना । तस्मात्स्थापयतीर्थेऽस्मिँल्लिङ्गंरामेश्वरंशुभम्

वाक्यं तल्लक्ष्मणः श्रुत्वा स्थापयामास शङ्करम् ।
दृष्ट्वा देवं पुरो रामो लक्ष्मणं वाक्यमब्रवीत् ॥ २६ ॥

एहिलक्ष्मणशीघ्रन्त्वं शिप्रायाजलमानय । करिष्यामियतोभ्रातर्देवस्यस्नपनं शुभम्
लक्ष्मणस्त्वब्रवीद्वाक्यं सीतयाकिंकरिष्यसि । रामनाऽहंसर्वकालंदासभावंकरोमिते
इयंचदुष्टासुदृढा पावराचममाप्यतः । वद राघवसत्येन अनया किंकरिष्यसि ॥ २६
श्रुत्वापूर्वंहितद्वाक्यं लक्ष्मणेनप्रभाषितम् । विमनाराघवस्तस्थौ सीताचापिवरानना
यदुक्तंलक्ष्मणेनाथ तच्चसीताचकारह । स्नात्वाभुक्त्वाचतौवीरौ महाकालमुपागतौ
नीत्वाविभावरींतत्र गमनायमनोदधे । उत्तिष्ठवत्ससौमित्रे व्रजामोदक्षिणां दिशम्
सौमित्रिरब्रवीद्वाक्यं नाऽहं गन्ताकथञ्चन । व्रजत्वमनयासार्द्धं भार्ययाकमलेक्षण
नाहमग्रेवनं यामि नवायोध्यांकथञ्चन । एवं ब्रुवाणंसौमित्रिमुवाचरघुनन्दनः ॥
कथंपूर्वमयोध्याया निर्गतोसिमयासह । वने वसाम्यहंराम नववर्षाणिपञ्चच ॥ ३५
प्रसादः क्रियतांमह्यं नयमामपिराघव । इदानींत्वमर्द्धपथे कथंस्थातासिशत्रुहन् ॥

लक्ष्मणस्त्वब्रवीद्वाक्यं नाऽहं गन्ता वनं पुनः ।

लक्ष्मणं विकृतं ज्ञात्वा रामो वचनमब्रवीत् ॥ ३७ ॥
मामनुव्रज सौमित्रे! एको यास्यामि काननम् ।
द्वितीया च त्वियं सीता उक्तो रामेण लक्ष्मणः ॥ ३८ ॥
धनुःसंगृह्यविमना उक्तस्थौलक्ष्मणस्तदा । प्राप्तौप्राकारमर्यादां क्षेत्रसीमां परन्तपौ
त्वंनिवर्तस्वसौमित्रे समर्पयचमेधनुः । रामवाक्यमुपश्रुत्य सीतांवैलक्ष्मणोऽब्रवीत्
किमर्थं हि परित्यक्तः कोऽपराधः कृतो मया ।
रामेण च परित्यक्तः प्राणांस्त्यक्ष्याम्यसंशयम् ॥ ४१ ॥
रामंततोऽब्रवीत्सीता किमर्थंलक्ष्मणस्त्वया । देवसन्त्यज्यतेवीरःसुमित्रानन्दवर्धनः
राघवस्त्वब्रवीत्सीतां नाऽहं त्यक्ष्यामि लक्ष्मणम् ।
न कदाचिदपि स्वप्ने लक्ष्मणस्येद्गगप्रियम् ॥ ४३ ॥
श्रुतपूर्वन्तु सुश्रोणि! क्षेत्रस्यास्य विचेष्टितम् ।
अस्मिन् क्षेत्रे न सौभ्रात्रं सर्वो हि स्वार्थतत्परः ॥ ४४ ॥
परस्परं न मन्यन्ते स्वार्थनिष्ठैकहेतवः । न शृण्वन्तिपितुः पुत्राः पुत्राणाञ्चतथापिता
नच शिष्योगुरोर्वाक्यं गुरुर्वा शिष्यकर्म च ।
अर्थानुबन्धिनी प्रीतिर्न कश्चित्कस्यचित्प्रियः ॥ ४६ ॥
एवमुक्त्वाययौरामो लक्ष्मणोजानकीतथा । लिङ्गंतत्रप्रतिष्ठाप्य स्वनाम्नारघुनन्दनः
रामतीर्थे नरः स्नात्वा दृष्ट्वा रामेश्वरं शिवम् ।
विमुक्तः सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ४८ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
रामेश्वरतीर्थमाहात्म्यंनामैकत्वारिंशोऽध्यायः ॥ ४१ ॥

———

द्विचत्वारिंशोऽध्यायः

सौभाग्यतीर्थमाहात्म्यवर्णनम्

सनत्कुमार उवाच

तीर्थ सौभाग्यके स्नात्वा दृष्ट्वा सौभाग्यकेश्वरम् ।
सर्वपापविनिर्मुक्तः सौभाग्यं परमं लभेत् ॥ १ ॥
घृततीर्थेनरः स्नात्वा घृतेनस्नापयेच्छिवम् । घृतमग्नावथोहुत्वा रुद्रलोकेमहीयते ॥
देवींयोगेश्वरींप्राच्र्य सुरासुरनमस्कृताम् । सर्वपापविनिर्मुक्तः परंयोगमवाप्नुयात्
शङ्खावर्तेनरः स्नात्वा सर्वपापविवर्जितः । धनधान्यसमायुक्तो जायतेनिर्मलेकुले ॥
शुद्धोदकेचतुर्दश्यां मुक्त्यर्थंस्नानवान्नरः । शिवंसुरेश्वरंदृष्ट्वा ततोमोक्षगतिर्भवेत् ॥
तथान्यत्संप्रवक्ष्यामि तीर्थं त्रैलोक्यविश्रुतम् ।
किंपुनरिति विख्यातं ब्रह्महत्याविमोचनम् ॥ ६ ॥
पूर्वंत्रेतायुगेव्यास! सुनेत्रोनामवैद्विजः । तस्यपुत्रः समुत्पन्नोविश्वावसुरितिस्मृतः
यवक्रीतस्य शापेन स पिता तेन घातितः ।
ब्रह्महत्यान्वितो व्यास! तीर्थात्तीर्थं परिभ्रमन् ॥ ८ ॥
तीर्थे किं पुनके स्नात्वा धारातीर्थे गतो द्विजः ।
ततः कपिलधारायां चिन्तयित्वाऽऽत्मना स्वयम् ॥ ९ ॥
कथं मे ब्रह्महत्याया यायात्पापं प्रशान्तिताम् ।
एवं हि चिन्तयन् सोऽथ पुनरायादवन्तिकाम् ॥ १० ॥
अत्र तीर्थे पुनः स्नाति यावद्वाणीं ततोऽशृणोत् ।
किंपुनर्ध्यायसे ब्रह्मन्!येन स्नातो द्विजोत्तमः ॥ ११ ॥
नतेऽस्तिब्रह्महत्यावै तीर्थस्नानेननाशिता । गच्छशीघ्रं गृहंविप्र!पापहीनोयथासुखम्
पुनरन्यं प्रवक्ष्यामि पत्तनेश्वरमुत्तमम् । तत्रस्थित्वा महेशेन पुनःपत्तनमीक्षितम् ॥

पत्तनेश्वरइत्याख्यो देवदेवोमहेश्वरः । यस्तुगन्धैश्चपुष्पैश्च धूपैर्दीपैर्मनोरमैः ॥ १६ ॥
भावयुक्तो नरो व्यास! पूजयेद्विधिवत्सदा । यथावत्तिष्ठतेलिङ्गं वंशच्छेदोनजायते
हंसयुक्तेनयानेन शिवलोकंसगच्छति । तथान्यत्संप्रवक्ष्यामि तीर्थंत्रैलोक्यविश्रुतम्

दुर्धर्षमिति विख्यातं ब्रह्महत्याविमोचनम् ।
पुरा दिवाकरो व्यास! चक्रे दुर्धर्षनामतः ॥ १७ ॥

तीर्थमस्मिन्नदीतीरे विख्यातंसूर्यसंस्कृतम् । तेजःपुञ्जोऽभवल्लिङ्गंगणगन्धर्वपूजितम्
सप्तम्यामथवाष्टम्यांसंक्रान्तौरविवासरे । तत्रस्नात्वाशुचिर्भूत्वासुत्रिरात्रमुपोषितः
दृष्ट्वामहेश्वरंतत्र शिप्राकूलेव्यवस्थितम् । पूजयित्वातुभावेन यत्फलंतच्छृणुष्वमे ॥
पितृमातृकुलंसर्वं समुद्धृत्यशिवंव्रजेत् । तत्रयच्छतियोदानं गोहेमादिविशेषतः ॥
तावत्तदक्षयंलोके यावच्चन्द्रदिवाकरौ । तथान्यत्संप्रवक्ष्यामि गोपीन्द्रंतीर्थमुत्तमम्
गौतमेनपुरायत्र इन्द्रःशापाद्भगीकृतः । भगत्रीडायुतः शक्रः प्रविश्य वनमुत्तमम्

अतोषयत्तदोग्रेण तपसा शङ्करम्पुरा ।
तुष्टेन शम्भुना विप्र! ये भगास्तच्छरीरगाः ॥ २४ ॥
गोसहस्रीकृतास्तेन गोपीन्द्रमिति कथ्यते ।
तत्र स्नात्वा दिवं याति शक्रतुल्यपराक्रमः ॥ २५ ॥

येमृतास्तेपुनर्जन्मनाप्नुवन्तिमहीतले । गङ्गातीर्थेनरःस्नात्वापुण्यंप्राप्नोतिपुष्कलम्

ज्येष्ठशुक्लदशम्यान्तु गङ्गायाः फलमादिशेत्
गङ्गातीर्थे नरः स्नात्वा दृष्ट्वा पुष्कररण्डकम् ॥ २७ ॥

पुष्पकेणविमानेन प्रयातिदिविमोदते । नरकादुद्धरत्याशु नरः स्नात्वोत्तरेश्वरे ॥
इष्टभोगसमापन्नो यातिस्वर्गंनसंशयः । भूतेश्वरेनरः स्नात्वा भूतेश्वरमथार्चयेत् ॥

गन्धपुष्पादिनैवेद्यैर्मृतः सुरपुरं व्रजेत् ।
शिप्रायां तु नरः स्नात्वा कैलासं तु नमस्यति ॥ ३० ॥

सूर्याहतंतमोयद्वत्तद्वत्पापंप्रणश्यति । अम्बालिकांचयः पश्येत् समाधिनियमेनच ॥
समुक्तः सर्वपापेभ्यः कञ्चुकेनफणीयथा । घण्टेश्वरंप्रवक्ष्यामि यत्सुरैरपिपूजितम्

यत्रकूपोदकम्पीत्वा सौभाग्यमतुलंलभेत् । अर्चयेद्यस्तुदेवेशं गन्धपुष्पैरनुक्रमात् ॥
शिवलोकेवसेत्तावद्यावदिन्द्राश्चतुर्दश । पुण्येश्वरंतुयःपश्येच्छुचिःस्नातोजितेन्द्रियः
सगाणपत्यमाप्नोति यत्सुरैरपिदुर्लभम् । लुम्पेश्वरेनरःस्नात्वासमभ्यर्च्यमहेश्वरम्
नयातिनरकंमर्त्यः स्वर्गलोकेमहीयते । तथान्यत्संप्रवक्ष्यामि यत्सुरैरपिदुर्लभम् ॥

पूजितं ब्रह्मणा पूर्वं स्थविराख्यं विनायकम् ।
तत्र स्नात्वा शुचिर्भूत्वा पूजयेद्यो विनायकम् ॥ ३७ ॥
गन्धधूपैश्च पुष्पैश्च भक्ष्यैर्भोज्यैः फलं शृणु ।
समीहिता भवेत्सिद्धिर्मृतः शिवपुरं व्रजेत् ॥ ३८ ॥

नवनद्याः समीपे तु पार्वतीम्पूजयेद्बुधः । गन्धपुष्पैश्चधूपैश्च सौभाग्यमतुलंलभेत्

कामोदके नरः स्नात्वा दृष्ट्वा कामं रतिप्रियम् ।
स्वर्गे च देवगन्धर्वस्पृहणीयवपुर्भवेत् ॥ ४० ॥

प्रयागेतुनरः स्नात्वा प्रयागेशंतु पश्यति । सर्वलोकानतिक्रम्य शिवलोकेमहीयते ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे सौभाग्यतीर्थमहात्म्यं नाम द्विचत्वारिंशत्तमोऽध्यायः ॥ ४२ ॥

त्रिचत्वारिंशत्तमोऽध्यायः

नरादित्यमाहात्म्यवर्णनम्

सनत्कुमार उवाच

अथान्यंसंप्रवक्ष्यामि नरादित्यंदिवाकरम् । यस्यदर्शनमात्रेण सर्वरोगैर्विमुच्यते ॥

स्थापनान्ते प्रवक्ष्यामि नरादित्यस्य यादृशी ।
युद्धे निवारिते तस्मिन् रक्तस्वेदजयोः पुरा ॥ २ ॥

नरनारायणौदेवाववतीर्णौधरातले । कुन्त्यांदेव्यांसुदेवक्यां मथुरायांसमागतौ ॥

एवं तौ भवतो लोके कान्तौ वृद्धिम्परां गतौ ।
अन्यस्मात्कारणात् कृष्णोऽन्यस्माज्जातो धनञ्जयः ॥ ४ ॥
कंसादीन् दानवान् सर्वान् निजघान रणे हि सः ।
स्वर्गं गतस्ततः पार्थो वासवादस्त्रसिद्धये ॥ ५ ॥
कृतास्त्रेणतुवीरेण देवराजस्तुदक्षिणाम् । संस्तुतोदेवराजेनदक्षिणासातुयाचिता ॥
निवातकवचाह्युग्रा हिरण्यपुरवासिनः । वध्यतामर्जुनक्षिप्रमेषा मे गुरुदक्षिणा ॥ ७
अर्जुनेनप्रतिज्ञातो वधस्तेषांदुरात्मनाम् । रौद्रंसरथमास्थाय गृहीत्वासशरंधनुः ॥
निहत्य तांस्ततः पार्थः कृत्वा कर्म सुदुष्करम् ।
प्रीतिमुत्पादयामास सर्वेषां च दिवौकसाम ॥ ६ ॥
कृतकार्यंतदाशक्रस्त्वर्जुनंवाक्यमब्रवीत् । यत्तेऽभिरुचिरंवीरमर्त्यलोकेसुदुर्लभम् ॥
मनसाकाङ्क्षितम्पार्थ वरंतंवरयोत्तमम् । सवव्रेप्रतिमेद्वेतुयेऽर्च्चितेब्रह्मणास्वयम्
ब्रह्मणाप्रीतियुक्तेन दक्षायप्रतिपादिते । दक्षेणापियुगंसाग्रं पूजिते तिमिरापहे
सुराणामसुराणाञ्च विग्रहेसमुपस्थिते । दानवैर्निर्जितः शक्रोहृतराज्योवनंगतः ॥
तपश्चचारदुर्धर्षमेकपादः शतक्रतुः । दिव्यंवर्षसहस्रंतु धिषणस्तंददर्शह ॥ १४ ॥
दृष्ट्वातंदेवराजन्तु बृहस्पतिरुवाचह । हित्वात्रिदिवमायातः कथंशक्रत्विदंवनम् ॥
एकाकिना वनस्थेन न साध्याः शत्रवस्त्वया ।
ज्ञात्वैवं देवराज!त्वं शीघ्रं दक्षाश्रमं व्रज ॥ १६ ॥
पूजार्थंब्रह्मणादत्ते पारजातसमुद्भवे । चकारविश्वकर्मायेते याचस्वप्रजापतिम् ॥
शत्रूणांचक्षयोभावी प्रसादादर्च्चनात्तयोः । गुरोस्तुतेनवाक्येन हृष्टोदेवशतक्रतुः ॥
जगामसत्वरस्तत्र यत्रदक्षः प्रजापतिः । विनयावनतोभूत्वा ययाचेप्रतिमेह्युभे ॥
ददौयस्मैततोदक्षः शक्रायप्रतिमेशुभे । पूजितेप्रतिमेव्यास शक्रेणशरदांशतम् ॥
तयोस्तुतेजसासर्वे विनाशंदानवागताः । प्रतिमेचोचतुः शक्रं वरयस्ववरोत्तमम् ॥
भक्त्याऽनयापरंतुष्टा आवांजानीहिवासव । वरंवव्रेतदाशक्रः प्रसन्नात्माद्विजोत्तम
अस्माकं प्रतिपक्षा ये दानवाः पापचेतसः ।

सर्वे ते नाशमायान्तु वरएष मतो मम ॥ २३ ॥
युवां पूजितुमिच्छामि यावदिन्द्रो भवाम्यहम् ।
तथेति चोक्त्वा प्रतिमे ते नाकं प्रतिजग्मतुः ॥ २४ ॥
तत्तु याच्यमवश्यार्थे वरार्थे प्रतिमाद्वयम् ।

इन्द्र उवाच

साधु पार्थ!पुनः साधु यतश्चेत्थं त्वयोच्यते ॥ २५ ॥
इमेवप्रतिमेपार्थ! शङ्करेण महात्मना । सुरक्तैः शतपत्रैश्च पूजितेब्रह्मणो दिनम् ॥२६॥
त्रैलोक्यपालनार्थञ्च पूजितेविष्णुनापुरा । नीलोत्पलैःसुगन्धैश्च सहस्रपरिवत्सरान्
ततःप्रजापतिःसृष्टिं कर्तुकामःसमाहितः । पूजयामासप्रतिमे पद्मैरक्तोत्पलैश्शुभैः ॥
त्वमेव हि कथं पार्थ! मृत्युलोकं नयिष्यसि ।
एताभ्यां रहितस्स्वर्गस्तृणतुल्यो भविष्यति ॥ २६ ॥
आदातुकामं देवेन्द्रं प्रणिपत्यतमर्ज्जुनः । उवाचचाहमर्थ्यस्मि वरेणानेनवैप्रभो ॥
ततः शक्रः पुनः पार्थमुवाच मुनिपुङ्गव! । गृहीत्वात्वमिमेवीर कुशस्थल्यांनिवेशय
शिप्रायाउत्तरेतीरे केशवार्कंतुकेशवः । स्थापयिष्यतिवैतत्र सर्वपापप्रणाशनम् ॥
भविष्यति सदा यात्रा आषाढी चाथ कार्त्तिकी ।
आगमिष्याम्यहं तत्र सहितोऽप्सरसां गणैः ॥ ३३ ॥
मरुतश्चागमिष्यन्ति मेघाश्चैवसविद्युतः । मेघखण्डे समुद्भूते मयि तत्र प्रवर्षति
प्रवदिष्यन्तिवैलोकाः प्राप्तोदेवःपुरन्दरः । भास्करंतुनमस्कृत्यब्रह्माद्यैःपूजितं विभुम्
प्रतियामितुबीभत्सो पुनरेव यथागतम् । एवंमूर्त्तिद्वयंशौरिर्दत्त्वापार्थाय वासवः ॥
भूर्लोकंप्रेषयामास सुतेन सहपाण्डव! । नारदोद्धारकायांतु कृष्णास्याह्वानकारणात्
देवराजस्य तद्वाक्यं सरहस्यञ्च केशवम् ।
श्रावयामास विप्रेन्द्र! एहि कृष्ण!कुशस्थलीम् ॥ ३८ ॥
अर्चस्व पारिजातस्य विश्वकर्मसुकारिते । इन्द्रेणाथप्रदत्तेवै तेतुभ्यंपाण्डवायच ॥
श्रुत्वा शौरिस्तु तद्वाक्यं प्रतस्थेऽवन्तिकाम्पुरीम् ।

अवातरच्च ह्याकाशात्तमालिङ्ग्य च पाण्डवम् ॥ ४० ॥
प्रीतःप्रोवाचवचनं परिष्वज्यच फाल्गुनम् । जन्म मे सफलंजातं प्रीतिर्मेह्यतुलार्जुन
यतो मे प्रीतिरतुला क्रियतां कार्यमुत्तमम् ।
इत्युक्त्वा तौ तदा व्यास! समायातौ कुशस्थलीम् ॥ ४२ ॥
पार्थंप्राहतदाकृष्णःसुसम्पूर्णमनोरथः । गत्वाऽर्जुनदिशंप्राचीं मूर्त्तिमेकांनिवेशय॥
पूर्वाह्णेहिशुभंलग्नं भविष्यति मनोरमम् । अहमप्युत्तरां यास्ये स्थापनार्थे नदींमुने
ममशङ्खस्यनादेन प्रतिष्ठापयभास्करम् । पूर्वंगत्वा ततः पार्थः शुभंस्थानंव्यलोकयत्
व्यास!तां स्थापयामास दिननाथस्य सुस्थिरः ।
क देवं स्थापयामीति यावद्ध्यौ च पाण्डवः ॥ ४६ ॥
तावत्साह्यब्रवीद्देव स्थानंकारणशोभनम् । दर्शयामासपार्थाय तेजसास्वेनदुःसहम्
सव्यसाची ततोभीतो दृष्ट्वार्चां तां प्रजल्पतीम् ।
तेजस्त्वसहमानो वै देवं वचनमब्रवीत् ॥ ४८ ॥
क देवत्वांप्रमुञ्चामि किं स्थानंतवरोचते । सौम्यरूपःसुदर्शश्च प्रजाभ्योभवगोपते
दिविसंस्थाश्चयेदेवा नागाःपातालसंश्रयाः । भुविस्थामानवाःपूताभवन्तुतवदर्शनात्
सोऽर्जुनमब्रवीद्देवो माभैस्त्वंममदर्शनात् । दक्षिणेनकरेणाथ ह्यभयेनाभयप्रदः॥
समाश्वास्याथ तं शान्तःसौम्यमूर्तिर्बभूव ह ।
प्रभाकरेण देवेन निजन्तेजः प्रदर्शितम् ॥ ५२ ॥
ततस्सूर्योऽब्रवीत्स्थानमेतद्देवाचलं मम । प्राप्तेलग्नेच हरिणा शङ्खश्चापूरितोमहान्
नरेण च स वै सूर्यः स्थापितोऽमरसंस्तुतः ॥ ५४ ॥

अर्जुन उवाच

नयति किरणमाली भासुरस्सप्तसप्तिसकलभुवनधामा प्राग्दिगन्ताट्टहासः ।
भवति विगतपापं कीर्तनादेव यस्य प्रचुरकलुषदोषैर्ग्रस्तमङ्गं नराणाम् ॥ ५
ब्रह्माद्यैर्मुनिभिरभिष्टुतं पतङ्गं कःस्तोतुं कविरभिवाञ्छति प्रकामम् ।
स्तोष्येऽहं तदपि सुविस्तरात्सुबुद्धः किं दीपो ज्वलति हि प्रोदिते शशाङ्के॥

शास्त्रार्थकामनिपुणैर्मुनिभिःस्तुतस्य किं वस्तु यन्न रचितंविविधैः प्रयोगैः ।
द्वैपायनप्रभृतिभिर्मुनिभिःपुराणैरापीतसारमिह भाति जगत्समस्तम् ॥ ५७ ॥
कामं तथाऽप्यहमतीव विचार्य बुद्ध्या भानो त्रिलोकगुरुपूजितपादयुग्मम ।
वृत्तैस्फुटार्थमधुराक्षरसन्धियुक्तैस्त्वां वै विचित्रगतिभिः परिकीर्त्तयिष्ये ॥
तावज्जगद्भवतिनिश्चलमेव सर्वं तावत्क्रियाश्चविविधा न च यान्तिसिद्धिम् ।
यावच्चनाथकमलामलमण्डलस्त्वं नोत्तिष्ठसेव्यपनयन्किरणैस्तमांसि ॥ ५९ ॥
यावन्नभान्ति शिखराणि महीरुहाणां गुच्छान्यफुल्लतनुमीलितलोचनानि ।
सुप्तानि बोधयसि षट्चरणाकुलानि यावन्नभाभिरमलाभिरनुत्तमाभिः ॥ ६०
उद्यन्तमम्बरतलेसुरसिद्धसङ्घाः सब्रह्मदैत्यमुनिकिन्नरनागयक्षाः ।
त्वामर्चयन्ति विबुधाः प्रणतैःशिरोभिश्चञ्चत्किरीटमणिभाभिरनुत्तमाभिः ॥६१
अस्तङ्गते त्वयि जगद्भवति प्रसुप्तं भूयस्त्वयिप्रतपति प्रतिबोधमेति ।
एवं सदा वरद!लोकहितार्थहेतोरेकस्त्वमेव भगवंस्तिमिरस्य हन्ता ॥ ६२ ॥
उत्साहशक्तिनयशौर्यसमन्वितानां सेवाप्रयोगरचनाविधितत्पराणाम् ।
कार्याणि यन्नफलदानि भवन्तिपुंसां हेतुस्त्वभक्तिरिह नाथ!तवेतिनूनम् ॥६३
यत्संयुगेषु रथकुञ्जरकुन्तशक्तिनाराचचक्रशरतोमरभीमखड्गैः ।
क्षिप्रं नरास्समुपयान्ति विजित्य शत्रून्सर्वं सदा प्रणतवत्सल चेष्टितं ते ॥ ६४
कान्तारदुर्गविषमेष्वपि वर्तमाना ऋक्षेभसिंहबहुकण्टकतस्करेषु ।
कष्टान्विताश्च बहुशोकविमूढचित्तास्त्वत्कीर्तनाद्विगतमृत्युभया भवन्ति ॥६५॥
तेजोराशे!त्वमिह शरणं सर्वतो दुःखितानां
त्वत्तुल्योऽन्यो जगति सकले नास्ति कश्चिद्द्दयालुः ।
त्वय्येकस्मिन्भवति सकला भक्तिरन्विष्यमाणा
त्वामासाद्य प्रभवति कुतो व्याधिदुःखं नराणाम् ॥ ६६ ॥
कः कुष्ठाभिहतोनरोऽरिभिरपि व्याध्यादिभिः पीडितः
के पङ्ग्वन्धजडाश्च शीर्णचरणाः कोवाऽधनः कोऽक्रियः ।

इत्येवं प्रसमीक्ष्य देव! कृपया दोषात्परित्रायसे
कस्याऽन्यस्य परोपकारनिरता चेष्टा यथैका तव ॥ ६७ ॥
धर्मःपरत्र किल तिष्ठति सेवितोऽसौ कालान्तरेणविबुधावरदा भवन्ति ।
त्वं सेवितः प्रणतवत्सलभूतिकामैः सद्यःप्रयच्छसि फलं यदभीप्सितंतैः ॥६८
विभ्रान्तकान्तहरिणीसदृशेक्षणाभिरङ्गेषु हारमणिकुण्डलमेखलाभिः ।
तेषां भवन्ति भवनानि विलासिनीभिर्येषां नृणांत्वमसिवै वरदः प्रसन्नः ॥ ६६
यैस्त्वन्नरःसकृदपिप्रणतः कथंचिद्ध्यातोऽथवा भुवननाथ!तथान्तकाले ।
निष्कल्मषा जगति दुष्कृतिनो भवन्ति ते निर्मला सुकृतिनो गतिमाप्नुवन्ति
ये त्वां कुतर्कमतिभिर्नमन्ति भक्त्या रोमाञ्चकञ्चुकशताकुलितैश्शरीरैः ।
ते निर्धनाःपरगृहेष्ववभूतमन्नं क्षुत्क्षामकण्ठवदनाः परितङ्कयन्ति ॥ ७१ ॥
उदधिजलतरङ्गक्षोभलोलाक्षियुग्मैःसुमणिशतमयूखोद्भासितैर्लेलिहद्भिः ।
प्रणिपतितशिरोभिर्नागमुख्यैरजस्रं श्रुतिभिरनुपमाभिःस्तूयसे पुष्कलाभिः ॥ ७२ ॥
तव सुरवर!गच्छतोऽप्युदेतुं त्रिदशनदीकमलोद्भवानि वातैः ।
कनककमलरेणुरञ्जितानि भ्रमरकुलानि पतङ्ग उत्पतन्ति ॥ ७३ ॥
तत्त्वध्यानंकर्तुं जलनिधिमध्ये स्थित्वा किरणकनिवहैः ।
आजीवार्थे प्रतपसि भगवन्!कस्ते तुल्यस्त्रिभुवनमध्ये ॥ ७४ ॥
उदयाद्रिनितम्बसंस्थितस्य हृदयेष्वस्तमयेषु चावृतस्य ।
किरणास्तपनीयसम्प्रभास्ते विलसन्तस्तडितो विडम्बयन्ति ॥ ७५ ॥
यथा यथा व्रजतिरथस्तवाम्बरे विपाटयन् घनतिमिरौघसञ्चयान् ।
तथा तथा क्षुभितमहानिलेरितः प्रतीयते मुहुरिव दुन्दुभिर्यथा ॥ ७६ ॥
चारुपद्मविनिमीलितेक्षणां चक्रवाककलहंसमेखलाम् ।
कामिनीमिव रतिश्रमालसान्तां विबोधयसि पद्मिनीं करैः ॥ ७७ ॥
नीललोलमतिकान्तमुत्पलं भृङ्गतुङ्गचरणाकुलीकृतम् ।
त्वत्प्रभाभिरनुरागरञ्जितं पद्मरागमिव शोभते भृशम् ॥ ७८ ॥

स्फुरच्छशाङ्कहारनिर्मलं त्वदंशुपूरितम् ।
विभात्यतीवकान्तमम्बरं बृहच्च पाटलम् ॥ ७८ ॥
हरसि त्वमेव तापमिह तावदुदेत्यनृणां भवतिचयावदेवकिरणैस्तवपूर्णमिदम्
ऋषिमुनिभिरुदारधीभिरनिशं श्रुतिमार्गपरै-
र्वरद न शक्यते तव गुणस्तुतिराश्रयितुम् ॥ ८० ॥
त्वंविष्णुस्त्वं शशाङ्कस्त्वमसुरमथनः षण्मुखस्त्वं धनेश-
स्त्वंकालस्त्वञ्च धाता क्षितिधरमृदपामाश्रयस्त्वं हुताशः ।
ॐकारस्त्वंद्विजानां त्वमिहजलनिधिस्त्वंयमस्त्वंचरुद्र-
स्त्वंशक्रस्त्वं पयोदो व्रतयमनियमास्त्वं जगत्सर्वमेव ॥ ८१ ॥
त्वमनिन्द्यगोपते!त्रिपुरमथन!मन्मथदाहकस्त्वमसुरभामदर्पहा ।
त्रिदशाधिप!कमलवराननस्त्वमिह!देवगुरुर्भगवं-
स्त्रिभुवनमण्डलेऽस्तिकतमस्तव तुल्यगुणः ॥ ८२ ॥
आदित्य!भास्कर!दिवाकर!सप्तसप्ते!मार्तण्ड सूर्य!हरिदश्व!पतङ्ग!भानो! ।
अश्रान्तवाहनस्वरूप!गभस्तिमालिस्त्वां लोकनाथ!शरणं प्रणिपद्यतेऽसौ ॥
प्राग्दिग्वधूतिलक भासुरकर्णपूर!मन्दाकिनीदयितनाथ!जगत्प्रदीप! ।
हेमाद्रितापन!नभस्तलहाररत्न!सन्ध्याङ्गनावदनराग!नमोनमस्ते ॥ ८४ ॥
ब्रह्मण्य!सत्य!शुभ!मङ्गललोकनाथ! व्योमाम्बुजेश!मुनिसंस्तुत!विश्वमूर्ते! ।
आर्तस्य!शोकहरकिङ्करपालकश्च त्वम्मे प्रसीद!भगवञ्छरणागतस्य ॥ ८५
कृत्वाञ्जलिं शिरसिपङ्कजकुड्मलाभ्यांयत्संस्तुतस्त्वमिहदेवमयाद्यभक्त्या ।
तेन प्रभो!भव ममोपरि सौम्यमूर्त्तिर्धर्मे मतिं कुरु सदा श्रियमूर्जिताञ्च ॥
नमःसवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे ।
त्रयीमयाय त्रिगुणात्मधारिणे विरञ्चिनारायणशङ्करात्मने ॥ ८७ ॥

सूर्य उवाच

तुष्टोऽहमधुनापार्थ स्तोत्रेणाऽनेनसुव्रत । वरंदास्यामि यत्नेन यत्तेमनसि वर्त्तते ॥

मद्दर्शनंहिविफलं नकदाचित्प्रजायते । शूराणाञ्चविशेषेण ह्यदेयंनास्तियत्नतः ॥

अर्जुन उवाच

एषोह्यथवरोमह्यं वराणामुत्तमोत्तमः । अत्र सन्निहितोदेव सर्वकालंभवप्रभो! ॥ १० ॥

ये च त्वां मानवा भक्त्या स्तोष्यन्ते प्रणताःसदा ।

तेषां धनञ्च धान्यञ्च पुत्रदारादिकं वसु ॥ ११ ॥

मनसश्चेप्सितंसर्वंदातव्यंहिवरोमम । अथादित्यो नरं देव उवाच वचनंशुभम् ॥ ।

यैमांस्तुवन्त्यनेनाङ्ग पूजयित्वातिभक्तितः । श्रियानविच्युतिस्तेषांभवेदेषवरोमम

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे नरादित्यमाहात्म्यं नामत्रिचत्वारिंशत्तमोऽध्यायः ॥ ४३ ॥

चतुश्चत्वारिंशोऽध्यायः

केशवादित्यमाहात्म्यवर्णनम्

सनत्कुमार उवाच

नारायणोऽपि संस्थाप्य शङ्खं प्रध्माय यत्नतः ।

तुष्टाव प्रयतो भूत्वा स्तोत्रेणानेनभास्करम् ॥ १ ॥

आदित्यंभास्करंभानुं रविंसूर्यंदिवाकरम् । प्रभाकरंदिवानाथं तपनंतपतांवरम् ॥

वरेण्यंवरदंविष्णुमनघंवासवानुजम् । बलंवीर्यंसहस्रांशुं सहस्रकिरणद्युतिम् ॥

मयूखमालिनं विश्वं मार्तण्डं चण्डरोचिषम् ।

सदागतिं सुभास्वन्तं सप्तसप्तिं सुखोदयम् ॥ ४ ॥

देवदेवमहिर्बुध्न्यं धाम्नांनिधिमनुत्तमम् । तपोब्रह्ममयालोकं लोकपालमपाम्पतिम्

जगत्प्रबोधकंदेवं जगद्दीपंजगत्प्रभुम् । अर्कं निःश्रेयसपरं कारणंश्रेयसाम्परम् ॥

इनंप्रभाविनंपुण्यं पतङ्गंपतगेश्वरम् । दातारंवाञ्छितार्थानां दृष्टादृष्टफलप्रदम् ॥

ग्रहंग्रहकरंहंसं हरिदश्वंहुताशनम् । मङ्गल्यंमङ्गलंमेध्यं ध्रुवंधर्मप्रबोधनम् ॥ ८ ॥

भवसम्भावितंभावं भूतभव्यंभवात्मकम् । दुर्गमंदुर्गतिहरं हरनेत्रंत्रयीमयम् ॥ ६ ॥

त्रैलोक्यतिलकंतीर्थंतरणिंसर्वतोमुखम् । तेजोराशिंसुनिर्वाणंविश्वेशंधामशाश्वतम्

कल्पंकल्पानलंकालं कालचक्रंक्रतुप्रियम् । भूषणंमरुतं सूर्यं मणिरत्नंसुलोचनम् ॥

त्वष्टारंविष्टरंविश्वं सदसत्कर्मसाक्षिणम् । सवितारंसहस्राक्षं प्रजापालमधोक्षजम्

ब्रह्माणंवासरारम्भं रक्तवर्णंमहाद्युतिम् । सूक्ष्मंमध्यदिनेरुद्रं श्यामंविष्णुं दिनक्षये ॥

नाम्नामष्टशतंदिव्यं विष्णुनासमुदाहृतम् । यइदंप्रयतोभूत्वा पठेद्भक्त्यासमाहितः ॥

नतस्यविपदः क्वापि सर्वत्रापिशुभागतिः । धनधान्यसुखावाप्तिः पुत्रलाभश्चजायते

तेजः प्रज्ञापरंज्ञानं बुद्धिश्चपरमागतिः । एवंश्रुत्वाजगन्नाथो जगामादर्शनंततः ॥

केशवार्कमुखं दृष्ट्वा पद्मरागसमप्रभम् । विमुक्तःसर्वपापेभ्यःसूर्यलोके महीयते ॥ १७

दशाश्वमेधमध्ये तु रेणुतीर्थं प्रचक्ष्यते । तद्दृष्ट्वा सर्वपापेभ्यो मुच्यतेनात्रसंशयः ॥

केशवार्कसमीपे तु रेणुतीर्थं प्रकीर्त्तितम् ॥ १६ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे केशवादित्यमाहात्म्यं नाम चतुश्चत्वारिंशत्तमोऽध्यायः ॥ ४४ ॥

पञ्चचत्वारिंशत्तमोऽध्यायः

शक्तिभेदतीर्थवर्णनम्

सनत्कुमार उवाच

तीर्थमन्यत्तथावक्ष्येशक्तिभेदमितिस्मृतम् । स्कन्दस्यचजटाभद्रंचक्रेऽथात्रपुराशिवः

तारकञ्चतथादैत्यं हत्वातत्रसुरद्विषम् । शक्तिंस्कन्दःस्वयंक्रुद्धो निचिक्षेपमहीतले ॥

व्यास उवाच

भगवन्ब्रूहियत्नेन संशयोमेमहामुने । कथंस्कन्दःसमुत्पन्न एतदिच्छामिवेदितुम् ॥

सनत्कुमार उवाच

पुरादेवासुरेयुद्धेनिर्जितादानवैस्सुराः । दिवंत्यक्त्वादिशोयाताःशक्राद्याभयविह्वलाः
ततस्तुदेवराजेन तपसोग्रेणकालिज! । आराधितोमहादेवस्त्र्यम्बकस्त्रिपुरान्तकः
ततस्तुष्टोमहादेवः शक्रस्याभिमुखःस्थितः । उवाचवचनंश्लक्ष्णंवरमिष्टंददामिते ॥

शक्र उवाच

यदितुष्टोऽसिभगवन्कारुण्यान्ममशङ्कर! । महासेनापतिंदेव प्रयच्छ परमेश्वर! ॥ ७

हर उवाच

उत्पादयामिदेवेन्द्रं सर्वार्थादूर्जितंसुतम् । नामतो यो महासेनस्सुराणां भयहारकः

सनत्कुमार उवाच

इत्युक्त्वान्तर्दधेदेवस्सर्वभूतपतिर्हरः । सुतचिन्तापरोदेवो जगामचहिमालयम् ॥
देवदारुवनेतस्थौ ज्ञानध्यानपरोऽभवत् । ब्रह्मादयोपियंदेवं योगिनोध्यानचिन्तकाः
ध्यायन्ति नियतात्मानः प्राणायामपरा मुने! ।
लिङ्गमूर्तिश्च यो नित्यं पूज्यते सर्वजन्तुभिः ॥ ११ ॥
स ध्यायतिकिमर्थंतं नविद्मः परमार्थतः । एवं ध्यानपरेदेवे देवीहिमवतोगृहे ॥
मध्येवयसिवर्तन्ती यासीद्दाक्षायणीसती । पितुर्गृहेनिजोदेहो ययायोगाद्विसर्जितः
निमन्त्रितोनमेभर्ताइतिकोपं चकार या । तांदेवींहिमवाञ्छ्रुत्वा पूर्वंदेवर्षिनारदात्
भव भार्या भवित्रीति नान्यं वरमचिन्तयत् ।
या तपस्यति रुद्राय सा सखिभ्यां समन्विता ॥ १५ ॥
कथंहिशङ्करोदेवो:ममभर्ताभविष्यति । यावद्देवं गता देवं देवी हिमवतस्सुता ॥ १६
ततस्समागतादेवाः कृत्वाग्रेबलसूदनम् । जग्मुर्ब्रह्मसदः पुण्यं द्रष्टुं ब्रह्माणमव्ययम्
तेसुराश्चस्तुतिंकृत्वा वाक्यमेतत्समब्रुवन् । शरणं भवदेवानां दानवैर्विजितात्मनाम्
ततोऽवोचत्सुरान्ब्रह्मा ज्ञातं कार्यं मयाखिलम् ।
नैतच्छम्भोर्विना वीर्यात्कार्यसिद्धिर्भविष्यति ॥ १६ ॥
तथा यतध्वं देवेशो यथा वाञ्छति पार्वतीम् ।

इत्युक्त्वान्तर्दधे ब्रह्मा स्वप्ने लब्धं धनं यथा ॥ २० ॥
ततोमेरुं समागत्य पुनर्मन्त्रं प्रचक्रिरे । तेषामाहेदृशं शक्रस्तुष्टः शम्भुः पुरा मम ॥ २१
प्रतिज्ञातश्चदेवेन स्वाङ्गात्सेनापतिम्प्रति । तस्मादेवंगतेकार्ये कारणंमकरध्वजम् ॥
इतिसञ्चिन्त्यदेवेशो काममाहूयसत्वरम् । उवाच वचनं हृद्यं देवानामनुकम्पया
यथा देवोभजेद्देवीं तथा कामं विधीयताम् । कारणंमहदेतद्धिदेवानां समुपस्थितम्
कामोवाक्यंहरेः श्रुत्वा प्रहस्यैवमुवाचह । करिष्येसर्वमेवंहि सखाचेन्मे भवेन्मधुः
तस्मिन् क्षणेऽथ शक्रेण कामवाक्यादनन्तरम् ।
समादिष्टो मधुःक्षिप्रं कामस्यानुचरो भव ॥ २६ ॥
लब्ध्वा कामो मधुं मित्रं प्रतस्थे भार्यया सह ।
कृत्वा सज्जं धनुर्बाणं पौष्पं पाणौ समाहितः ॥ २७ ॥
यत्रदेवाधिदेवेशो देवदारुवनेस्थितः । नन्दीश्वरः प्रतीहारः कृतध्यानोऽवतिष्ठते
चूतवृक्षाश्रितः कामो यावद् बाणं समोहनम् ।
सन्दधत्यन्तरे चास्मिन् देवी प्राप भवाश्रमम् ॥ २६ ॥
त्यक्तध्यानव्रतोदेवो हृष्टश्चाह्लादचेतनः । ततोविलोकयामास दिशःसर्वाःप्रयत्नतः ॥
चूतवृक्षाश्रितं काममपश्यत्स रुषान्वितः ।
भस्मीकृतस्तृतीयाक्ष्णा वह्निज्वालाकुलेन सः ॥ ३१ ॥
देवोऽप्यन्तर्दधे तस्मात् स्थानादाशु गणैस्सह ।
पार्वती विस्मिता साध्वा लज्जिता दुःखिताऽभवत् ॥ ३२ ॥
हिमवांस्तां समुत्थाप्य निनायाशु निजंगृहम् ।
गते देवे च देव्याञ्च कामपत्नी सुदुःखिता ॥ ३३ ॥
भस्मीकृतंपतिंदृष्ट्वा विललापसुदुःखिता । दृष्ट्वा रतिंसुदुःखार्त्तां वागुवाचाशरीरिणी
आश्वासयन्ती कृपया सखीमिव सुदुःखिताम् ।
मा रोदीस्त्वं शुभापाङ्गि!तव भर्ता करिष्यति ॥ ३५ ॥
सर्वकार्याण्यनङ्गोऽपि मित्रकार्यविधानतः । यदाचापंमहादेवः परिणेष्यतिपार्वतीम्

तदाशम्भोरनुध्यानादुत्थास्यतिनसंशयः । द्वारकायांयदाकृष्णोद्वापरान्तेनिवत्स्यति

तत्पुत्रो भविता देवि! प्रद्युम्नो नाम ते पतिः ।

इत्युक्त्वा साऽजहाच्छोकमाकाशाज्जातया गिरा ॥ ३८ ॥

अचिन्तयत्तदादेवी उमापि हिमवद्गृहे । कामस्यदहनं तेजःशम्भोर्यत्तदनुत्तमम्

कथंभर्ताभवेदीशःकामस्योत्थापनंकथम् । नैतत्तपोविनाकार्यंकचित्कस्यापिसिद्ध्यै

एवंसञ्चिन्तयित्वाथ सखीभिःसहिताततः । तपश्चकारसुमहत् पित्रादेशाच्छुभव्रता

वर्षास्वभ्रावकाशस्था हेमन्ते जलशायिनी ।

ग्रीष्मे पञ्चाग्नितप्ताङ्गी तपस्युग्रे समास्थिता ॥ ४२ ॥

तां दृष्ट्वा तपसोपेतां ब्रह्मचारिवपुर्हरः ।

आजगामाश्रमं देव्याः कृतातिथ्योऽब्रवीदिदम ॥ ४३ ॥

कृशमध्येकृशापाङ्गि! किमर्थंनवयौवने । तपः करोषि कल्याणि कस्यार्थेकारणंवद

उवाचचोत्तरंसावै सत्यञ्चमधुरंतथा । वटोतपस्समारम्भः क्रियतेशङ्करात्तये ॥ ४५

विचार्यचहरः श्रुत्वा निन्दयन् कार्यमात्मनः । उमाभक्तिपरीक्षार्थंनसहेतगिरेस्सुता

गन्तुकामामुमां मत्वा तस्मात्स्थानान्महेश्वरः ।

स्वं वपुर्दर्शयामास त्रिनेत्रं शूलपाणिनम् ॥ ४७ ॥

लज्जिताभूद्भवानीशं दृष्ट्वातस्थावधोमुखी । विवाहायार्थयागेन्द्रं यथामेत्वांसयच्छति

इत्युक्त्वाऽन्तर्दधे देवो देव्यगाच्च पितुर्गृहम् ।

देवीलाभाय सप्तर्षीन् सस्मार स्मरशासनः ॥ ४६ ॥

प्रणेमुस्तेतथागम्य संस्मृताः परमेश्वरम् । ऊचुश्चप्राञ्जलिपुटाः कुर्मःकिंशाधिनोद्रुतम्

ततोऽब्रवीन्मुनीनीशस्समस्तांश्च गिरेर्गृहम् ।

गत्वा तथा कुरुध्वम्मे पार्वती स्याद्यथा प्रिया ॥ ५१ ॥

तथेति च प्रतिज्ञाय सङ्केतं शम्भुनास्वयम् ।

कृत्वा जग्मुस्सपत्नीका गिरीन्द्रस्य निवेशनम् ॥ ५२ ॥

दत्तार्घाभूधरेन्द्रेण कृतासनपरिग्रहाः । ऊचुरद्रिमुमांयच्छ शङ्करायार्थिनेप्रियाम् ॥

दत्तेत्युक्तागिरीन्द्रेणनिरूप्योद्वाहवासरम् । लब्ध्वानुज्ञांसमायाता यत्रास्तेसमहेश्वरः

ऊचुस्तेशङ्करंसर्वे दत्ताहिमवताशिवा । कृतकार्याश्च सर्वेऽपि वव्रजुस्तेयथागताः ॥

चक्रुर्विवाहसामग्रींब्रह्मवस्विन्द्रनारदाः । वृषासनं जगामाशु नन्दीशप्रमुखैर्गणैः ॥

मातृदुन्दुभिनादैश्च ब्रह्माद्यैरमरैस्सह । प्राप्यागेन्द्रालयं शम्भुः कृतकौतुकमङ्गलः ॥

विवाह्यैनां विधानेन जगाम स्वालयम्पुनः ।तत्रैकान्तरतिर्देवो यावत्तिष्ठतिकामवान्

तावत्त्रस्तैस्सुरैरग्निः प्रेषितोऽगान्महेश्वरम् । अग्नौतत्रगतेदेवो रतिंत्यक्त्वामहेश्वरः

निचिक्षेपमुखेवह्नेः स्वरेतोव्रीडितोभृशम् । रेतसातेनतप्तोऽग्निर्गङ्गातोयेव्यचिक्षिपत्

हररेतोऽग्निनोद्गीर्णं गङ्गामध्ये पपात ह ।

तया तु स्वतटे न्यस्तं दग्धया तस्य तेजसा ॥ ६१ ॥

सप्तर्षीणाञ्च षट्पत्न्यः स्नानार्थं जाह्नवीं ययुः ।

शीतार्तास्ताः कृतस्नाना दृष्ट्वा तेजस्तटे ज्वलत् ॥ ६२ ॥

मत्वाग्निमितिताःसर्वास्तप्तुकामासमाययुः । तपन्तीनाञ्चवैतासां तद्वीर्यमभवन्मुने

षडाननंसमारूढंश्रोणिद्वारेण सत्वरम् । यदान्योन्यमुत्पतितुंशक्तानाग्नेःपुरःस्थिताः

चिन्तामगुस्तदा सर्वा मुनित्रासात्ततो भयात् ।

ततश्च तपसो वीर्याद्विकृष्य स्वोदरात्ततः ॥ ६५ ॥

षड्भिरेकत्वमापन्नं श्वेतपर्वतमस्तके । मध्येशराणांवैकृत्स्नं निक्षिप्तंवीर्यमुत्तमम्

शुक्लायांप्रतिपद्यासीद्द्वितीयायांसमीकृतः । तृतीयायांवसाकारस्सर्वलक्षणलक्षितः

चतुर्थ्यां परिपूर्णाङ्गः षण्मुखो द्वादशेक्षणः ।

अलङ्कृतस्तु पञ्चम्यां षष्ठ्याञ्च ससमुत्थितः ॥ ६८ ॥

तेजसास्वेनतीव्रेण ततापसजगत्त्रयम् । जातमित्थं समाकर्ण्य सर्वेशक्रमुखाःसुराः

समागत्यास्यसंस्कारं ब्रह्माचक्रेयथाविधि । तुष्टेनपार्वतीशेन शक्तिर्दत्तादृढा शुभा

ततोगौर्यामयूरश्च वाहनेपरिकल्पितः । छागश्चैवाग्निनादत्तःकुक्कुटं सरिताम्पतिः

ततःसकृत्तिकाभिश्च वर्द्धितः पुत्रकाम्यया । ततस्तुप्राप्तसंस्कारो ब्रह्माद्यैरभिवन्दितः

शक्तिहस्तोऽभिषिक्तस्तुदेवसेनासमावृतः। वित्ताधिपोमहासेनःपावकःषण्मुखोऽजशः

गाङ्गेयः कार्त्तिकेयश्च गुहस्स्कन्द उमासुतः ।
देवसेनापतिः स्वामी सेनानी च शिखिध्वजः ॥ ७४ ॥
कुमारः शक्तिधारी च तस्य नामानि षोडश ।
यः पठेन्मानवो भक्त्या बाधा तस्य न जायते ॥ ७५ ॥

एवंजातोमहासेनोदानवानांक्षयङ्करः । कुशस्थल्यांसमानीतःशम्भुनास्थानकारणात् अभिषिक्तः स तेनासौ भद्रितःसजटःपुरा । तेनभद्रजटोनाम देवतीर्थश्चकथ्यते क्षताभिषेकं लब्ध्वाऽस्त्रं महासेनं महेश्वरः । तमुवाच स मधुरं सर्वदेवसमागमे ॥ रक्षाकार्या त्वयापुत्र सामरस्यशतक्रतोः । देवानां बाधकाःसर्वे निहन्तव्याःसुरद्विषः इत्थं महोत्सवे जाते तत्र प्रथमसागरे । मातरोन्वागताःसर्वाःपातालतलसस्थिताः

तासामाहारसंज्ञाभिश्चक्रे नामानि शङ्करः ।
यानि तानि प्रवक्ष्यामि श्रृणु त्वं मुनिपुङ्गवः ॥ ८१ ॥

वटभोजनकामाया ज्ञेयास्ता वटमातरः । भुक्तातुचिर्भटीयाभिस्तावैचिर्भटमातरः

क्रीडार्थं शम्भुना चाथ प्राप्ता याःपलभोजनैः ।
षण्णवतिर्मातरश्चासन् सर्वास्ताःपलमातरः ॥ ८३ ॥

सर्वासांदर्शनंपुण्यं गृहभूतविनाशकम् । तायत्नस्तसदादेव्यो द्रष्टव्या मानवैर्मुने ॥ लब्ध्वा शक्तिमहासेनो देवसेनासमावृतः । जघानदानवेन्द्रंतं तारकं तरसातदा ॥ दत्त्वाराज्यंतथेन्द्रायस्फीतंनिहतकण्टकम् । कुशस्थलींसमागम्यतत्रवासंसमाचरत् एवं निहत्यदैत्येन्द्रं सगाङ्गेयो महाबलः । भक्तिशिप्राञ्जलेमुञ्चत्पातालंचबिभेदसा ततो भोगवतीव्यास! शक्तिभेदेननिर्गता । वन्दिता सर्वदेवैश्च मुनिभिश्चतपोधनैः

पृथिव्यां यानि तीर्थानि समुद्रादिगतानि च ।
शक्तिभेदे तु न्यस्तानि शतकोटिसहस्रशः ॥ ८६ ॥
अतोऽतिपुण्यं त्रैलोक्ये कोटितीर्थमुदाहृतम् ।
ब्रह्मणा स्थापितस्तत्र कोटितीर्थेश्वरः शिवः ॥ ६० ॥
कोटितीर्थे नरस्स्नात्वा दृष्ट्वा कोटीश्वरं शिवम् ।

मुच्यते सर्वपापेभ्यो निर्मोकादिव पन्नगः ॥ ६१ ॥

श्राद्धंकरोतियस्तत्र पितृभक्तोनरोमुने! । दशानामश्वमेधानां प्राप्नोति सकलम्फलम् पितृनुद्दिश्ययत्किञ्चित्कोटितीर्थेप्रदीयते । तत्सर्वंकोटिगुणितं जायतेनात्रसंशयः

तत्र तीर्थे नरो यस्तु गां ददाति पयस्विनीम् ।
सर्वलोकानतिक्रम्य स गच्छेत्परमां गतिम् ॥ ६४ ॥

यावन्त्यङ्गेऽपिरोमाणि तत्प्रसूतिकुलेषुत्र । तावद्युगसहस्राणि ब्रह्मलोकेमहीयते ॥

पौर्णमास्याममावस्यां पश्येच्छक्तिधरं तु यः ।
नाऽपुत्री (त्रो) नाधनो रोगी सप्तजन्मनि जायते ॥ ६६ ॥

जलप्रवेशंयःकुर्यात्तत्रतीर्थेनरोत्तमः । सोऽक्षयं लभतेलोके यावच्चन्द्रार्कयोःसुखम् वृषोत्सर्गं तु यः कुर्यात् पितृभक्तोनरोमुने । सोक्षयंलभतेस्थानं यत्सुरैरपिदुर्लभम्

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे शक्तिभेदमाहात्म्यवर्णनं नाम पञ्चचत्वारिंशत्तमोऽध्यायः ॥ ४५ ॥

षट्चत्वारिंशोऽध्यायः

अगस्त्येश्वरमाहात्म्यवर्णनम्

सनत्कुमार उवाच

स्वर्णक्षुरेनरस्स्नात्वा दृष्ट्वादेवं महेश्वरम् । कपिलाशतदानस्य फलमप्यधिकंभवेत् वाप्यांस्पितामहस्यापि यःस्नायाद्विजितेन्द्रियः । हंसयुक्तेनयानेनब्रह्मलोकंसगच्छति

तैलाभिधानमातृणां रात्रौ यो यच्छते बलिम् ।
तस्य सिद्धिर्भवेत्सद्यो मृतः शिवपुरं व्रजेत् ॥ ३ ॥
विष्णुवाप्यां नरः स्नात्वा चैत्रे वा फाल्गुने तथा ।
जागरं यस्तु कुर्वीत सोपवासो जितेन्द्रियः ॥ ४ ॥

मुच्यतेसर्वपापेभ्यो विष्णुलोकंसगच्छति। अभयेश्वरदेवस्य भक्त्यानियतमानसः पट्टबन्धमथोदृष्ट्वा रुद्रलोकं स गच्छति। लोकेतु जायतेदाता सर्वभौमो महीपतिः यस्त्वगस्त्येश्वरंगच्छेदेकचित्तोनरोमुने। दृष्ट्वागस्त्येश्वरंदेवंसोपवासोजितेन्द्रियदेः

अगस्त्योदयवेलायां मुच्यते सर्वपातकैः।

कृत्वाऽगस्त्यञ्च सौवर्णं रौप्यं वाथ स्वशक्तितः ॥ ८ ॥

पञ्चरत्नसमायुक्तं वस्त्रेणच समन्वितम्। तत्कालीनैःफलैःपुष्पैः पूजनीयोविधानतः

विधानं तस्य वक्ष्यामि चातुर्वर्ण्यं द्विजोत्तम।

सप्तधान्यानि मुख्यानि तावन्त्येव फलानि च ॥ १० ॥

एकंधान्यं फलञ्चैकमग्रेत्याज्यंभवेन्मुने। यावद्वैसप्तवर्षाणि व्रतमेवं समाचरेत्॥ काशपुष्पप्रतीकाश!वह्निमारुतसम्भव!। मित्रावरुणयोःपुत्र! कुम्भयोने! नमोऽस्तुते दत्तेऽर्घ्येयत्फलं व्यास! तद्वैह्येकमनाः शृणु। पुत्रवान्धनवांश्चैव जायतेनात्रसंशयः मृतःस्वर्गमवाप्नोति सम्पन्ने जायतेकुले। मर्त्यलोके पुनःप्राप्य महायोगीश्वरोभवेत् यश्चैतच्छृणुयान्नित्यं पठेद्वासुसमाहितः। सर्वपापविनिर्मुक्तो मुनिलोकेसमोदते

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमे-ऽवन्तीखण्डेऽगस्त्येश्वरमाहात्म्यं नामषट्चत्वारिंशत्तमोऽध्यायः ॥४६॥

सप्तचत्वारिंशोऽध्यायः

विष्णुमाहात्म्यवर्णनम्

व्यास उवाच

महाकालं किमर्थंतु किंवाशिवपदंस्मृतम्। कोटीश्वरं किमर्थंतु पावकंतत्किमुच्यते नरदीपःकिमर्थंतु द्वितीयावटमातरः। अभयेश्वरंकिमर्थंतु शङ्खोद्धारणमेवच ॥२॥

शूलेश्वरं किमर्थं तु किमोङ्कारस्तु कथ्यते।

धूतपापं किमर्थं तु किमङ्गारेश्वरं तथा ॥ ३ ॥

पुरीचोज्जयिनीदिव्या सप्तकल्पाकथंस्मृता। कथयस्वमुनिश्रेष्ठतस्यानामानियानिच

सनत्कुमार उवाच

शृणु व्यास!यथा ख्याता पुरी दिव्या सुपुण्यदा।

स्वर्णशृङ्गा तु प्रथमे द्वितीये तु कुशस्थली ॥ ५ ॥

तृतीयेऽवन्तिकाप्रोक्ता चतुर्थेत्वमरावती। विख्यातापञ्चमेकल्पे पुरीचूडामणीतिच षष्ठेपद्मावतीज्ञेयोज्जयिनीसप्तमेपुरी। पुनरन्तेतुकल्पस्य स्वर्णशृङ्गादिकास्मृता॥

एतानि सप्तनामानि प्रातरुत्थाय यः पठेत्।

सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥ ८ ॥

उज्जयिन्यां पुराराजा बभूवकिलचान्धकः। तस्यपुत्रोमहावीर्यो नाम्नाकनकदानवः युद्धार्थेसमहावीर्यः शक्रंयुद्धेसमाह्वयत्। क्रोधादिन्द्रेणसंग्रामेयुद्ध्यमानोनिपातितः निहत्यदानवंशक्रो भयादन्धासुरस्यतु। जगामशङ्करान्वेषी कैलासंशङ्करालयम्॥ दृष्ट्वाप्रणम्यदेवेशं चन्द्रार्द्धकृतशेखरम्। भीतोविज्ञापयामास सहस्राकुललोचनः॥ अभयंदेहि मेदेव!दानवादन्धकाच्चवै। शक्रस्येत्थंवचः श्रुत्वा शरणागतवत्सलः॥ ददावभयमेवासौ माभैस्त्वमन्धकाद्धिवै। कृत्वारूपंमहादेवो विश्वरूपंसुभैरवम्॥

सर्पैर्लिहद्भिरत्युग्रैस्तीक्ष्णदंष्ट्रैर्विषोल्बणैः।

पातालोदररूपैश्च भैरवारावनादिभिः ॥ १५ ॥

भुजैरनेकसाहस्रैर्बहुशस्त्रधृतैस्तथा। सिंहचर्मपरीधानं व्याघ्रत्वगुत्तरीयकम् ॥ १६ ॥ गजाजिनकृताटोपं चन्द्राग्निरविलोचनम्। महामहीध्रतुल्याभिर्जङ्घाभिर्भूषितंसदा क्षोभयंश्चालयन्सर्वान् पातालस्यतलावधि। ईदृग्रूपंविधायेशो दनुदैत्यभयावहम्॥ अवातरन्महींभीमः पादेनैकेनशङ्करः। तत्रैवहिहदोजातः सर्वदैवतवन्दितः ॥ १९ ॥ ख्यातंशिवपदंतद्धियत्पदाक्रान्तवान्विभुः। यस्मादत्रपुराकोटिःपादाङ्गुष्ठस्यधारिता कोटितीर्थमतःख्यातंसर्वपापप्रणाशनम्। अगस्त्येनतथाकोटिस्तीर्थानामत्रधारिता

अतोऽपीदृक् शुभं लोके कोटितीर्थं सदा स्मृतम्।

दृष्ट्वा तु त्रिदशाः सर्वे स्नाता वै हितकाम्यया ॥ २२ ॥
महाकालंकृतंरूपं महाकालस्ततःस्मृतः । अन्धासुरोपिदनुजः पुत्रंश्रुत्वाहतंयुधि ॥
क्रोधेनमहताविष्टोरणतूर्याण्यवादयत् । ससैन्योनिर्गतःप्राप्तोयत्रतेत्रिदशाःस्थिताः
महत्यासेनयासार्द्धं रथवारणयुक्तया । तदैवदानवान्वीक्ष्य महाहवकृतोद्यमान् ॥
वेपन्तस्तेतुसन्नद्धाः शम्भुंशरणमाययुः । मामैत्तमहाकालो देवानूचेत्रिलोचनः
गृहीत्वाशूलमातिष्ठद्दंष्ट्रादष्टाधरोरुषा । कोपयुक्तेविरूपाक्षे ज्वालाभिः पूरितन्नभः ॥
अन्धकेनाथ रुष्टेन शरकोटिस्तु दुःसहा ।
मुक्ता जगाम देवानां नाशाय शलभाकृतिः ॥ २८ ॥
विस्फुलिङ्गार्चिषं वह्निं मुञ्चमानः पिनाकधृक् । शतशश्शकलीचक्रेतञ्चबाणैरताडयत्
अन्धकोऽपि हि युद्धस्थो शिथिलः शिथिलायुधः ।
निरुद्धश्शम्भुना बाणैरलिभिः पङ्कजं यथा ॥ ३० ॥
तस्य सैन्यञ्च बहुधा स्वगणैर्युद्धयोधिभिः ।
योधप्रवरैर्हतं दिव्यैः स्थाणुसान्निध्यमाश्रितैः ॥ ३१ ॥
ततोऽन्धकेन सैन्यं स्वं भिन्नं दृष्ट्वा तथा सुरैः ।
आत्मानञ्च महेशेन विद्धं च बाणकोटिभिः ॥ ३२ ॥
विकलीकृतदेहोऽसौ भयमाश्रित्यवेगतः । चकारतामसींमायां मायाशतविशारदः
तयान्तर्हितदेहोऽसौ जगामदिशमुत्तराम् । शम्भोर्भीतिहरं बिभ्रद्भ्रभ्रामभुविभिन्नहृत्
येनाध्वनागतोदैत्यस्तेनदेवोजगामह । वदन्नदृश्यनेकासौ गतोदुष्टःपुनः पुनः ॥
उवाचचान्धकशब्दं तथोवाचमहेश्वरः । तत्रतीर्थमथोत्पन्नं वागन्धकमितिश्रुतम्
तत्र स्नात्वा शुचिर्भूत्वा यो वै दद्यात्सशर्करम् ।
नवम्यां मार्गशीर्षस्य शुक्लायां श्रद्धयान्वितः ॥ ३७ ॥
अक्षयंतद्भवेत्सर्वं दाता शिवपुरं व्रजेत् । पितृनुद्दिश्ययत्किञ्चिद्दीयतेभक्तितःशिवे
तृप्तास्तिष्ठन्ति ते तावद्यावदाभूतसम्प्लवम् ।
तमसा छादितादेवाः सम्बभूवुः समाकुलाः ॥ ३९ ॥

सम्भ्रान्तमनसस्सर्वे नकिञ्चिदपिमेनिरे । एतस्मिन्नन्तरेव्यासनरादित्यःस्वतेजसा
उत्तस्थौ नररूपेण कुर्वन्वितिमिरा दिशः ।
नष्टे तमसि दैत्येऽपि प्रकाशे प्रकटे सति ॥ ४१ ॥
देवामुदमवापुस्ते दृष्ट्वाऽनन्तंनुलोचनैः । स्तुवन्तोविविधैःस्तोत्रैर्नररूपंदिवाकरम्
उत्तस्थौनररूपेण दीप्तोयस्माद्दिवाकरः । तेनास्यनामतेचक्रुर्नरदीपइतीश्वराः
यःपश्यतिनरोभक्त्या नरदीपं दिवाकरम् । मुच्यतेसर्वपापेभ्योयद्यपिब्रह्महाभवेत्
षष्ठ्यामर्कदिनेविप्र सप्तम्यामुपवासकृत् । दिनक्षयेऽथसंक्रान्तौ ग्रहणेविषुवत्यथ
कुण्डेस्नात्वाशुचिर्भूत्वा जपन्नियतमानसः । नरदीपंनरः पश्येत्स्तोत्रवादित्रमङ्गलैः
गन्धैर्धूपैस्तथादीपैर्नैवेद्यैर्विविधैस्तथा ।
गीतं वाद्यं पुरा कृत्वा प्रणम्याष्टाङ्गमेव च ॥ ४७ ॥
प्रातर्मध्येपराह्णे वा कृत्वार्कस्यप्रदक्षिणाम् । समुक्तस्सर्वपापैस्तु सप्तजन्मकृतैरपि
सूर्यकोटिप्रतीकाशैर्विमानैः सार्वकामिकैः ।
सूर्यलोकं प्रयात्याशु यत्सुरै रपि दुर्लभम् ॥ ४९ ॥
शक्रात्प्राप्यपुरायस्माद्भानुरत्रप्रतिष्ठितः ।नरेणैव प्रसादेन नरदीपस्ततो ह्ययम् ॥ ५०
तदैवास्यपुराव्यास! यात्रा शक्रेणनिर्मिता । आगमिष्याम्यहंपार्थसार्द्धंदेवैःसमाहितः
ज्येष्ठेऽतीतेद्वितीयायां नरदीपेतुसर्वदा । तत्राहमागतोज्ञेयो लोकैर्देवस्यदर्शनात्
ततोऽनन्तरमागम्य देवा ये त्रिदशालये । दृष्ट्वा देवं तथारूढं नरदीपंसुदीपनम् ॥ ५३
कृत्वायात्राञ्चतेयान्तिदेवयात्रात्ययेततः । यःपश्येन्मानवोभक्त्यानरदीपंरथस्थितम्
सर्वपापविनिर्मुक्तः सूर्यलोके महीयते ।
रथयात्रामथो वक्ष्ये नरदीपस्य या पुनः ॥ ५५ ॥
तां कृत्वा चैव तत्पुण्यं मुनिभिः परिकीर्तितम् ।
ज्येष्ठेऽतीते द्वितीयायां रथस्थो हि दिवाकरः ॥ ५६ ॥
कुशस्थल्यां द्विजश्रेष्ठैर्बाहुक्षेपैः प्रणीयते ।
उत्तरां दिशमायान्तं यः पश्यति दिवस्पतिम् ॥ ५७ ॥

अग्निष्टोमस्ययज्ञस्य लभतेसोऽखिलंफलम् । निवृत्तंकेशवार्काद्योरथंपश्यतिमानवः
मुण्डीरस्वामिनोयात्रा कृतातेननसंशयः । रथमाकर्षतेयस्तु रज्ज्वाकर्षेणवैमुने! ।
कुलमुद्धरते सोऽपि पूर्वान्पितृपितामहान् ।
दक्षिणाभिमुखं यान्तं नरदीपं द्विजोत्तम! ॥ ६० ॥
ये संयताः प्रपश्यन्ति ते यान्ति च त्रिविष्टपम् ।
सूत्रेण वेष्टते क्षेत्रं रथं देवमथापिवा ॥ ६१ ॥
सर्वकामानवाप्नोतिकृतपुण्यस्तुजायते । प्रदक्षिणांतुसूर्यस्य भक्त्याकुर्वन्तियेनराः
प्रदक्षिणीकृतातैस्तुसप्तद्वीपवसुन्धरा । प्रातरुत्थाययोभक्त्या मौनीयातिदिवाकरम्
दृष्ट्वातुपूर्वद्वारेण नमस्कृत्यद्विजोत्तम । प्रविश्य दक्षिणेनैव रथचक्रं प्रपूजयेत् ॥ ६४
तेनद्वारेण निष्क्रम्य प्रणिपत्यव्रजेत्ततः । पश्चिमंद्वारमाश्रित्य रथस्थंसूर्यमर्चयेत् ॥
चामरे च वितानञ्च घण्टां वापि निवेदयेत् ।
पूर्वद्वारे तु गौर्देया तथाऽश्वश्चैव दक्षिणे ॥ ६६ ॥
पश्चिमेचगजःप्रोक्त उत्तरेरथएवच । कुर्याद्देवंतु योयात्रां रथदीपस्य मानवः ॥
गोसूर्यशिवशक्राणां स्वालोक्यं लभते सुखम् ।
प्रदक्षिणा महामेरोः कृता तेन भवेन्मुने! ॥ ६८ ॥
दद्याद्गवां सहस्रंयो व्यतीपातशतेनच । अश्वानाञ्च सहस्रेणयात्रायांतत्फलंलभेत्
नरदीपेरथारूढे वपनंकारयेत्तुयः । श्रिया न विच्युतिस्तस्य सूर्यलोके महीयते ॥
सूर्यस्य पुरतो वाप्यां मासं नित्यं विगाह्य च ।
यस्तमालोकते मर्त्यो दुस्स्वप्नं तस्य नश्यति ॥ ७१ ॥
भक्त्यायोनुदिनंव्यास! नरदीपंप्रपश्यति । उत्तमंस्थानमासाद्य पुत्रपौत्रसमन्वितः
प्रक्रीड्यबन्धुभिःसार्द्धं मृतः सूर्यपुरंव्रजेत् । प्रणष्टे तिमिरेविप्र जातेसर्वत्र सुप्रभे
हतेऽन्धके महेशेन शूलेनत्रिशिखेनवै । प्रहृष्टाश्च सुरास्सर्वे ब्रह्मेन्द्रप्रमुखास्तदा ॥
शङ्खं दध्मौ तदा विष्णुः सुराणां हितकाम्यया ।
तत्र तीर्थमथोत्पन्नं शङ्खोद्धारणसञ्ज्ञकम् ॥ ७५ ॥

तत्र सन्निहितोविष्णुर्लिङ्गश्चैवचतुर्मुखम् । अनाद्यञ्चैवविप्रेन्द्रलिङ्गस्यच समीपतः
देवस्य दक्षिणे भागे शूलेनालक्षितः स्थितः ।
चतुर्दश्यां तथाऽष्टम्यां ये पश्यन्ति जितेन्द्रियाः ॥ ७७ ॥
ते क्षीणाशेषपापौघाः प्राप्स्यन्ति परमां गतिम् ।
योगिनीनां बलिं यस्तु यथावत्सम्प्रदास्यति ॥ ७८ ॥
भूतप्रेतपिशाचाद्यैर्नासौकेनापिबाध्यते । द्वादशीं समुपोष्यैव स्नात्वादेवंजनार्द्दनम् ॥
यः पश्येच्छङ्खिनं देवं सोऽच्युतं स्थानमाप्नुयात् ॥ ८० ॥
यःस्थूलसूक्ष्मः प्रकटप्रकाशो यस्सर्वभूतो न च सर्वभूतः ।
विश्वं यतश्चैव हि विश्वहेतुर्नमोऽस्तु तस्मै पुरुषोत्तमाय ॥ ८१ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्रयां संहितायां पञ्चमेऽवन्तीखण्डे
विष्णुमाहात्म्यवर्णनं नाम सप्तचत्वारिंशत्तमोऽध्यायः ॥ ४७ ॥

अष्टचत्वारिंशोऽध्यायः

अङ्गारेश्वरमाहात्म्यवर्णसम्

सनत्कुमार देवाच

भिन्नेऽन्धके त्रिशूलेन ध्वनीरुद्रस्यनिर्गतः । तत्रोङ्कारःसमुत्पन्नो देवदेवोमहेश्वरः ॥
तत्रस्नात्वाशुचिर्भूत्वा समाधिनियमेनच । दृष्ट्वोङ्कारं महादेवं मुच्यते सर्वपातकैः
हत्वाऽन्धकं त्रिशूलस्तु भोगवत्याजलेययौ । दृष्ट्वाशूलंसुनेजस्कंहाटको विस्मयंगतः
पप्रच्छकेनकार्येण भवानिह समागतः । कथयामास शूलोसौ शङ्करेणाहमीरितः
अन्धकस्यवधार्थाय पापवृत्तेःसुदुर्मतेः । भित्त्वातमहमायातो भोगवत्याजले शुभे ॥
गमिष्यामि पुनस्तत्र यत्र तिष्ठति शङ्करः ।
शूलोक्तं वचनं श्रुत्वा परमेशदिदृक्षया ॥ ६ ॥

हाटकशूलमार्गेण निर्जगामजवेनसः । बहुवक्त्रसमाकीर्णं सुप्रभं सुमनोहरम् ॥
तंदृष्ट्वा त्रिदशास्सर्वे शूलेशंहाटकेश्वरम् । प्रणम्य हृष्टरोमाणो यथाप्रोत्फुल्लपङ्कजम् ।
तुष्टुवुर्विविधैः स्तोत्रैर्ब्रह्मविष्णुपुरोगमाः ।
हाटकेश्वरनामासीत् पाताले यो व्यवस्थितः ॥ ९ ॥
निर्गतश्शूलमार्गेण तेनशूलेश्वरःस्मृतः । धूतपापश्चतीर्थञ्च देवदेवस्य चोत्तरे ॥ १० ॥
तत्र पापस्सदैत्येन्द्रो धूतश्शूलेनवीर्यवान् । तेनतीर्थमिदंव्यास धूतपापम्प्रचक्ष्यते ॥
अष्टम्यां वा पौर्णमास्यां चतुर्दश्यां शनौ तथा ।
उपोष्य रजनीमेकां शिवभक्तो जितेन्द्रियः ॥ १२ ॥
धूतपापेतुयः पश्येद्देवदेवं महेश्वरम् । विमुक्तस्सर्वपापेभ्यः सप्तजन्मकृतैरपि ॥
कुलानांशतमुद्धृत्यशिवलोकंसगच्छति । कृत्वाभिषेकंयःपश्येत् पौषेमासिसवैनरः
शूलेश्वरप्रभावेण मुच्यते ब्रह्महत्यया । विमानानां सहस्रेण मृतोयाति परम्पदम् ।
इतिचान्धकशूलोयं यावद्भोगवतींगतः । तावत्समुत्थिताघोरा असुरारुधिरोद्भवाः
खड्गहस्ता महावीर्या अनेकशतसङ्ख्यया ।
चतुर्दिक्षु स्थितैर्घोरैर्हन्यमानो महेश्वरः ॥ १७ ॥
सिंहनादंमुमोचाथ पीडितस्तैर्दुरात्मभिः । सिंहनादेनतेपापा मूर्च्छिताःपतिताभुवि
पुनःसमुत्थिताजग्मुर्देवदेवं महेश्वरम् । वित्रस्ताश्च ततोदेवा ब्रह्मविष्णुपुरोगमाः
असाध्यांस्तांस्तथा मत्वा मन्त्रं कृत्वा हितैषिणः ।
ततो देवा विचार्याथ स्त्रीं सृजाम इति स्वयम् ॥ २० ॥
इत्युक्त्वोपादयामास ब्रह्मा हंसासनां शुभाम् ।
चतुर्वक्त्रां चतुर्हस्तां ब्रह्माणीरूपधारिणीम् ॥ २१ ॥
कुमारश्चैवकौमारीं मयूरवरवाहनाम् । रक्तमाल्याम्बरधरां शक्तिखड्गंचधारिणीम् ।
पुनःकुमारः कौमारीं पक्षीन्द्रवरवाहनाम् । कृष्णांकरालदशनां धर्मराजस्तथासृजत् ।
दैत्यदेहप्रमथिनीं दण्डमुद्गरधारिणीम् । ललाटलोचनां नीलां कपालकरभूषिताम्
सिंहाननधरां कृष्णां सर्वभूषणभूषिताम् ।

कर्तृहस्तां सखट्वाङ्गां खड्गखेटकधारिणीम् ॥ २५ ॥
चर्मास्थिकेशवपुषं चामुण्डामसृजत्प्रभुः । वटस्यनिकटेपूर्वं निर्मितालोकमातरः
ततो लोकेषु विख्याताः प्रत्यक्षा वटमातरः ।
तत्र स्नात्वा शुचिर्भूत्वा यस्तु पश्यति मातरः ॥ २७ ॥
समुक्तस्सर्वपापेभ्यो मातृलोकेमहीयते । सिंहनादोऽपिदेवेन कृतो यत्र महावने ॥
तत्र सिंहेश्वरो देवस्सर्वदुष्कृतनाशनः । दर्शनात्तस्यदेवस्य सिंहवत्सबलीभवेत् ॥
सिंहनादेकृते यत्र जातंकण्टकितम्वपुः । तत्र कण्टेश्वरोदेवो भक्तानां सर्वदासदा ॥
तत्र तीर्थे नरः स्नात्वा दृष्ट्वा कण्टेश्वरं शिवम् ।
गृहभूतपिशाचेभ्यो न भयं प्राप्नुयात्क्वचित् ॥ ३१ ॥
तत्रतामातरस्सर्वा आदिष्टास्तुहरेणवै । अन्धासुरस्य रौद्रस्य पिबध्वंरुधिरंद्रुतम्
एतस्मिन्नन्तरे व्यास! प्रज्वलज्ज्वलनोपमम् ।
अभयं शक्र!मा भैस्त्वं यत्रोवाचेति शङ्करः ॥ ३३ ॥
तत्र लिङ्गं समुद्भूतमभयेश्वरमुत्तमम् । वन्दितंदेवगन्धर्वैः सिद्धविद्याधरोरगैः
तत्र स्नात्वा शुचिर्भूत्वा सोपवासो जितेन्द्रियः ।
अर्चयेद्देवदेवेशमश्वमेधफलं लभेत् ॥ ३५ ॥
भूतप्रेतपिशाचेभ्यो न भयं विद्यतेक्वचित् । सिंहयुक्तेनयानेन शिवलोकंसगच्छति
अन्धकस्यतुयामाया रक्तासुरसमुद्भवा । मातृभिर्युध्यमानाभिः क्षयमाशुजगामसा
देव्यःपिबन्त्योरक्तं वै दैतेयतनुतस्सृतम् । प्रतृप्तिंपरमां जग्मुर्नतुतृप्तालालाटजाः ॥
हतमायः शिप्रकस्तु भिन्नशूलतनुच्छदः । उत्तराभिमुखं शूलमन्धकोऽकर्षयद्बली
संनिरुद्धोमहादेवो वारितोगणपेनसः । महाविनायकः ख्यातस्तस्माल्लोकेऽभवन्मुने
दर्शनात्तस्यदेवस्य नविघ्नैः पीड्यतेनरः । मासेमासेचतुर्थ्यांयो गणेशंपूजयेद्द्विज
नतस्यविघ्नं जायेदि (तइ) हलोकेपरत्र च । स्वेदबिन्दुरथोतस्य ललाटादपतद्भुवि
तस्मादङ्गात्ततो जातो रक्तमाल्यानुलेपनः ।
आवन्त्ये विषये जातो लोहिताङ्गो धरासुतः ॥ ४३ ॥

अङ्गारकस्तु रक्ताक्षो महादेवसुतस्तथा । नामभिर्ब्राह्मणैस्स्तुत्वाग्रहमध्येऽपिरोपितः
तत्रतीर्थमथोत्पन्नमङ्गारेश्वरमुत्तमम् । ब्रह्मणास्थापितं लिङ्गं गणगन्धर्वसेवितम्
शुचिस्तत्र च यस्स्नाति नरस्त्वङ्गारवासरे ।
दृष्ट्वाऽङ्गारेश्वरं सोऽथ मुच्यते सर्वपातकैः ॥ ४६ ॥
चतुर्थ्यामङ्गलदिने नक्तेचार्घंनिवेदयेत् । यावत्पूर्णाश्चतस्रः स्युस्तावत्कार्यंनप्रयत्नतः
पञ्चवैकरकाः कार्यास्ताम्रपात्रेणसंयुताः । गुडपिण्डमयाःकार्या रक्तवस्त्रसमन्विताः
रक्तचन्दनसंयुक्तारक्तपुष्पैश्च पूजिताः । तिलतण्डुलसम्पूर्णमेकं तत्रैवकारयेत् ॥
द्वितीयं लड्डुकश्चैव तृतीयं पयसा तथा ।
तीर्थाम्बुभिश्चतुर्थश्च पञ्चमं मूलकैस्तथा ॥ ५० ॥
कृत्वाह्येवंविधानेन मन्त्रेणार्घ्यं निवेदयेत् । कुजायलोहिताङ्गाय ग्रहमध्यस्थितायच
कार्त्तिकेयानुरूपाय सुरूपायनमोनमः । शिवललाटसम्भूत! धरणीगर्भसम्भव ॥ ५२
रूपार्थं त्वां प्रपन्नोऽस्मि गृहाणार्घ्यं नमोऽस्तु ते ।
ज्वलिताङ्गारवर्णाभ!स्निग्धविद्रुमभासुर! ॥ ५३ ॥
पुत्रार्थं त्वां प्रपन्नोऽस्मि गृहाणार्घ्यं धरात्मज ।
आवन्त्यमण्डले जातो धरण्याश्च शिवेन वै ५४ ॥
धनंदेहियशोदेहि रूपंदेहि नमोऽस्तुते । एवं सम्पूजिते भौमे चतुर्थ्यां द्विजसत्तम
भुक्त्वा भोगांस्तथा पुत्रान् प्राप्य वै क्षितिमण्डले ।
मृतस्स्वर्गमवाप्नोति यावदिन्द्राश्चतुर्दश ॥ ५६ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डेऽङ्गारेश्वरमाहात्म्यं नामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

एकोनपञ्चाशत्तमोऽध्यायः

अन्धकवृत्तान्तवर्णनम्

सनत्कुमार उवाच

नास्तिशेषंयदारक्तंपीयमानञ्चरक्षसाम् । चामुण्डायास्ततोरक्तमभूदास्यञ्चभास्वरम्
कृष्णंभूतान्तकल्पान्तकरालदशनाधरम् । प्रज्वलद्वह्निकेशान्तंज्वलज्ज्वालनलोचनम्
घोरघुर्घुरनिर्घोषस्फीतफेत्कारविस्वरम् ।
तार्क्ष्यपक्षकृतापीडं तीक्ष्णदंष्ट्राङ्कुरोज्ज्वलम् ॥ ३ ॥
तस्मिन्मुखेकपालाग्रं निधायरुषिताननाः । अपिबद्रुधिरञ्चण्डी चण्डदोर्दण्डमण्डिता
तयापिबन्त्यादैत्येन्द्रशरीरेकृशतांगतः । सर्वाःसंहृत्यमायाया बलक्षीणमथाकरोत् ।
तीव्रंभयंसमासाद्य प्राणत्राणपरायणः । दृष्ट्वानान्यांगतिंलोके दैत्यस्तुष्टावशङ्करम्
कृताञ्जलिपुटोभूत्वारोमाञ्चितशरीरकः । सात्त्विकंभावमापन्नस्त्यक्त्वाचैवरजस्तमः
लोकानां कारणं देवं विबुधाधिपतिं विभुम् ।
शश्वद् बुध्यान्वितो भक्त्या निर्मलेनान्तरात्मना ।
श्लाघ्यं शिवं च तुष्टाव देवं चन्द्रार्द्धशेखरम् ॥ ८ ॥
कृत्स्नस्य योऽस्यजगतः सचराचरस्य कर्ता कृतस्य चतथा सुखदुःखदाता ।
संसारहेतुरपि यः पुनरन्तकालस्तं शङ्करं शरणदं शरणं व्रजामि ॥ ६ ॥
यं योगिनोविगतमोहतमोरजस्का भक्त्यैकतानमनसो विनिवृत्तकामाः ।
ध्यायन्ति चाखिलधियोऽमितदिव्यमूर्त्तिं तं शङ्करं शरणदं शरणं व्रजामि १०
यश्चन्द्रखण्डममलं विलसन्मयूखं बद्ध्वा सदा सुरधुनीं शिरसाबिभर्ति ।
वामाङ्कके विधृतवान्गिरिराजपुत्रीं तं शङ्करं शरणदं शरणं व्रजामि ॥ ११ ॥
यस्सिद्धचारणनिषेवितपादपद्मो गङ्गांमहोर्मिविषमां गगनात्पतन्तीम् ।
मूर्ध्नादधेस्रजमिव त्रिजगत्पुनन्तीं तं शङ्करं शरणदं शरणं व्रजामि ॥ १२ ॥

कैलासगोत्रशिखरेपरिकम्पमाने कैलासशृङ्गसदृशेनदशाननेन ।
यःपादपद्मपरिपीडनसेव्यमानस्तं शङ्करं शरणदं शरणं व्रजामि ॥ १३ ॥
दक्षाध्वरे तु नयने च तथा भगस्य पूष्णस्तथादशनपङ्क्तिमशातयद्यः ।
व्यस्तम्भयत्कुलिशहस्तमथेन्द्रमीशं तं शङ्करं शरणदं शरणं व्रजामि ॥ १४ ॥
येनासकृद्दितिसुताश्चदनोस्सुताश्च विद्याधरोरगगणाश्च वरैः समग्राः ।
संयोजिता मुनिवराः फलमूलभक्षास्तं शङ्करं शरणदं शरणं व्रजामि ॥ १५ ॥
एवंकृतेऽपि विषयेष्वपि सक्तभावा ज्ञानेनचश्रुतगुणैरपि येन युक्ताः ।
यं संश्रितास्सुखभुजः पुरुषाः भवन्ति तं शङ्करं शरणदं शरणं व्रजामि ॥ १६
ब्रह्मेन्द्रविष्णुमरुतां च सषण्मुखानां योऽदाद्वरान्सुबहुशोऽभगवान्महेशः ।
सूतश्च मृत्युवदनात्पुनरुज्जहार तं शङ्करं शरणदं शरणं व्रजामि ॥ १७ ॥
आराधितस्तु तपसा हिमवन्निकुञ्जे धूम्रावृतेन तपसाऽपिपरैरगम्यः ।
सञ्जीविनीमदितयोभृगवेमहात्मा तं शङ्करं शरणदं शरणं व्रजामि ॥ १८ ॥
क्रीडार्थमेव भगवान्भुवनानि सप्त नानानदीविहगपादपमण्डितानि ।
सब्रह्मकानि ससृजे सुकृताभिधानि तं शङ्करं शरणदं शरणं व्रजामि ॥ १९ ॥
यःसव्यपाणिकमलाग्रनखेन देवस्तत्पञ्चमं प्रसभमेव करालरन्ध्रम् ।
ब्राह्मयं शिरस्तरणिपद्मनिभश्चकर्त तं शङ्करं शरणदं शरणं व्रजामि ॥ २० ॥
ये त्वां सुरोत्तमगुरुं पुरुषा विमूढा जानन्ति नास्यजगतः सचराचरस्य ।
ऐश्वर्यमानविगमेन महेश!पश्चात्ते यातनामनुभवन्ति यथा हमेव ॥ २१ ॥
यःपठेत्स्तवमिदं शुचिकर्मा यः शृणोति सततं शिवभक्तः ।
विप्रसंसदि सदाशुभकर्मा स प्रयाति शिवलोकमखण्डम् ॥ २२ ॥

सनत्कुमार उवाच

तस्यैवंस्तुवतोदेवः शूलपाणिर्वृषध्वजः । पूर्णेवर्षशतस्यान्ते प्रीतःप्रोवाचशङ्करः ॥
पुत्र!तुष्टोस्मिभद्रन्तेजातस्त्वंनिर्मलोऽधुना। दिव्यंददामितेचक्षुभ पश्यमांविगतज्वरः
यच्च ते मनसा वापि किञ्चिचाकाङ्क्षितं फलम् ।

तत्ते (तत्तत्) सर्वं प्रदास्यामि ब्रूहि दानवसत्तम! ॥ २५ ॥

अन्धक उवाच

ब्राह्मयं वैष्णवमैन्द्रं वापद्मावृत्तिलक्षणम् । विदितं मम तत्सर्वं मनागपिनकाङ्क्षये
यदितुष्टोऽसिदेवेश गाणपत्यंददस्वमे । सविशेषं विशुद्धश्च तदक्षरश्चसर्वदा ॥ २७

शिव उवाच

अमरोजरयात्यक्तःसर्वदुःखविवर्जितः । भविष्यसिगणाध्यक्षस्सर्वलोकनमस्कृतः
कामरूपोमहायोगी महासत्त्वोमहाबलः । अणिमादिगुणैर्युक्तः प्रियश्च ममसर्वदा

सनत्कुमार उवाच

ततश्च सोऽन्धकः श्रीमान् वराँल्लब्ध्वा सुदुर्लभान्
महादेवगणो भूत्वा तत्रैवान्तरधीयत ॥ ३० ॥

गतेऽन्धके ततो देव्यो ब्रह्माण्याद्यास्समागताः । स देवोयत्रभगवानन्धकस्यवरप्रदः
तास्तुष्टुवुर्महादेवमथतुष्टो महेश्वरः । चामुण्डापि महेशेन समाश्वस्ताशिवाभवत्
शङ्करंप्रणतंदृष्ट्वातासामग्रेव्यवस्थितम् । ब्रह्मादयोऽपि ते देवास्तुष्टुवुर्विविधैस्स्तवः

प्रशान्तास्ता यदा दृष्टाः शम्भुना रुधिराशनाः ।
तदावोचदिदं वाक्यं तासां स्थित्यर्थमुत्तमम् ॥ ३४ ॥
आवन्त्यविषये सर्वा यस्माज्जाता महाबलाः ।
आवन्त्यमातरस्तस्मात् ख्याता लोके भविष्यथ ॥ ३५ ॥
अवन्त्यां प्रीतिसम्पन्नास्सर्वपापप्रणाशिकाः (नीः ?) ।
स्थिरा वसन्त्यो लोकानां वरदाश्च भविष्यथ ॥ ३६ ॥
श्रावणस्य तु मासस्यामावस्यायां समाहिताः ।
ये द्रक्ष्यन्ति सदा भक्त्या ते गां लोका महोदयाः ॥ ३७ ॥

अपुत्रोलभते पुत्रान् धनार्थी लभते धनम । रूपवान्सुभगोभोगी सर्वशास्त्रविशारदः
हंसयुक्तेनयानेन पितृलोके महीयते । पुरीमिमाश्चरक्षध्वं कल्पे कल्पे क्रमेण तु
एवमुक्त्वाच देवेशो गतःकैलाशपर्वतम् । स्तूयमानोगणैरौद्रैर्दैत्यामरगणेश्वरैः ॥

असुरसुरगणानां नायकस्यानुकीर्त्ति कथयति कथनीयां श्रद्धया यः श्टणोति ।
सकलसुखनिधानं रुद्रलोकं सकान्तं सुरगणदनुनाथैरर्चितं यात्यनन्तम् ॥ ४१ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डेऽन्धकवृत्तान्तं नामैकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

पञ्चाशत्तमोऽध्यायः

महाकालमाहात्म्यवर्णनम्

व्यास उवाच

भगवन्!क्षेत्रमाहात्म्यंकथितञ्चयथातथम् । तीर्थानामुत्तमंतीर्थंपुण्यानांपुण्यवर्द्धनम्
कतिसन्त्यत्रतीर्थानिलिङ्गानिचतथाकति । कथयस्वप्रसादेनपृच्छतोममसाम्प्रतम्

सनत्कुमार उवाच

षष्टिकोटिसहस्राणि षष्टिकोटिशतानिच । महाकालवनेव्यास! लिङ्गसंख्यानविद्यते
अकामोवासकामोवा जायते योऽत्रमानवः । महाकालवनेरम्ये शिवलोके महीयते
कृतकामादितीर्थानिप्रासादायतनानिच । तेषुस्नात्वाशुचिर्भूत्वा शिवलोकेमहीयते
पुण्यानि सर्वतीर्थानिसिद्धक्षेत्राणिसर्वतः । तेषांमुख्यतमंविद्धिक्षेत्रंतीर्थंतथोत्तमम्
यः श्टणोति महाभक्त्या स याति परमां गतिम् ॥ ७ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्ताखण्डे महाकालमाहात्म्यवर्णनं नाम पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

एकपञ्चाशत्तमोऽध्यायः

उज्जयिन्याःकनकशृङ्गेतिख्यातिहेतुवर्णनम्

व्यास उवाच

भगवन्भवता सर्वं भवभीतिविनाशकम् ॥ १ ॥
ईश्वरस्थानमाख्यातं समंतात्साग्रयोजनम् । यत्रक्षेत्रेमृतामर्त्या सदाचारास्तथेतरे
विमानस्थाःपुरेनूनमैश्वरे ते वसन्ति च । यत्र कीटपतङ्गाद्या मृतायान्तिपरांगतिम्
किं तीर्थंपुण्यमन्यच्च महाकालवनादृते । तस्माद्ब्रूहिममैकंतु प्रश्नंतथ्येनसाम्प्रतम्
कथं कनकशृङ्गेतिख्याताह्येषापुरामुने! । कुशस्थलीकथन्नामतथाऽवन्तीकथंस्मृता
पद्मावती कथं साधो! कथमुज्जयिनी तथा । नाम्नांहेतुमथाप्येषां ब्रूहित्वंमुनिसत्तम

सनत्कुमार उवाच

श्टणु व्यास प्रवक्ष्यामि यथापूर्वं विरञ्चिना । कथितंवामदेवाय गौरकल्पे पुरातने
महेश्वरश्च भगवान् विधाता चात्र हेतुषु । (महेशेन भगवता विधिश्चैवात्रहेतुतः)

व्यास उवाच (?)

जगत्यां स्वश्च्युतानाञ्च कुतोनिवसतां सुखम् ॥ ८ ॥
स्वर्गप्राप्तिश्च भवति स्वेच्छाचारविहारिणाम् ।
कोऽति पुण्यतमः श्रेष्ठः प्रदेशः पापहारकः ॥ ९ ॥
कुतोनिर्वृतिर्भगवान्जायतेवसतांकचित् । वसतामपिलोकेशै हिकीपारलौकिकी
एतन्मे भगवन्ब्रूहि हितार्थं सर्वदेहिनाम् ।

सनत्कुमार उवाच

एवमादौ पुराकल्पे प्रोक्तःपृष्टः स शम्भुना ॥ ११ ॥
प्रोवाच पार्वतीकान्तं प्रभुः प्रीतः पितामहः । भगवन्सर्वकर्तात्वं सर्वदर्शीसदाशिवः
अजानन्निवत्वं सर्वं मांपृच्छसिसनातन । यत्रकल्पान्तकोवह्निरधिज्वालःप्रतिष्ठितः

स त्वमेव महाकाल सर्वं चज्ञायते त्वया । नाथ!ये मानवास्तत्र सदाचारास्तथापरे
निवसन्तिनतेमर्त्या सुरास्ते न च मानुषाः । लभन्तेचपुनः स्वर्गं मृतावैकालपर्यये
वर्ततेचपुरीतत्ररम्यहर्म्यासुशोभना । तस्यांभान्तिविचित्राणिहर्म्याणिविविधानिच

स्वर्णशृङ्गाश्च प्रासादाः विहिता विश्वकर्मणा ।
देवास्सन्ति सदा यत्र तथानी विविधानि च ॥ १७ ॥

पूर्वकल्पेस्थितोऽहञ्च यत्रत्वं केशवस्तथा । तामेवचपुरींद्रष्टुं सर्वेलोकाह्यवन्तिकाम्
तथादेवर्षयःसिद्धा यक्षकिन्नरदानवाः । आजग्मुस्स्थाणुनासार्द्धंवेधसा पद्मयोनिना
तथैवचवरानार्य्यो देवानामपिवल्लभाः । समायेतुःसहस्राणि द्रष्टुमत्यद्भुताम्पुराम्
आगत्यचतदादेवः सहदेवैर्महेश्वरः । वीक्षितुंनगरींरम्यामपश्यदावृतांतथा ॥ २१
प्रासादैस्स्वर्णशृङ्गाढ्यैर्मणिरत्नविभूषितैः ।विश्वरूपोहिभगवान्राजाविश्वैकनायकः
तत्रास्ते शोभनेदिव्येप्रासादेमणिभूषिते । सेव्यमानस्सुरैस्सिद्धैर्मुनिविद्याधरोरगैः

ततो महेशश्च पितामहश्च समेत्य तं विश्वपतिं ववन्दतुः ।
समर्चितौ तौ विधिना समादरात् सहानुगावागमनंत्वपृच्छत् । २४ ॥
किमागतौ वै त्रिदिवान्महीतलं सहानुगावीशकजेश कथ्यताम् ।
ततस्तु तावूचतुरब्जजेश्वरौ भवान्नहो यत्र च तत्र नौरतिः ॥ २५ ॥
त्वया विना नैव सुरालये सुखं मही तले वापि रसातलेऽस्ति ।
कदा त्वया काञ्चनशेखरापुरी निवेसिता वेशमवती विचित्रा ॥ २६ ॥

हरिरुवाच

त्वदर्थमेवेश विशेषशालिनी सृष्टाहिवै सर्वगुणाकरा मया ।
प्रयच्छ स्थानं त्वमिहावयोरिह ततो जगादाशु प्रसन्नमानसः ॥ २७ ॥
ददाम्यभीष्टं युवयोरिहालयं प्रजापतेरुत्तरतस्तव स्थितिः ।
महेश्वर!त्वं व्रजदक्षिणालयं स्थानं सुदत्तं युवयो सुशोभनम् ॥ २८ ॥

महाकालोह्यधोज्वाल अगादात्मप्रभुस्सदा । गणैरनेकसाहस्रैरावृतः परमेश्वरः
क्रीडिता नगरीसृष्टा सर्वभूतहितैषिणा । मयायद्युवयोर्दत्ता विहायाचलमात्मनः

भवद्भ्यां हेमशृङ्गेति यस्माच्च समुदीरिता ।
पुरी कनकशृङ्गेति लोके ख्याता भविष्यति ॥ ३१ ॥

एवं कनकशृङ्गेति प्रथमन्नाम कथ्यते । जपन्तश्च स्थितायत्र ब्रह्मविष्णु महश्वराः ॥

नित्यं रमन्ति भक्तानां सर्वाभीष्टफलप्रदाः ॥ ३३ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्ताखण्डे
कनकशृङ्गाभिधानवृत्तान्तवर्णनंनामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

द्विपञ्चाशत्तमोऽध्यायः

कुशस्थलीनामकथाहेतुवर्णनम्

सनत्कुमार उवाच

शृणु व्यास!यथेयन्तुप्रोच्यते हि कुशस्थली । कल्पेतत्पुरुपे पूर्ववेदविद्भिर्मनीषिभिः
वेधसासृजितंविश्वं दैत्यदानवराक्षसम् । अन्योन्यमदसंसक्तमन्योन्यद्वेषिणंसदा ॥
देवाश्चदानवासङ्ख्येनित्यंस्पर्द्धासमन्विताः।मनुष्यामनुजैःसार्द्धंसिद्धाविद्याधरैस्सह
चारणाःकिन्नरैस्सार्द्धंवर्तन्तेःद्वेषतत्पराः । युद्धंकुर्वन्तिसततं संविस्पष्टार्थयागिरा
सर्वेचैवंतुबलिनो दुर्बलैर्मनुजै सहः । पशवः पशुभिस्सार्द्धं पक्षिणस्सह पक्षिभिः
एवमन्योन्यमन्यैश्च निर्मर्यादमिदञ्जगत् । तस्माद्विश्वस्यकर्तारंविष्णुंविश्वेश्वरंपरम्
व्रजामि शरणं देवं शरणार्त्तिहरं हरिम् ।एवं मनसि सन्धाय दध्यौध्यानेन माधवम्
ततो ध्यातोमहायोगी विश्वरूपधरोहरिः । लोहदण्डधरःश्रीमानिदमाहपितामहम्

ब्रह्मन्ध्यातस्त्वया सम्यक् ध्यानयोगेन पश्य माम् ।
समायान्तं यथाध्यातं जनतां पातुमुद्यतम् ॥ ६ ॥
ततो धाता निशम्यैतत्त्यक्त्वा ध्यानमवेक्ष्य च ।
समुत्थायैकमनसा नमश्चक्रेऽर्चयन्पुरः ॥ १० ॥

पाद्येनाचमनायेन मधुपर्केणकेशवम् । पूजयित्वा पुनर्वाक्यमुवाचाच्युतमब्जजः ॥

ब्रह्मोवाच

देवदेवजगन्नाथ जगत्सृष्टमिदं मया । ऋतेत्वया हरेविष्णो! नैवावस्थातुमर्हति ॥
शास्ता त्वमस्य विश्वस्यक्शुिद्धस्य च नापरः ।
त्वत्तोस्तीदं जगत्सर्वं तस्मात्त्वमनुशासय ॥ १३ ॥

देवदानवगन्धर्वाः सयक्षोरगराक्षसाः । परस्परंविनिघ्नन्ति तांश्चत्वंरक्षितुंक्षमः ॥
त्वामृते पुण्डरीकाक्ष! व्यापिताशेषविग्रहम् ॥ १४ ॥
त्वमस्य विश्वस्य चराचरस्य स्थितःसदाप्राणभृदात्मरूपी ।
त्वया धृतं सर्वमिदंजगद्वै यतस्ततोऽसि त्वमुपेन्द्रसञ्ज्ञः ॥ १५ ॥
प्रवेशनव्याप्तिविधायकोऽसि त्वमुच्यसे विष्णुरतो मुनीन्द्रैः ।
निवासितं विश्वमिदंत्वयायद्वसेश्चधातोरिति वासुदेवः ॥ १६ ॥
तवानुगं विश्वमिदं विभुस्त्वमशेषविश्वस्य विभासि राजा ।
सेनानुरूपं जगदेव यस्मादतः स्मृतस्त्वं किल विश्वसेनः ॥ १७ ॥
विलेखनादस्य चराचरस्य कृषेश्च धातोस्त्वमतोऽसि कृष्णः ।
जितन्त्वयादेवजगत्त्रयं यज्जयेश्च धातोस्त्वमतोऽसिजिष्णुः ॥ १८ ॥
तस्मात्समस्तं ग्रहलोकपालं जगत्त्वतैल्लयसर्वकालम् ।
त्वमस्य सर्वस्य भवादिराजा (जस्त) वास्तुभद्रासनमद्वितीयम् ॥ १९ ॥
प्रदक्षिणावर्तन अस्ति शङ्खः करस्थितोऽतः पुरुषोत्तमोऽसि ।
सुदर्शनन्नामतवास्तिचक्रं चक्री ह्यतस्त्वं ह्यपरस्त्वचक्री ॥ २० ॥
ध्वजोऽस्ति देवस्यसुपर्णसेवितस्तथासुवर्णच्छदनोस्तिवाहनम् ।
तुरङ्गमाःसन्ति तवारिसंहरास्तथा हृषीकेश!सुमत्तदन्तिनः ॥ २१ ॥
किरीटनिष्काङ्गदकर्णपूर केयूरहारोत्तमहेमसूत्रैः ।
विचित्रवस्त्रोत्तररक्तमाल्यैर्विभूषितस्त्वं भवभीमसेन (:) ॥ २२ ॥
श्रिया कदाचिच्च न मुच्यते भवान् भवन्ति ते नित्यमनन्तसम्पदः ।

तवानुगा भक्तिरिहास्तु वै सतांमुकुन्द भक्तो!त्वमतः प्रसीद ॥ २३ ॥

सनत्कुमार उवाच

स एव मुक्तस्तु पुरो दिवौकसां विभुःप्रसन्नस्त्विदमब्रवीद्धरिः ।
विरञ्चि मे दर्शय शुद्धमण्डलं त्वया विमुक्तं च सदाशिवं विभो! ॥ २४ ॥
स्थिरःस्थितोयत्र जगत्करोम्यहं ततो विरञ्चिःकुशमुष्टिमाददे ।
पवित्रदेशस्य निदर्शनाय जगाम पुण्यश्च (ञ्चय) वनाश्रमं तदा ॥ २५ ॥
संमन्त्र्य देवैःसहितोमुकुन्दस्ततः स्थलीमुत्तरामवाप्य वै ।
पितामहः केशवमाहचादरात्त्वदुद्ध्वा यात्रपवित्रमण्डलम् ॥ २६ ॥
त्वमेवविष्णुर्विबुधार्चितस्सदास्मृतोमुनीन्द्रैःस च विष्टरश्रवाः ।
निषीदविश्वेशकुशैः कुशेश्वर! तदाश्रितो माधव एवमुक्तः ॥ २७ ॥
ततो विधाता भगवान् पुराणःपुरुषोत्तमः ।
कुशस्थली तु तस्यास्तु चक्रतुर्नाम तावुभौ ॥ २८ ॥
तत्र विश्वपतिः श्रीमान् विश्वेशो विश्वकृद्विभुः ।
विश्वं शशास विश्वात्मा सर्वविश्वविनायकः ॥ २९ ॥
एवं कुशस्थली ख्याता हेमशृङ्गेति या पुरा ।
व्याप्ता कुशैर्यतो धात्रा कुशस्थली ततः स्मृता ॥ ३० ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
कुशस्थलीनामहेतुकथनं नाम द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

त्रिपञ्चाशत्तमोऽध्यायः

अवन्तीक्षेत्रमाहात्म्येऽवन्त्यभिधानकथामाहात्म्यवर्णनम्

सनत्कुमार उवाच

पुरा चेशानकल्पे तु स्मृताऽवन्ती यथापुरी। तथाश्रृणुसुरैःसवदैन्यसैन्यपराजितैः
आश्रितम्मेरुशिखरंवनकुञ्जगुहावृतम्। तत्र गत्वाद्विजश्रेष्ठ! मन्त्रंचक्रु समुद्यताः॥
अन्योन्यञ्च समासाद्य समभ्यर्च्य परस्परम्। जग्मुःसर्वेसुरगणा यत्रब्रह्माप्रजापतिः
वेदयाञ्चक्रिरेसर्वं तत्रागमनकारणम्। तेषांतद्वचनं श्रुत्वा देवानां स प्रजेश्वरः॥

जगाम त्रिदशैःसाकं देवदेवं महेश्वरम्।
स चापि ह्यगमत्तत्र वैकुण्ठे धाम यत्र वै॥ ५॥

ऋद्धिसिद्धिप्रदंनित्यं मुनिचारणसेवितम्। किन्नरैर्गीयमानञ्च ह्यप्सरोगणसेवितम्
ऋषिभिर्भार्गवाद्यैश्च देवर्षिनारदादिभिः। सिद्धगन्धर्वमुख्यैश्च कुमारैःसनकादिभिः
प्रजापतिगणाकीर्णं मानवैश्चचतुर्दशैः। वसुभिर्विश्वदेवैश्च पितृणामुत्तमैर्गणैः॥
सदासेव्यंसदाचारैःपुण्यवद्भिर्जनैस्तथा। दिव्यंदिव्याद्यभिप्रायंर्दिव्यपादपशोभितम्
मणिभीरत्नसोपानैःसरोदिव्यंसुशोभितम्। हंसकारण्डवाकीर्णंयत्रतिष्ठतिभास्वरम्
षडूर्मिरहितंस्थानं निर्वैरपशुपक्षिकम्। तत्र गत्वा सुराः सर्वे वासुदेवदिदृक्षया॥

स्तुतिमारेभिरे कर्तुं देवदेवजगत्पतेः।

देवा ऊचुः

नमोऽनन्ताय वृहते कूर्माय वै नमोनमः॥ १२॥

नृसिंहरूपायोग्राय नमोवाराहरूपिणे। राघवायच रामाय ब्रह्मणेऽनन्तशक्तये॥ १३
वासुदेवाय शान्ताय पशूनाम्पतयेनमः। नमोबुद्धायशुद्धायकल्किम्लेच्छान्तकारिणे

इति स्तवाभियुक्तानां वागुवाचाशरीरिणा।
श्रूयताम्भोसुरास्सर्वे सम्भूयैकाग्रमानसाः॥ १५॥

महाकालवनंरम्यं ब्रह्मर्षिगणसेवितम्। तत्रपुण्यापुरीह्येका सर्वकामफलप्रदा॥१६॥

नाम्ना कुशस्थली रम्या सिद्धगन्धर्वसेविता।
कल्पादौ कल्पमध्ये वा यत्र सन्निहितो हरः॥ १७॥

कल्पक्षयेक्षयंयान्तिस्थावराणिचराणिच। तीर्थानिचैवसर्वाणिपुण्यान्यायतनानिच
सरिताःसागराःसर्वे सरांस्युपवनानिच। औषधीर्वृक्षवल्यश्च यन्त्रमन्त्रशुभाशुभम्
ज्योतींषिचन्द्रसूर्यौच सर्वंविष्णुमयंजगत्। तेषांबीजंचपुण्यञ्च जीवकर्माशयंतथा
सर्वमादायभगवाञ्छङ्करस्तत्रतिष्ठति। सर्वतीर्थमयीगङ्गा सर्वदेवमयोहरिः॥
सर्वयज्ञमयोवेदःसर्वधर्ममयीदया। रेवाचसरितांश्रेष्ठा भुविपुण्यमयाधिका॥ २२॥
तस्माद्धितकरंक्षेत्रं कुरूणांवैसुरोत्तमाः। तस्माद्दशगुणंमन्ये प्रयागंतीर्थमुत्तमम्॥

तस्माद्दशगुणा काशी काश्या दशगुणा गया।
ततो दशगुणाप्रोक्ता कुशस्थल्यतिपुण्यदा॥ २४॥
उपरागसहस्राणि व्यतीपातायुतानिच।
अमालक्षं कुशस्थल्याः कलां नार्हन्ति षोडशीम्॥ २५॥

लक्षमिन्दुक्षयेदानं सहस्रंचायनद्वये। व्यतीपातेचकोटिःस्याद्राकायाञ्चह्यनन्तकम्॥

तस्माद्धितकरी देवाः पुरी ह्येषा कुशस्थली।
अनन्तानन्तसङ्ख्यातं दानं किञ्चित्कृतंनरैः॥ २७॥

श्रूयतामभोसुरश्रेष्ठाःसर्वंतच्चाक्षयंभवेत्। तस्मात्सर्वप्रयत्नेन यूयंयातहिमाचिरम्॥
क्षीणपुण्याभवन्तोवैबाधन्तेतेन चःसुराः। महाकालवनेरम्ये पुरीह्येषाकुशस्थली॥

तत्र गत्वा भवन्तोवै स्नानदानादिकम्भुवि।
आचरध्वं सुविधिना पुण्यात्स्वर्गमवाप्स्यथ॥ ३०॥
एतच्छ्रुत्वा वचस्तस्याः वाण्याश्चाकाशगाहिते।
प्रणम्य शिरसातस्यै ब्रह्माभवपुरोगमाः॥ ३१॥

पुनर्जग्मुसुरासर्वे यत्रमाहेश्वरंवनम्। पुरीञ्चैवद्विजश्रेष्ठ! सर्वकामफलप्रदाम्॥ ३२॥
चतुर्वर्णसमाकीर्णामृषिगन्धर्वसेविताम्। पुण्यवद्भिर्जनैः पूर्णांसिद्धचारणसेविताम्

दरिद्रोऽन्धजडोमूर्खो न रोगीनचमत्सरी । नव्याधिर्नापकारीच जनःक्वचित्प्रदृश्यते

दान्ताःशान्ताःसुशीलाश्च जरारोगविवर्जिताः ।
स्वधर्मनिरतानित्यं सदाचारातिथिप्रियाः ॥ ३५ ॥

निवसन्तिनरायत्र नार्यश्चैवपतिव्रताः । महोत्सवसुगीतानि हव्यकव्यंगृहेगृहे ॥
इदृशीश्चपुरींदृष्ट्वा देवाहर्षपरंगताः । तत्रतीर्थंसमाख्यातं नाम्नापैशाचमोचनम् ॥ ३७

पुण्यवद्भिःसदा सेव्यं सर्वतीर्थनिषेवितम् ।
तस्मिन्स्नात्वा च जप्त्वा च हुत्वा दत्त्वा च देवताः ॥ ३८ ॥
पुण्यं चाप्यक्षयं लब्ध्वा पुनर्याता सुरालयम् ।
जित्वा सुरान्महादुष्टान् स्थानं प्राप्ता स्वकं स्वकम् ॥ ३९ ॥

येऽवन्त्यान्तुमहाभागास्नानंदानंतथार्चनम् । हवनंतर्पणंचैव तत्सर्वंस्यादनन्तकम्
तस्मात्सर्वप्रयत्नेन एतत्कार्यंसदाबुधैः । देवतीर्थौषधीबीजं भूतानाञ्चैवपालनम् ॥
कल्पेकल्पेचयस्यांवैतेनावन्तीपुरीस्मृता । अद्यारभ्यपुरीह्येषानाम्नावन्तीकुशस्थली

इत्युक्त्वा वै तदा देवाःस्वधामपरमं गताः ।
तदारभ्यद्विजश्रेष्ठ! ह्यवन्ती भुवि विश्रुता ॥ ४३ ॥

यएताञ्चकथांदिव्यांपुण्यांवैपापहारिणीम् । शृणुयाच्छ्रावयेद्योवैसर्वपापैःप्रमुच्यते
अपुत्रोलभतेपुत्रमधनोधनमाप्नुयात् । वाजपेयसहस्राणां राजसूयशताधिकम् ॥

पुण्यं लब्ध्वा नरो नित्यं शिवलोके महीयते ॥ ४६ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
ऽवन्त्यभिधानकथनंनामत्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

चतुःपञ्चाशत्तमोऽध्यायः

उज्जयिनीतिप्रथाहेतुवर्णनम्

सनत्कुमार उवाच

एतस्मिन्नन्तरेव्यासयथासोज्जयिनीस्मृता ।तथाहंसम्प्रवक्ष्यामिश्रूयतांतत्समाहितः
त्रिपुराख्योमहादैत्यो सर्वदैत्यजनेश्वरः । तपस्तेपेसुदुर्द्धर्षं ब्रह्मणस्तुष्टिकारणात् ॥

आतपे चाग्निसेवी वै प्रावृष्याकाशसुस्थिरः ।
दमयित्वा तदात्मानं शीतकाले जलाशये ॥ ३ ॥

शीर्णपत्रजलाहारो वायुभक्षीनिराश्रयः । गायत्रीव्रतमास्थाय त्यक्तसर्वपरिग्रहः ॥
एवंवर्षसहस्रं तु तपस्तप्तंसुदुश्चरम् । पूर्णेवर्षसहस्रे तु ब्रह्माप्रीतमनाब्रवीत् ॥ ५ ॥
व्रियताम्भोसुरश्रेष्ठवरंमत्तोऽभिकाङ्क्षितम् । तत्सर्वंसाम्प्रतंलोकेवरंतुभ्यंददामिते
एवमुक्तःसविधिना दैत्यस्त्रिपुरसञ्ज्ञितः । उवाचवचनंसद्यो ब्रह्माणंशंसितव्रतम् ॥

त्रिपुर उवाच

यदितुष्टमनाः ब्रह्मन्वरम्मेदातुमिच्छसि । देवदानवगन्धर्वपिशाचोरगराक्षसैः ॥

अवध्योऽहं भवेयं वै वरमेतद् वृणोम्यहम् ।

ब्रह्मोवाच

एवं भवतु भोवत्स! विचरस्वाकुतोभयम् (यः) ।

इत्युक्त्वासहसाब्रह्मातत्रैवान्तरधीयत । तदारभ्यमहादैत्यो देवानांकदनंमहत् ॥
चकारकोपपूर्णोवै पूर्ववैरमनुस्मरन् । वासयित्वायत्रतत्र ग्रामाणिनगराणिच ॥

तत्र ये न्यवसन्सर्वे वर्णाश्रमपराजनाः ।
तेषां वै कदनञ्चक्रे नानोपायेन पापधीः ॥ १२ ॥

तस्मिन्पुरेदुष्टवासे ब्राह्मणावेदपारगाः । नजुह्वत्यग्निहोत्रंवै सोमपानंनकर्हिचित् ॥
कुतश्चित्सुकृतंकर्म नैवकुर्वन्तिभैरवाः । स्वाहाकारस्वधाकारवषट्कारविवर्जिताः

नोत्सवो दृश्यते गेहे कस्यचिद् भुवि विस्तृतम् ।

देवतायतनं नास्ति यत्र नो शिवपूजनम् ॥ १५ ॥

नास्ति यज्ञो न दानानि न गोब्राह्मणपूजनम् ।

सदाचारो जनो नास्ति दयादानविवर्जितः ॥ १६ ॥

नदानीनोपकारीचतपस्वीनैवदृश्यते। एवंव्यासपुरेतस्मिन्नष्टप्रायमिदंजगत् ॥ १७ ॥

प्रजानांब्राह्मणामूलं वेदमूलाहिब्राह्मणाः । वेदमूलपरायज्ञायज्ञमूलाहिदेवताः ॥

तस्माद्व्यासहतंसर्वं कृतंतेनदुरात्मना । तेनदेवगणाः सर्वे हतप्रायाहतौजसः ॥

विचरन्ति यथा मर्त्या भुवि तेन पराजिताः ।

अन्योन्यकृतसन्धाना मन्त्रं कृत्वा समाहिताः ॥ २० ॥

जग्मुस्तेतत्रयत्रास्ते प्रजापतिरकल्मषः । त्रिदशाः कथयामासुरात्मव्यसनकारणम् ॥

तज्ज्ञात्वा सहसोत्थाय ब्रह्मा लोकपितामहः ।

जगाम त्रिदशैःसार्द्धं महाकालवनोत्तमम् ॥ २२ ॥

यत्रास्तेसततंदेव उमयासहितःशिवः । यत्रावन्तीपुरीदिव्या सर्वतीर्थनिषेविता ॥

तत्रागत्यसुरैःसार्कं स्वयम्भूश्चतुराननः । स्नानंदानंजपंहोमं कृत्वारुद्रसरेतदा ॥

पूजयित्वा महाकालं ब्रह्मा वचनमब्रवीत् ।

ब्रह्मोवाच

देवदेव!महादेव! भक्तानामभयङ्कर! ॥ २५ ॥

श्रूयताम्भोसुरश्रेष्ठ! देवकार्यमनुत्तमम् । त्रिपुरोनामदैत्येन्द्रो देवानांकदनंमहत् ॥

करोतिसततंदैत्यो वेदब्राह्मणनिन्दकः । वासयित्वापुरत्रीणिविस्तीर्णानिचरत्यथ ॥

तत्र स्थितानि भूतानि नाशं यान्ति दुरात्मना ॥

एवं कृत्वा प्रजाःसर्वाः क्षयं नीताश्चराचराः ॥ २८ ॥

उद्वासितानिद्वीपानिग्रामाणिनगराणिच । ऋषीणामाश्रमाःसर्वेयतीनामाश्रमास्तथा ॥

एवं कृत्वा सुराःसर्वे भ्रष्टराज्याः पराजिताः ।

विचरन्ति यथा मर्त्यास्त्रिपुरेण दुरात्मना ॥ ३० ॥

ब्रह्म (मत्तो) लब्धवरो नित्यं व्रजत्येवाकुतोभयम् । (यः)

तस्मात्सर्वप्रयत्नेन वधस्तस्य विचिन्त्यताम् ॥ ३१ ॥

इति श्रुत्वा वचस्तस्य ब्रह्मणःशंसितात्मनः ।

चिरं ध्यात्वा महादेवो ब्रह्माणं तमुवाचह ॥ ३२ ॥

महादेव उवाच

श्रूयताम्भोसुरश्रेष्ठा ब्रह्मशक्रपुरोगमाः । जयोपायंकरिष्यामिदैत्यस्यास्यदुरात्मनः

तपश्चरतयूयंवै आत्मनोजयकाङ्क्षिणः । अवन्त्यांयद्धुतंदत्तंतत्सर्वंचाक्षयम्भवेत्

इत्युक्त्वासर्वदेवानां तत्रैवान्तर्हितःशिवः । गत्वाश्मशाननिलये भूतप्रेतनिषेविते

जयार्थंतस्यदैत्यस्य त्रिपुरस्यदुरात्मनः । उपासाञ्चक्रिरेतत्र चामुण्डायाःसुरेश्वराः

महिषैश्चमहामेध्यैः पशुपुष्पार्घतर्पणैः । बलिभिर्विविधैर्दानैर्धूपदीपाग्निहोत्रकैः

पूजयित्वातदादेवीं तामीडे वृषभध्वजः । दुर्गांभगवतींभद्रां दुर्गसंसारतारिणीम्

त्रिपुरान्तकरीं (कारिणीं) कृत्यां चण्डमुण्डवधोद्यमाम् ।

दैत्यान्तकां मदोन्मत्तां रक्ताख्यां रक्तदन्तिकाम् ॥ ३६ ॥

रक्ताम्बरधरांवीरांरक्तपुष्पावतंसिनीम् । महिषवाहिनीं श्यामां पद्मासनपरिग्रहाम्

द्वीपिचर्मपरीधानां शुष्कमांसातिभैरवाम् ।

पूजयित्वा प्रसन्नात्मा ध्यानमादाय (मास्थाय) संस्थितः ॥ ४१ ॥

तदा भगवती भद्रा ययेदंधार्यतेजगत् । प्रसन्नवदनाभूत्वा प्रत्यक्षं प्राहचण्डिका ॥

देव्युवाच

व्रियताम्भोसुरश्रेष्ठ! वरं मत्तोऽभिवाञ्छितम् ।

ददामि सर्वं त्वयोक्तं जगतामुपकारकम् ॥ ४३ ॥

श्रीहर उवाच

परितुष्टासिचेद्देवि देहिमेवरमुत्तमम् । येनहन्मिमहादैत्यं त्रिपुरं देवकण्टकम् ॥

श्रीदेव्युवाच

जयस्वैनंमहादैत्यं गृहाणपाशुपतंशरम् । मयादत्तंसुरश्रेष्ठदैत्यनाशकरम्परम् ॥ ४५ ॥

महापाशुपतं शस्त्रं करेकृत्वाच शङ्करः । उज्जहार तदाशम्भुर्दैत्यनाशायसत्वरम्
महाडम्बरिको भूत्वासर्वप्राणिभयङ्करः। स्तुतिंकृत्वाजयैःशब्दैः पृष्ठतोऽनुययुःसुराः
शरेणैकेनवैरुद्रो जघानतंमहासुरम् । मायिनंतंत्रिधाभित्त्वा मायायुद्धेनशङ्करः॥
पुनरागात्पुरीमेतामवन्तींसुरसेविताम् । जयाशिषंप्रयुञ्जाना ऋषयःसिद्धचारणाः
तुष्टुवुश्चतदादेवं जयशब्देनहर्षिताः । अप्सरानन्नृतुस्तत्र गन्धर्वाललितंजगुः॥
ववौतदापुण्यतमो वायुःसुखप्रदोनृणाम् । जयशब्दस्तदाजातः प्राणिनाञ्चगृहेगृहे

जज्वलुश्चाग्नयःशान्ताःशान्तादिग्जनितस्वनाः।
प्रवर्तन्ते तदा यज्ञा महोत्सवसदक्षिणाः॥ ५२॥
देवाः प्रपेदिरे स्थानं स्वकीयं पुनरावृतम।
उज्झितो दानवो यस्मात त्रैलोक्यं स्थापितं यतः॥ ५३॥
तस्मात्सर्वैःसुरश्रेष्ठ! ऋषिभिःसनकादिभिः।
स्थापितं नामावन्त्याख्यं सात्त्वतां पापनाशनम्॥ ५४॥

अवन्तीचपुराप्रोक्ता सर्वकामवरप्रदा। तत्प्रभृतिपुरीव्यास उज्जयिनीसमाश्रिता॥

येऽमुष्यां स्नानदानानि भुवि कुर्वन्ति मानवाः।
न तेषां दुष्कृतं किञ्चिद्देहे तिष्ठति पापजम्॥ ५६॥
विद्यार्थी गिरीशं धनार्थी धनेशं सुतार्थी सुरेशं दिनेशं सुखार्थी।
धियाऽर्थी गणेशं प्रियार्थी चशेषं गिरापूजमानोजनश्चोज्जयिन्याम्॥ ५७
य एतस्यां महाभाग! सदा वसति मानवः।
भुक्त्वा कामान्मनोभीष्टान्मृतःशिवपुरं व्रजेत्॥ ५८॥
तत्रैव वसते नित्यं कल्पकोटिशताधिकम्।
येनैषा च कथा पुण्या पठ्यते श्रूयतेऽथवा॥ ५९॥
मुच्यते सर्वपापेभ्यो गोसहस्रफलं लभेत्॥ ६०॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्ड-
उज्जयिन्यभिधानकथनंनामचतुःपञ्चाशत्तमोऽध्यायः॥ ५४॥

पञ्चपञ्चाशत्तमोऽध्यायः

पद्मावत्यभिधानहेतुकथनवर्णनम्

सनत्कुमार उवाच

अथातःसम्प्रवक्ष्यामि यथापद्मावतीतिसा। श्रूयतामादृतोव्यासबहुपुण्यकृतांकथाम्
एकदासर्वरत्नानां हानिर्जातादुरात्मभिः। धर्मग्लानिनिरोधश्चजातस्तैर्दुष्टदानवैः॥
तदासुरासुरैःसर्वैर्मिलित्वामथितोऽर्णवः। मेरुर्वंशोऽर्णवः पात्रं रज्जुर्वासुकिपन्नगः
कूर्मपृष्ठेऽचलंकृत्वारत्नानिदुदुहुस्तदा। आदौलक्ष्मीविनिर्याताकृष्णायप्रतिपादिता
तेनैवचविवादोऽभूद्देवदानवयोस्तदा। एतस्मिन्नन्तरे प्राप्तोनारदोदेवदर्शनः॥ ५॥
पारितः कलहस्तेन देवदैत्यसमुद्भवः। महाकालवनेतत्र पद्मासिन्धुसमुद्भवा॥ ६॥
सागरान्तेचरत्नानितिष्ठन्तिविविधानिच। तानिसर्वाणिचादाययावत्तुभ्यंददाम्यहम्
मथ्यतामुदधिःशीघ्रं नात्रकार्याविचारणा। पुनस्तेतूद्यमंचक्रूरत्नार्थंवैसुरासुराः॥
मथ्यमानेनिधौतेषांमणिःप्राप्तश्चकौस्तुभः। पारिजाततरुःपश्चात्सुराजातातःपरम्
धन्वन्तरिरथोत्पन्नश्चन्द्रोजातोपिवैततः। कामधेनुःसमाप्राप्तागजरत्नंततः परम्॥
उच्चैःश्रवाहयश्रेष्ठःसुधारम्भाततस्ततः। ततः परं शारङ्गं धनुःसर्वास्त्रसम्भवम्॥
पाञ्चजन्यनामाशङ्खः करेतिष्ठन्मुरद्विषः। निधिरेषमहापद्मो विषंहालाहलन्ततः॥
चतुर्दशानिरत्नानि प्राप्तानिविविधानिच। समादायगतास्तत्रयत्रमाहेश्वरंवनम्॥
गत्वातेतुसमासीना मन्त्रंचक्रुःसमुद्यताः। अहंपूर्वमहंपूर्वमितितेसमयन्त्रिताः॥
कोलाहलोह्यथोत्पन्नः पुनर्नारदअभ्यगात्। तेषांकलिमलंदृष्ट्वा विष्णुमाराधयत्ततः॥
मोहिनीरूपमास्थायनारीभूत्वाभ्यगाद्धरिः।अतिरूपवतींतन्वींतामालोक्यमहासुराः
विह्वलाङ्गाः कृताःसर्वे कामबाणवशंगताः। एतस्मिन्नन्तरेतेषां सुरान्दत्वासुरेश्वरः
हस्तलाघवयोगेन देवानाममृतंददौ। एतस्मिन्नन्तरेव्यास! राहुस्तद्रूपधारकः॥
तेषामन्तरतोभूत्वापपौचामृतमुत्तमम्। तज्ज्ञात्वाचद्रुतंविष्णुःशिरश्चक्रेणप्राच्छिनत्

सुधास्पर्शप्रसङ्गेन नममारासुरस्तदा । राहुःकेतुरितिख्यातो क्षेत्रेऽस्मिन्भुविसत्तम
राहुकायात्समुद्भूतंबहुसुस्त्रावशोणितम् । तस्मिन् क्षेत्रमहोत्तीर्थंजातंतद्दोषनाशनम्
तत्रस्नात्वाशुचिर्भूत्वा राहोर्दर्शनतत्परः । नतस्यजायतेकाचिद्राहुर्पीडाकदाचन
वाञ्छितार्थमवाप्नोति गोसहस्रफलंभवेत् । ततस्तानिचरत्नानि महाकालवनेसुराः
विभज्यभागंतेसर्वे ततोरत्नभुजोऽभवन् । मणिपद्मांधनुःशङ्खं ददौसातत्रविष्णवे ॥
सूर्यायचददौचाश्वं मोहिनीसाब्धिसम्भवम् । ऐरावतंगजश्रेष्ठं वासवायसमर्पयत्
दिविषद्गणांश्चपीयूषं ददौचन्द्रंचशम्भवे । पारिजातंतरुश्रेष्ठं रम्भाञ्चैववराङ्गनाम् ॥
इन्द्रःक्रीडावने रम्येनन्दने च समर्पयत् । ऋषीणाञ्चाददाद्धेनुं कामदोग्ध्रींयज्ञसिद्धये
निधिरेषमहापद्मः कुबेरभवनेगतः । यत्तद्धालाहलंप्रोक्तं विषंकेनापिनादृतम् ॥ २८ ॥
यतोयतः प्रसरति प्रलयंयान्तिजन्तवः । दधारतद्विषंशम्भुर्जगतां हितकाम्यया ॥
तत्प्रभृतिमहादेवो नीलकण्ठइतिस्मृतः । रत्नकुण्डेनरःस्नात्वा नीलग्रीवञ्चपश्यति
समुक्तःसर्वपापेभ्यो भवेच्चसर्वरत्नभुक् । शताश्वमेधिकंपुण्यं लब्ध्वाशिवपुरंव्रजेत्
तदादाय सुराःसर्वे ब्रह्मविष्णुपुरोगमाः । स्वयमूचुस्तदा व्यास!हर्षनिभरमानसाः
उज्जयिनीं समासाद्यजातारत्नभुजोवयम् । पद्मायाश्चनिवासेनयस्मात्सर्वसुखावहा
यस्मात्सर्वेषु कालेषु पद्मा वसतिनिश्चला ।
अद्यप्रभृतिपुर्य्येषा पद्मावतिरितिस्मृता । यएतस्यां महाभागा स्नानंदानंतथार्चनम्
तर्पणंचैवदेवानां पितृणांवा विशेषतः । नतस्यदुष्कृतं किञ्चिन्नदारिद्र्यंन दुर्गतिः
शतंकुलानिसर्वाणि तारयेन्निरयार्णवात् । धनार्थीवाचपुत्रार्थी विद्यार्थीबहुकामुकः
यत्र कुत्र स्थितोभूत्वा पद्मावतिरिति स्मरेत् ।
सर्वान् कामानवाप्नोति शिवःसाक्षाद्भवेन्नरः ॥ ३७ ॥
एतद्व्यासफलंनाम्नःकिञ्चिरंसेवनेनवै । ये शृण्वन्तिकथांपुण्यांयःश्रावयतिनित्यशः
न तस्य पातकं किञ्चिदश्वमेधफलं लभेत् ॥ ३९ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
पद्मावतीकथनं नाम पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

षट्पञ्चाशत्तमोऽध्यायः

कुमुद्वतीप्रभाववर्णनम्

सनत्कुमार उवाच

शृणुष्वावहितो व्यास कथां पापहरांपराम् । एषाकुमुद्वतीजाता यथापद्मावतीपुरा
... तथाहं सम्प्रवक्ष्यामि यथा मे लोमशोऽब्रवीत् ।

लोमश उवाच

शृणु वत्स! मया दृष्टा बहुपुण्यतमा पुरी ॥
एकदातीर्थयात्रायां गताहंवैकुशस्थलाम् । गुह्याद्गुह्यतमंस्थानं यत्रसन्निहितोहरः
यस्यदर्शनमात्रेण ब्रह्महत्या व्यपोहति । यत्रतत्र स्थिताविप्रा ब्रह्मघोषंच कुर्वते
यज्ञांश्चैवतथाचित्रानृत्विजोद्धारकर्मन । ऋषयश्च महाभागाः प्रकुर्वन्ति समाहिताः
ऋषिपत्न्यस्तथा साध्व्यः परिचारं (चर्यां) प्रकुर्वते ।
दश विष्णवश्च प्रख्यातास्तत्रैव निवसन्ति ते ॥ ७ ॥
रुद्राश्चैकादशप्रोक्ता द्वादशार्कास्तथैवच । अष्टौचवसवः ख्याता विश्वेदेवास्त्रयोदश
अष्टौते दिग्गजाश्चैव मनवश्च चतुर्दश । मरुद्गणाश्च ते सर्वे तत्रचेन्द्रपुरोगमाः ॥
गन्धर्वाप्सरसश्चैव किन्नरोरगराक्षसाः ।
सिद्धास्तपस्विनो व्यास! (वत्स!) तत्रैव समुपस्थिताः ॥ ८ ॥
अष्टौच भैरवाः ख्याताश्चत्वारः पवनात्मजाः ।
विनायकाः षडेते च ते (?) देव्यश्च चतुर्विंशतिः ॥ ९ ॥
एतेदेवगणाः प्रोक्ता रौद्राश्चैव तथागणाः । ब्रह्मावेदविदांश्रेष्ठो मरीचिः कश्यपादयः
दक्षः प्रजापतिः श्रेष्ठाऽदितिर्वैदेवमातृकाः ।
श्रुतिभिः सम्मता गावः स्थावराणि चराणि च ॥ ११ ॥
तीर्थानियानिसर्वाणिनद्यःप्रस्रवणानि च । क्षेत्राणिचैवसर्वाणि भुविपुण्यतमानिवै

सप्तपुर्यस्त्रयोग्रामा नवारण्यानिचैवतु । चतुर्दशानिगुह्यानि मुक्तिद्वाराणि भूतले
समुद्राश्चैवचत्वारोरत्नानिविविधानि च । राजर्षयोऽचलाःशान्ता ब्राह्मणावेदपारगाः
वेदापुराणस्मृतयोगाथागीतिःप्रहेलिकाः । उपास्माञ्चक्रिरेतस्यतदानींचाप्युमापतेः
तस्य दर्शनमात्रेण जातोऽहं विज्वरोऽमलः । दीर्घायुर्दीर्घतपसा जरारोगविवर्जितः
स्नातोऽहं सर्वतीर्थेषु शुचिर्भूत्वा समाहितः । प्रसन्नमानसोजातःसर्वपापपराङ्मुखः
दृष्ट्वा पद्मावतींशुभ्रां सर्वकामवरप्रदाम् । न यत्र दृश्यते कश्चिच्छोकरोगपरोनरः

न दुःखी न च दारिद्रो न मूर्खोनाजितेन्द्रियः

परस्परं विरोधी च (न) नाऽन्नतीयत्र (नृतिर्यक्षुत्र) दृश्यते ॥ १६ ॥

अन्योन्यं सर्वमित्राणि अन्योन्यंश्चोपकारिणः ।

सर्वे दान्ताश्च शान्ताश्च सर्वे विद्योपदेशिनः ॥ २० ॥

उद्यानानिचरम्याणिवनान्युपवनानि च । हर्म्याणिचित्रशुभ्राणि श्रेणिबद्धानिसर्वशः
नानारत्नसमाकीर्णहैमकुम्भैः सुशोभनैः । विराजन्तेविचित्राणि गीतवाद्यमहोत्सवैः
सदैववसते यत्र उमया सह शङ्करः । चन्द्रचूडाकृतिर्व्यास चिताभस्माङ्गलेपनः
चन्द्रज्योत्स्नाकलापूर्णमरीचिःसर्वतोबभौ । न यत्रकृष्णपक्षोऽभून्नामावस्यानवैतमः
सदैव पुष्पिताश्यामा बाल्येरूपवती यथा । हर्म्यपृष्ठे गवाक्षेच द्वाराजिरगृहन्तरे
गिरिगह्वरकुञ्जेषु गुहाध्वान्तान्तरेषु च । आश्रमेषुच रम्देषु वनेषूपवनेषु च ॥ २६

गृहदीर्घिकासु रम्यासु शालामालासु सर्वतः ।

चन्द्रज्योत्स्ना समापूर्णा दृश्यन्ते धवलादिशः ॥ २७ ॥

कुमुद्वतीप्रफुल्लानि तडागानि विरेजिरे । ज्योतिर्गणसमाकीर्णं शरदीवनभःस्थलम्

नद्यः सरांसि सर्वाणि वापीकूपसुपल्वलाः ।

कुमुद्वत्या समाकीर्णा आसीच्चान्द्रमसी मही ॥ २१ ॥

यस्मात्सर्वेषु कालेषु प्रफुल्लात्रकुमुद्वती । तस्मात्पद्मावतीह्येषा पुरीजाता कुमुद्वती
कुमुद्वत्यां नरा येतु श्राद्धंकुर्युः समाहिताः । नतेषांपितरःस्वर्गाच्च्यवन्तेवैकदाचन
अक्षयंलभते श्राद्धंपितृणांदत्तमक्षयम् । स्नानंदानं तथाहोमो देवताराधनं तथा ॥

यत्किञ्चित्क्रियतेकर्म तत्सर्वंचाक्षयंभवेत् । एवंकुमुद्वतीजाता पुरीव्यास सनातनी

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायांपञ्चमेऽवन्तीखण्डे
कुमुद्वतीप्रभावकथनं नाम षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

सप्तपञ्चाशत्तमोऽध्यायः

अमरावतीनामकथनम्

सनत्कुमार उवाच

अमरावतीयथाजातापुरीह्येषाकुशस्थली । शृणुव्यासमहाप्राज्ञ यथाब्रह्माब्रवात्सुरान्
तथाहंतम्प्रवक्ष्यामि विस्तरेणतपोधन । एकदाब्रह्मणादिष्टः प्रजार्थंऋषिसत्तमः
मारीचःकश्यपस्तेपे तपः परमदुष्करम् । महाकालवनेरम्ये देव्यासह महानृषिः
शीर्णपत्राशनस्तेपे वायुभक्षी जितेन्द्रियः । पूर्णेवर्षसहस्रे तु वागुवाचाशरीरिणा
श्रूयतां भोद्विजश्रेष्ठ ममवाक्यमनुत्तमम् । यस्मात्तेऽस्तितपस्तीव्रं फलमुग्रस्यसुव्रत
तस्मात्तेसन्ततिस्तावद्यावच्चन्द्रदिवाकरौ । तावत्तिष्ठतुमेदिन्यांयशसापुत्रपौत्रकैः
अदितिस्ते सतीभार्यात्वयासहाचरत्तपः । तस्मात्सर्वेषुकालेषुछायाभूतायशस्विनी

भविष्यन्ति सुताः सर्वे विष्णुचन्द्रपुरोगमाः ।

अमरा निर्ज्जरादेवा दिवि ख्याता भवन्त्विति ॥ ८ ॥

त्वंचापिहिऋषिश्रेष्ठप्रजापतिरकल्मषः । भविष्यसिनसन्देहो ममवाक्याद्द्विजोत्तम
इत्युक्त्वाच पुनर्देवी तत्रैवान्तर्धीयत । तदारभ्यपुरींव्यास कुशस्थलीमनुत्तमाम्
कश्यपःसहदाक्षिण्या साग्निकःसमुपाश्रितः । प्रजापिववृधे तस्मात्सदेवासुरमानुषा
मरीचेःपश्यपोजज्ञे ततःसर्वंप्रतिष्ठितम् । सुधापानकरादेवाव्यासतेनामराः कृताः ॥
नन्दनंप्राप्यतत्रैव महाकालवनोत्तमे । कामधेनुःसमाख्याता मनोरथवरप्रदा ॥ १३ ॥
साप्यत्रैवसदासेवेन्महाकालंमहेश्वरम् । पारिजाततरुश्रेष्ठं तथाचाम्लानपङ्कजम् ॥

बिन्दुसरः समाख्यातंमानसंसरउत्तमम् । हंससारसस‌ङ्कीर्णं सदासिद्धनिषेवितम्
मुक्तामणिगणासक्तं रत्नसोपानशोभितम् । निधिरेषमहापद्मः कल्हारकुमुदोज्वल

यानि यानि च दिव्यानि सन्ति ब्रह्माण्डगोलके ।
तानि सर्वाणि तिष्ठन्ति महाकालवने शुभे ॥ १७ ॥

तेनतेनात्मयोगेनमानवाश्चात्रसंस्थिताः । तत्तद्देहास्तदाचारास्तद्रूपास्तत्पराक्रमाः
अन्योन्यंचसमाकीर्णाः सर्वेचामरसन्निभाः । विचरन्तियथादेवाःपुरीमेतांजनाभुवि
सुराङ्गनासमानार्यः सदैवस्थिरयौवनाः । ईदृशींचपुरींदृष्ट्वा भुविव्याससनातनीम्
देवदानवगन्धर्वैः किन्नरोरगराक्षसैः । भुक्तिमुक्तिप्रदानित्या बहुकालफलप्रदा ॥

अमराणां स्थितिर्ह्यत्र तस्माज्ज्ञातामऽमरावती ।
यएतस्यां महाभागाः प्रसङ्गेन समागताः ॥ २२ ॥

स्नानदानादिकंकृत्वा पश्यन्त्येवंमहेश्वरम् । नतेषांदुर्लभंकिञ्चित् पुत्रतोधनतोपिवा

सर्वभोगानवाप्नोति मृतःशिवपुरं व्रजेत् ।
पठनाच्छ्रवणाद्वापि शतरुद्रीफलं लभेत् ॥ २४ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डेऽवन्तीक्षेत्रमाहात्म्येऽमरावतीनामकथनं नामसप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

अष्टपञ्चाशत्तमोध्यायः

विशालाभिधानवर्णनम्

सनत्कुमार उवाच

शृणुव्यासमहाभाग पुरीह्येषामरावती । विशालाचसमाख्याता सर्वलोकेषुगाथते
तथाहंसम्प्रवक्ष्यामि ब्रह्मणाकथितम्पुरा । गुह्याद्गुह्यतरंक्षेत्रं सर्वपापप्रणाशनम् ॥
उमयासहितोदेव एकएवाचरद्वने । ततोभूतगणाःसर्वे पश्चात्सर्वे सुरासुराः ॥ ३ ॥

विष्णुर्दशाकृतिर्यत्रदेव्यस्त्रैलोक्यमातरः । विनायकाश्चवैतालाः कूष्माण्डाभैरवादयः

कल्पोद्भेदाश्चलिङ्गाश्च चतुराशीतिर्ज्योतिषाः (सङ्ख्यकाः)
क्षेत्राणि क्षेत्रपालाश्च ऋद्धिःसिद्धिस्तथैवच ॥ ५ ॥
पितरो लोकपालाश्च सिद्धाःसिद्धिप्रदाश्च ये ।
ऋषयश्च महाभागा ऋषिपत्न्योऽमलाशयाः ॥ ६ ॥

किन्नरादेवगन्धर्वा अप्सरसोवराङ्गनाः । मरुद्गणाश्चयेसर्वे साध्यानां चगणाश्चये ॥
यक्षागुह्यकसंज्ञाश्च पिशाचोरगराक्षसाः । स्थावराजङ्गमाःसर्वेध्यानंमानसमाश्रिताः
उपासाञ्चक्रिरेतत्र देवदेवमुमापतिम् । तान्दृष्ट्वासातदादेवी पार्वतीगिरिजातदा ॥

उवाच श्लक्ष्णया वाचा शङ्करं जगदाश्रयम् ।

पार्वत्युवाच

देवदेव!जगन्नाथ!जगद्धार!जगत्प्रभो! ॥ १० ॥
पश्य एतान्महाभागान् ध्यायमानांस्तवाश्रितान् ॥
नतूपेक्ष्यान् पिता त्वञ्च तपमानांस्तपोर्दितान् ॥ ११ ॥

कल्पयत्वंमहाभाग एतेषामात्मनोहितम् । यथायोग्यंवासनार्थं स्थानंपरमशोभनम्
पुरींकल्पयमेनाथ वासार्थंसर्वकामदाम् । एषामेवासनास्वामिन् भवतांयदिरोचते

इति श्रुत्वा वचस्तस्याः पार्वत्याः परमेश्वरः ।
कल्पयामास च पुरीं रम्यां सर्वमनोरमाम् ॥ १४ ॥
आत्मनोपमितां पुण्यां शम्भुःसर्वात्मना तदा ।
बहुयोजनविस्तीर्णां दिव्यां दिव्यजनप्रियाम् ॥ १५ ॥
दिव्याभिप्रायसंयुक्तां दिव्यस्थानमनोरमाम् ।
दिव्यसर्वगुणोपेतां विशालां विरजां शुभाम् ॥ १६ ॥

क्रयविक्रयसम्पन्नांहट्टाट्टालकचत्वराम् । बहुहर्म्यगृहाकीर्णांसौधपङ्क्तिविराजिताम्

स्फाटिकाभित्तिरचितां वैडूर्यमणिभूमिकाम् ।
प्रवालस्तम्भप्रवरां हेमाभरणसम्भराम् ॥ १८ ॥

आरक्रमाणदेहल्यां द्वारशाखाभिमण्डिताम् ।
जाम्बूनदकपाटाभ्यां वज्रार्गलसुसंस्कृताम् ॥ १६ ॥
मणिरत्नसमाभूमिद्वाराजिरगृहान्तराम् ।
घोषजालानि रम्याणि मुक्तादामविलम्बिनीम् ॥ २० ॥
हेमस्तम्भध्वजोपेता पताका चगृहेगृहे । कलशाश्चविराजन्ते मणिहेमाचिताग्रे
वापीकूपतडागानिसरांसिविमलानिच । पद्मकिञ्जल्कगन्धीनिराजन्तेजलजन्तुभि
हंसकारण्डवाकीर्णां शिखण्डिगणसेविताम् (शोभिताम्) ।
जलयन्त्रकृताधारां गृहवापीवनाकराम् ॥ २३ ॥
क चिन्मयूरानृत्यन्ति क्वचित्कूजन्ति कोकिलाः ।
भ्रमरावलीढपुष्पाढ्यतवकावनराजयः ॥ २४ ॥
नरनारीगणाकीर्णां वर्णाश्रमनिषेविताम् । सुहर्म्यान्तर्गतानार्यो विलोकनपराबभुः
चन्द्रशालाकृताश्रेणी तोरणानीवशोभते । एवंव्यासपुरीरम्या आत्मयोगेनवासिता
यत्रालकापुरीरम्या कुबेरभवनाङ्किता । धवलापुण्यजनैः कीर्णापक्षिभिरुपशोभिता
तत्रभोगवतीदिव्या वरुणालयमुत्तमम् । नागकन्याभीरुद्राभिर्नागस्त्रीभिश्चसंकुला
संयमिनीपुरीश्रेष्ठा धर्मराजेनपालिता । अनाचारजनैः पूर्णा कृताभूतविगर्हितैः
देवतानांपुरीरम्यावासवेनाभिपालिता । पुण्यस्त्रीनृगणाकीर्णा किन्नरोद्गीतमण्डिता
एवंविधानिरम्याणि बहुपुण्यतराणिच । क्वचिद्रम्भाकृतद्वारा यवाङ्कुरघटाशुभा॥
क्वचिद्गायन्तिगन्धर्वाः क्वचिन्नृत्यन्तिनर्तकाः ।
क्वचिद् बालाः पठन्तिस्म वेदाध्ययनकाद्विजाः ॥ ३२ ॥
क्वचिद्यज्ञान् यजन्तिस्म यजमानाःसऋत्विजः ।
क्वचिच्चावभृथस्नाने तद्दानानि प्रकुर्वते ॥ ३३ ॥
क्वचिच्चित्तूपनयनंक्वचिवाहाग्निपरिग्रहम् । क्वचिदारामपूर्तंवै क्वचिद्यात्रावधारणम्
वापीकूपतडागानां तथैवविधिपूर्वकम् । क्वचित्कथाप्रसङ्गाश्च परिशंसन्ति वाचकाः
क्वचिद्गाथाः प्रकुर्वन्ति कवयःपुरउत्तमे । क्वचिन्मल्लाविरुध्यन्तिनटानाट्यपराःक्वचित्

तडागाश्च विराजन्ते मणिसोपानपङ्क्तयः ।
चञ्चला चपला बाला श्यामा षोडशवार्षिकी ॥ ३७ ॥
वारिहारपरातत्र मणिहेमघटोत्कटा । एवंव्यासपुरीरम्या निर्मितायोगमायया ॥
शम्भुना सर्वपापघ्नी प्रियाप्रियचिकीर्षया ।
विशाला बहुविस्तीर्णा पुण्या पुण्यजनाश्रया ॥ ३९ ॥
तस्मात्सर्वेषुकालेषु सर्वलोकेषुगीयते । विशालेतिसमाख्याता पुरीरम्यासनातनी
यत्र कुत्र स्थितोवापि सर्वावस्थाङ्गतोऽपिवा ।
विशालेतिवदन्नित्यं शिवलोके महीयते ॥ ४१ ॥
ईदृशीनपुरीव्यामभुविब्रह्माण्डगोलके । विशालासदृशीचान्याभुक्तिमुक्तिप्रदानृणाम्
पितॄनुद्दिश्य कुर्वन्ति श्राद्धकाले नरास्तु यत् ।
तदक्षयं भवेत्तेषां पितृकल्पे च गीयते ॥ ४३ ॥
स्नानदानादिकर्यैस्तुविशालायांप्रसङ्गतः । यत्रकुत्रगतास्तेवै मृतायान्तिशिवक्षयम्
धन्याः पुण्यतमा लोके प्रीतिर्येषां सदाचला ।
विशालायाः फलं शश्वच्छेषो वक्तुं न शक्नुयात् ॥ ४५ ॥
कथाश्रवणमात्रेण वाच्यमानेन तत्क्षणात् ।
महापापोद्भवं पापं मुच्यते नात्र संशयः ॥ ४६ ॥
एवंव्यासपुरीजाता विशालाच कुशस्थली । प्रतिकल्पंयथाजाता तथामेशृणुभामतः
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
ऽवन्तीक्षेत्रमाहात्म्येविशालाभिधानकथनं नामाऽष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

एकोनषष्टितमोऽध्यायः

प्रतिकल्पाभिधानवर्णनम्

सनत्कुमार उवाच

शृणुष्वावहितोव्यास कथामेकाग्रमानसः। मयाव्यासमुखात्प्राप्ताकल्पभेदेकथाशुभा
गुह्याद्गुह्यतराश्रेष्ठादेयायस्यनकस्यचित्। नास्तिकायकृताघ्नायनाशिष्यायकदाचन
एषापुण्यतमा व्यास! कथापापहरापरा। यस्याःश्रवणमात्रेण कल्पदोषो न बाधते
प्रमाणं कल्पपर्यन्तं ब्रह्मणः परमेष्ठिनः। मन्वन्तरेषु सर्वेषु कल्पकल्पान्तरेषु च

यावत्सङ्ख्या परिमिता तावतीं शृणु सत्तम!।
अहोरात्रं विभजते सूर्यो मानुषदैवतम् (मानुषदैवतम्)॥ ५॥
तामुपादाय गणनां शृणु सङ्ख्यां द्विजोत्तम।
निमिषैःपञ्चदशभिः काष्ठास्त्रिंशत्तु ताःकलाः॥ ६॥
त्रिंशत्कलो मुहूर्तस्तु त्रिंशद्भिस्तैर्मनीषिणः।
अहोरात्रमिति प्राहुश्चन्द्रादित्यगतिस्तथा॥ ७॥

रवेर्गतिविशेषेण सर्वेष्वेतेषुनित्यशः। तदहस्तु मनुष्याणां रात्रिश्चैवतुतादृशी
पक्षामासाऋतूरब्दमयनंच प्रकीर्तितम्। पितृणाञ्चैव देवानां ब्रह्मणश्च यथातथम्

यावत्सङ्ख्या समाख्याता आयुरन्तश्च तादृशः।
अहोरात्राः पञ्चदश पक्ष इत्यभिशब्दितः॥ १०॥

पक्षौ द्वौ तौकृतोमासो मासौद्वावृतुरुच्यते। अयनंतस्त्रिभिःप्रोक्तमब्देद्वेअयनेस्मृतः
दक्षिणंचोत्तरञ्चैवं सङ्ख्यातत्त्वविशारदैः। मानेनानेनयोमासः पक्षद्वयसमन्वितः
पितृणांतदहोरात्रमितिकालविदोविदुः। शुक्लपक्षस्त्वहस्तेषां कृष्णपक्षस्तु शर्वरी
कृष्णपक्षेत्विहश्राद्धं पितृणांवर्तते ततः। मानुषेणतुमानेन योवैसंवत्सरस्स्मृतः

देवानां तदहोरात्रं दिवाचैवोत्तरायणम्।

दक्षिणायनं स्मृता रात्रिःप्राज्ञैस्तत्त्वार्थकोविदैः॥ १५॥

दिव्यमब्दंशतगुणमहोरात्रं मनोःस्मृतम्। अहोरात्रं दशगुणं मानवः पक्षउच्यते॥
पक्षाद्दशगुणोमासोमासैर्द्वादशभिर्गुणैः। ऋतुर्मनूनांसम्प्रोक्तःप्राज्ञैस्तत्त्वार्थदर्शिभिः

षड्भिस्तैर्वर्ष आख्यातस्तेन सङ्ख्या निबध्यते।
चत्वार्येव सहस्राणि वर्षाणान्तु कृतं युगम्॥ १८॥
तावतीतु भवेत्सन्ध्या सध्यांशश्चतथाविधः।
त्रीणि वर्षसहस्राणि त्रेतायाःपरिमाणतः॥ १९॥
तस्याश्चतावतीसन्ध्या सन्ध्यांशश्चतथाविधः।
तथा वर्षसहस्रे द्वे द्वापरं परिकीर्तितम्॥ २०॥
तस्यापि तावती सन्ध्या सन्ध्यांशश्चतथाविधः।
कलिर्वर्षसहस्रन्तु संङ्ख्यातोऽत्र मनीषिभिः॥ २१॥
तस्य तावतिका सन्ध्या सन्ध्यांशश्चतथाविधः।
एषाद्वादशसाहस्री युगसङ्ख्या प्रकीर्तिता॥ २२॥

दिव्येनानेनमानेन युगसङ्ख्या निबोध मे। ससर्जसपुनस्तात जगत्सर्वमिदंततम्
कृतंत्रेताद्वापरञ्च कलिश्चैव चतुर्युगम्। युगंतदेकसप्तत्या गुणितं द्विजसत्तमम्॥
मन्वन्तरमितिप्रोक्तंसङ्ख्यानार्थविशारदैः। अयनंचापि तत्प्रोक्तं द्व्ययनेदक्षिणोत्तरे
मनुःप्रलीयतेह्यत्र सम्प्राप्ते जगतःप्रभो। ततोपरोमनुःकालमेतावन्तं भवत्युत॥
समतीतेतुराजेन्द्र! प्रोक्तस्संवत्सरस्सवै। तदेवचायनंप्रोक्तं मुनिनातत्त्वदर्शिना॥
ब्रह्मणस्तदहःप्रोक्तः कल्पश्चेति समुच्यते। सहस्रयुगपर्यन्तं सानिशाप्रोच्यतेबुधैः
निमज्जत्यथ तत्रोर्वी सशैलवनकानना। तस्मिन् युगसहस्रेतु पूर्णे भरतसत्तम

ब्राह्मे दिवसपर्यन्तं कल्पो निश्शेष उच्यते।
युगानि समतीतानि साग्राणि कथितानि ते॥ ३०॥

कृतत्रेतानियुक्तानि मनोरन्तरमुच्यते। चतुर्दशैतेमनवः कथिताः कीर्तवर्द्धनाः॥
वेदेषु स पुराणेषु सर्वेषु प्रभविष्णवः। प्रजानाम्पतयोव्यास धन्यमेषांप्रकीर्तितम्

मन्वन्तरेषु संहाराः संहारान्तेषु सम्भवाः। नशक्यमन्तस्तेषांवै वक्तुंवर्षशतैरपि
विसर्गश्च प्रजानांवै संहारस्यच भारत!। मन्वन्तरेषु संहारः श्रूयते भरतर्षभ ॥ ३७
यत्र तिष्ठन्तिवैदेवाः सर्वेसप्तर्षिभिस्सह। तपसा ब्रह्मचर्येण श्रुतेनच समन्विताः

पूर्णे युगसहस्रे तु कल्पो निश्शेष उच्यते।
तत्र सर्वाणि भूतानि दग्धान्यादित्यरश्मिभिः ॥ ३६ ॥

ब्रह्माणमग्रतः कृत्वा सहादित्यगणैर्द्विजाः। प्रविशन्तिसुरश्रेष्ठं हरिंनारायणंप्रभुम्
स स्रष्टासर्वभूतानां कल्पान्तेषु पुनः पुनः। अव्यक्तःशाश्वतोदेवस्तस्यसर्वमिदञ्जगत्
स एव विद्यतेव्यास महेशविधिसंयुतः। महाकालवनेरम्ये वासं चक्रे स ईश्वरः
प्रलयोनबाधते व्यास! महाकालवनोत्तमे। कल्पेकल्पेचवैरम्या पुरीह्येषाकुशस्थली

निरामया निरातङ्का निर्विकारा युगेयुगे।
मार्कण्डेयोपदिष्टानि कल्पानि सम्भवन्ति च ॥ ४१ ॥

अत्रैवचवनेरम्ये ब्रह्मा लोकपितामहः। प्रजानां पतयो ये ते दक्षःप्राचेतसस्तथा॥
मरीचिः कश्यपोरुद्रोयेचान्ये भार्गवादयः। कल्पादौसृजतेलोकाञ्चराचरान्यथातथा
एवमादौपुराव्यास कल्पंकल्पान्तकंसदा। वाराहोवामनोविष्णुः पितॄणांवैतथैवच
कल्पभेदास्समाख्याता महाकालवनेशुभे। चतुराशीतिकल्पानिसञ्जातानिद्विजोत्तम

तावन्ति ज्योतिर्लिङ्गानि वने तिष्ठन्ति सत्तम!।
पुनर्जाता पुनर्नष्टा महीसागरपर्वताः ॥ ४६ ॥

पुनः पुनर्भविष्यन्तिपुरीह्येषाऽचलास्मृता। तस्मात्सर्वेषुकालेषुसर्वलोकेषु गीयते

प्रतिकल्पेति सञ्ज्ञा सा भुवि व्यास!भविष्यति।
यस्याञ्च मानवा दान्ताः स्नानदानादिकं तथा ॥ ४८ ॥

जपंहोमं तथा श्राद्धं पितॄनुद्दिश्यदीयते। नतेषाम्पुनरावृत्तिः कोटिकल्पशतैरपि
प्रतिकल्पामनुप्राप्य दृष्ट्वादेवं महेश्वरम्। वैशाखेपौर्णमास्यांवै स्नापयेदेकवासरम्

प्रसङ्गतो रजःक्लान्तो क्षिप्राम्भसि च मानवः।
न तस्य दुष्कृतं किञ्चिद्विष्णुलोकं स गच्छति ॥ ५१ ॥

मन्वन्तरसहस्रेषु काशीवासेनयत्फलम्। तत्फलं प्राप्नुयाज्जन्तुःप्रतिकल्पंक्षणादपि

प्रतिकल्पे च कल्पान्ते सदैवाऽऽसीत्पुरी शुभा।
तस्मात्सर्वजनैःख्याता प्रतिकल्पा द्विजोत्तम! ॥ ५३ ॥
य एतस्यां महाभागाः प्रीतिं कुर्वन्ति मानवाः।
न तेषां कल्पभेदोऽयं स्वप्नवज्जायते क्षणात् ॥ ५४ ॥
यः शृणोतिकथां पुण्यां प्रतिकल्पोद्भवां शुभाम्।
श्रावयेद्वा प्रयत्नेन ब्रह्महत्यां व्यपोहति ॥ ५५ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-ऽवन्तीक्षेत्रमाहात्म्यप्रतिकल्पाभिधानकथनं नामैकोनषष्टितमोऽध्यायः ॥ ५६ ॥

षष्टितमोऽध्यायः

शिप्रामाहात्म्येज्वरानुग्रहवर्णनम्

सनत्कुमार उवाच

एवंव्यासपुरीरम्या नामभूतासनातनी। युगेयुगेयथाजाता तथाख्यातामयानघ॥१॥

व्यास उवाच

भूयस्तु श्रोतुमिच्छामि त्वत्तो वेदविदांवर!।
शिप्रायाश्च कथां पुण्यां पवित्रां पापहारिणीम् ॥ २ ॥
सुन्दरकुण्डं समाख्यातं पिशाचमोचनं तथा।
नीलगङ्गा इतिप्रोक्ता कर्कराजमतः परम् ॥ ३ ॥

पुष्कराणिचसर्वाणि गयातीर्थमनुत्तमम्। गोमतीकुण्डमाख्यातंनाम्नाधर्मसरस्तथा
ख्यातंसङ्गमजंतीर्थं शनेर्जन्मकथाशुभा। च्यवनाश्रमेचयावार्ता तथानागालयेशुभे॥
पुरुषोत्तममहिमानंकालेकेनकथंभवेत्। एतद्वेदितुमिच्छामि यत्तेमनसिवर्तते ॥ ६ ॥

सनत्कुमार उवाच

शृणु व्यास! महाभाग कथां पापहरां पराम् । यस्मिन्काले यथा जाता महाकालवने शुभे

नास्ति वत्स! महीपृष्ठे शिप्रायाः सदृशी नदी ।

यस्यास्तीरे क्षणान्मुक्तिः किञ्चिरात्सेवनेन वै ॥ ८ ॥

वैकुण्ठे जायते शिप्रा ज्वरघ्नी च पुरालये । यमद्वारे च पापघ्नी पाताले ऽमृतसम्भवा ॥ ९ ॥

वाराहकल्पे वै प्रोक्ता विष्णुदेहेति नामतः । शिप्रावन्त्यां समाख्याता कामधेनुसमुद्भवा

व्यास उवाच

विचित्रमिदमाख्यातं भगवन्नृषिसत्तम! ।

वक्तुमर्हसि शिप्रायाःसमासेन कथां शुभाम् ॥ ११ ॥

सनत्कुमार उवाच

ब्रह्मकपालमादाय भिक्षार्थं व्यचरन्महीम् । महादेवो विशुद्धात्मा सर्वलोकेषु सर्वतः ॥

अप्राप्य भिक्षां भिक्षार्थी वैकुण्ठं गतवान्विभुः । गतस्त्वातिथ्यवेलायां भ्रमन्देवो यतस्ततः

लोकनिन्दापरः क्रुद्ध क्षुधितो बहुवासरैः । भिक्षां देहीति भो ब्रह्मन् क्षुधितोऽहं समागतः

कपालं च करे कृत्वा इत्युवाच पुनः पुनः । गृह्यतां हर भिक्षां ते ददामीति हरिस्तदा ॥

इत्युक्त्वा करमुद्यम्य तर्जन्यङ्गुलिमदर्शयत् । तदा रुद्रसमाध्मातस्त्रिशूलेनाहनद्रुषा ॥

तदाङ्गुलिसमुद्भूतं बहु सुस्राव शोणितम् । पूर्णपात्रं च तेनाशु शङ्करस्य करे स्थितम् ॥

तदोद्वेलितपात्राद्वै धारा जाता समन्ततः । तत्र स्थानात्समुद्भूता शिप्राऽसृग्धारसम्भवा

वैकुण्ठाच्चाभवत्सद्यो नदी त्रैलोक्यपावनी । एवं शिप्रा सरिच्छ्रेष्ठा त्रिषु लोकेषु विश्रुता

ज्वरघ्नी च यथा प्रोक्ता तथा व्यास! ब्रवीम्यहम् ।

यदा बाणासुरो दैत्यः कृष्णेन सह संयुगे ॥ २० ॥

योधयामास दैत्येन्द्रोऽनिरुद्धकृतहेलनः । सहस्रबाहुभिर्वीरो नानाप्रहरणोद्यतः ॥ २१

तस्मात्क्रुद्धो वासुदेवः चक्रमादाय सत्वरः । चिच्छेद दोःसहस्रन्तु क्षुरप्रेणाशु मिगाना

स तदा भग्नसङ्कल्पश्छिन्नदोश्चरणार्दितः । युद्धात्पराङ्मुखो भूत्वा शङ्करं शरणं ययौ

तदागतं महादैत्यं समीपे भयविह्वलम् । विलोक्य कृपयाविष्टो गतः सङ्ग्राममूर्द्धनि ॥

छित्वा बाहुसहस्रं वै दैत्यराजस्य संयुगे । क्रुद्धः कृष्णो महाबाहुः परसेनान्तको बली

स्थितो यत्राचलो व्यास गतस्तत्र महेश्वरः । वारयामास कृष्णं वै शरौघांश्च समाकिरन्

अन्योन्यं तौ समासाद्य युद्धं कृत्वा च दारुणम् । शस्त्रास्त्रैश्च महाघोरैः सर्वप्राणिभयङ्करैः

वैष्णवास्त्रं तदा कृष्णः सन्दधे हरजिघांसया । पाशुपतश्च नामास्त्रं सर्वसंहारकारकम् ॥

सन्दधे वै तदा शम्भुः कृष्णप्राणहरोत्सुकः । हाहाकारस्तदा जातः सर्वलोकेषु श्रूयते ॥

मोहनास्त्रं पुनः कृष्णो हरोपरि मुमोच ह । तेनास्त्रेण तदा शम्भुर्मोहितो देवमायया ॥ ३० ॥

जृम्भमाणः स्थितः सङ्ख्ये किञ्चित्कालं मुहुर्मुहुः ।

लब्धसंज्ञः पुनर्जातो यदा रुद्रो महाहवे ॥ ३१ ॥

तदा क्रोधाभिभूतेन कृतो माहेश्वरो ज्वरः । ललाटफलकात्सद्यो वीरभद्रो महाबलः ॥

त्रिनेत्रस्त्रिशिरो ह्रस्वस्त्रिपादो बकराकृतिः । क्षुद्रो जटिलभस्माङ्गो महाव्याधिर्दुरत्ययः

कृष्णसेनां समासाद्य महादेवेन प्रेरितः । प्राणिनां कदनं चक्रे सर्वेषां कृष्णसङ्गिनाम् ॥

पराङ्मुख परा भग्ना ज्वराभिघात पीडिता ।

बभूव सहसा व्यास! सेना कृष्णेन पालिता ॥ ३५ ॥

तथाभूतां समालोक्य जृम्भमाणां रुजार्दिताम् । स्वसेनां भग्नसङ्कल्पां माहेशज्वरपीडिताम्

ससर्ज वैष्णवं तापं कृष्णः परमकोपनः । तेन सह वैष्णवस्य माहेश्वरज्वरेण च ॥

अन्योन्यमभवद्युद्धं घोरं घोरतरं महत् । सङ्ग्रामं बहुलं कृत्वा भग्नो माहेश्वरो ज्वरः ॥

सर्वलोकेषु गत्वा वै न शान्ति प्रतिजग्मिवान् ।

महाकालवने रम्ये प्राप्तस्तेनाभिपीडितः ॥ ३९ ॥

निमग्नश्चैव शिप्रायां ततः शान्तिपरां ययौ । दृष्ट्वा माहेश्वरं शान्तं ज्वरं परमकोपनम् ॥

वैष्णवोऽपि समासाद्य तस्यां मज्जनमाचरत् ।

तस्याः प्रभावसन्नष्टौ ज्वरौ हरिहरोद्भवौ ॥ ४१ ॥

तस्मात्सर्वेषु कालेषु ज्वरघ्नी साऽभवत्क्षणात् ।

ज्वराभिभूता ह्यासाद्य जनाः परमदुःखिताः ॥ ४२ ॥

निमज्जन्ति च शिप्रायां वसन्ति च समाहिताः । न तेषां बाधते पीडा ज्वरोद्भूता कदाचन

सत्यमुक्तंतदाव्यास ब्रह्मन्हरिहरेणच । येशृण्वन्तिकथांदिव्यां नराश्चैकाग्रमानसाः

न तेषां जायते किञ्चिज्ज्वरसन्तापजं भयम् ।

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे क्षिप्रामाहात्म्येज्वरानुग्रहोनामषष्टितमोऽध्यायः ॥ ६० ॥

एकषष्टितमोऽध्यायः

दमननृपतराख्यानवर्णनम्

सनत्कुमार उवाच

पापनाशिनीविख्यातायथाक्षिप्रापयस्विनी । तथाहंसम्प्रवक्ष्यामिसमासेनपरन्तप

पुराकृतयुगेव्यास दमनोनामवैनृपः । कीकटेषुसमाख्यातो राजा परमकोपनः ॥ २

उत्थार्यीसर्वधर्माणां गोब्राह्मणविनिन्दकः । सुरापानीहेमहारी गुरुतल्पगमत्सरी ॥

प्रजासर्वस्वहर्ताच परदाराभिमर्शकः । धूर्तकोधूर्तसङ्गीच पिशुनस्तस्कराकृतिः ॥

गोगृहपुरभेदीच निन्द्योनिन्द्यजनप्रियः । कुत्सितः कोपपूर्णश्च वेदशास्त्रविवर्जितः ॥

साधुसङ्गपरित्यागी दुष्टोदुष्टजनप्रियः । कुलाङ्गनापरित्यागी परस्त्रीवृषलीपतिः ॥

धर्मनिन्दाकरोनित्यमधर्मेरमतेमतिः । नहूयन्तेनपूज्यन्ते नश्रूयन्ते कथा बुधैः ॥ ७

वेदायज्ञाश्चदेवानां पुरंहट्टंचनाड्यते । एवंदुष्टनरोराजानभूतोनभविष्यति ॥ ८ ॥

सएकदावनेघोरे मृगयावनगोचरः । इतस्ततोभ्रममाणो व्याधैः परिवृतः खलः ॥

न लब्धखेटकं किञ्चित्क्षुधार्तो दुःखितःखलः ।

एकाकी सङ्गविगतो महाकालवनान्तिके ॥ १० ॥

रात्रिस्समागतातत्र घोराघोरनिषेविता । वृक्षमूलमुपावृत्य शयनार्थीक्षुधार्दितः ॥

तत्राश्वं विटपेबध्वा स्वयमेवन्यषीदत । तदैवकाले वृक्षाद्वै तस्यशीर्ष्ण्युरगोपतत्

किमिदंकुतआश्चर्यं कृत्वा हस्तेनवारितः । तेन दुष्टेन वैराजा दष्टोऽङ्गुष्ठे तदाहिना

दष्टमात्रेतु नृपतिर्व्यथितः क्षितिमागतः । कियत्काले व्यथाविष्टोमुमोहक्षीणमङ्गलः

तत्क्षणात्प्रेतभूतोऽसौघोरेनरकसञ्चये । यमदूतैस्ताड्यमानोविविधास्त्रैःस्वकर्मजैः

हर्षिताश्चगणास्सर्वे यमराजस्य किङ्कराः । दृष्टो बहुतरेकाले पापिष्ठो यममन्दिरे

एतस्मिन्नन्तरे व्यास! क्रव्यादैः खादितं शवम् ।

किञ्चिच्छेषतरं प्राप्तं वायसेनाभिलक्षितम् ॥ १७ ॥

तत्र गत्वानयन्मांसं तुण्डेन वियदुद्गतः । ततोऽन्यैर्वायसैर्भग्नो भ्राम्यमाणइतस्ततः

तत्रागतो हि यत्रास्ते दिव्या क्षिप्रा पयस्विनी ।

किञ्चित्कर्म विपाकेन वायसस्य गतं फलम् ॥ १९ ॥

पतितंवैजलेतस्याःक्षिप्रायातस्यकायजम् । तेनपुण्यप्रभावेणतत्क्षणात्सोभवच्छिवः

त्रिनेत्रश्चजटाजूटी व्याघ्राम्बरपरीवृतः । शूलहस्तोवृषारूढो भालचन्द्रोह्युमापतिः ॥

इत्याश्चर्यमयंरूपं दृष्ट्वा दूताश्चधर्षिताः । तद्गणैताडिमाभग्ना धर्मराजाय संसदि ॥

श्रूयताम्भो महाराज धर्मराज नमोऽस्तुते । दूतानांयद्वचोरम्यं बह्वाश्चर्यमयम्परम् ॥

कीकटाधिपतिर्मन्दो पापिष्ठोवृषलीपतिः । दमनोनामराजाऽभूत्समस्तेक्षितिमण्डले

यानिकानिच पापानि ब्रह्महत्यासमानिच । तानिसर्वाणितेनापि कृतानिभुविसत्तम

मर्यादाभेदकोमूढो वर्णाश्रमविभेदकः । कुसङ्गीधूर्तकोन्मादी बहुव्यङ्गभर खलः ॥

यमदण्डपरःपापी ह्यस्माकं हर्षवर्द्धनः । स कथं शिवरूपीस्यात् किमाश्चर्यमतःपरम्

यावन्तः पतिताः पूर्वं पापिनः सर्व एव हि ।

कृष्णेन ताडितास्सर्वे ब्रह्मपुत्रार्थिना तदा ॥ २८ ॥

तदाप्रभृतिसर्वाणि कुण्डानिनरकस्यवै । शुष्काणिचैवदृश्यन्ते ग्रीष्मान्तेवैह्रदायथा

नैवार्तानांरवः कश्चिच्छ्रूयते तव मन्दिरे । अस्माकं जीवनंनास्ति कमुपायंवदस्वनः

एक एवागतो लोके वृत्तिदो नो विधेर्बलात् ।

सोऽपिशिवत्वमापन्नः कस्मान्नो जीवितं कथम् ॥ ३१ ॥

धर्मराजस्तदाश्रुत्य किङ्कराणां परं वचः ।

चिरंध्यात्वा स्वकान्प्रोचे देशकालोचितं वचः ॥ ३२ ॥

धर्मराजोवाच

श्रृण्वन्तुभोगणास्सर्वे भूत्वा चैकाग्रमानसाः। येनपुण्यप्रभावेणपापिष्ठशिवतांगता
भुविपुण्यतमेदेशे महाकालवनेशुभे। शिप्रानाम सरिच्छ्रेष्ठा सर्वपापहरापरा ॥ ३४॥
येषांक्षिप्रोदकस्पर्शो जायतेभुविकिङ्कराः। नतेषां पातकंकिञ्चिन्मृतस्सुरपुरंव्रजेत्
मनसावपुषावाचापापानिविविधानिच। तत्क्षणात्प्रलयंयान्तिक्षिप्रासरिन्निषेवणात्
क्षिप्राक्षिप्रेतियोब्रूते यत्रकुत्रापि मानवः। स एव शिवतांयातिनजानेस्नानजम्फलम्
यत्रकीटपतङ्गाद्याः क्षिप्रावारिचराश्चये। महापातकिनोयेते मृतायान्ति शिवालये
माधवेमासिसम्प्राप्ते निमज्जन्तिनरोत्तमाः। न तेषांनिरयनकिच्छिवरूपाश्चरन्तिते
वायसेनाहृतंमांसं तस्यराज्ञः कृतागसः। क्षिप्रागाधजलेक्षिप्तं कातत्र परिदेवना॥

वापीकूपतडागादिष्वधिकं यत्फलं स्मृतम्।
तस्माद्दशगुणं पुण्यं नदीषु ह्यपजायते ॥ ४१ ॥
तस्माद्दशगुणा तापी गोदा पुण्या ततोधिका।
तस्माद्दशगुणारेवागङ्गापुण्याततोऽधिका ॥ ४२ ॥

तस्माद्दशगुणाक्षिप्रा पवित्रा पापनाशिनी। दमनस्यशरीरस्य मांसंक्षिप्रासयागतम्
तेन पुण्यप्रभावेन शिवरूपधरोऽभवत्। ईदृशीच नदीरम्या अवन्त्यां भुविवर्तते

वाञ्छन्ति देवतास्सर्वा दुर्ल्लभं तस्य दर्शनम्।
धर्मराजवचश्श्रुत्वा गणा विस्मयमागताः ॥ ४५ ॥
मनसा च निरातङ्काः क्षिप्राशरणमागताः।

सनत्कुमार उवाच

तदाप्रभृति समाख्याता शि (क्षि) प्रेयं पापनाशिना ॥ ४६ ॥

गीयतेचपुराणेषुतस्यामाहात्म्यमुत्तमम्। दमनस्यचनिर्मुक्तिःक्षिप्रामाहात्म्यमुत्तमम्

संवादं यमदूतानां श्रुत्वा मुक्तिर्न संशयः ॥ ४८ ॥

इति श्रीस्कान्देमहापुराणे एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
क्षिप्रामाहात्म्यवर्णनं नामैकषष्टितमोऽध्यायः ॥ ६१ ॥

द्विषष्टितमोऽध्यायः

क्षिप्रायाअमृतोद्भवानामकथनम्

सनत्कुमार उवाच

श्रृणुव्यासमहाबुद्धे क्षिप्रामाहात्म्यमुत्तमम्। यथामृतभवाख्याता पातालेनागसम्मते
एकदारुद्रोभिक्षार्थं नागलोकेबुभुक्षितः। करेकपालमादाय भोगवत्यां समागतः
भिक्षांदेहिवचोदीनमित्युवाच गृहेगृहे। भिक्षाकेनापिनोदत्ता क्षुधितस्यचधूर्जटेः
तदाक्रोधाभिरक्ताक्षःशूलपाणिःक्षुधार्दितः। भ्रामयित्वापुरींसर्वांशनैर्बहिर्विनिर्ययौ

एकविंशतिकुण्डानि पीयूषस्य द्विजोत्तम!।
यत्र तिष्ठन्ति सर्वाणि नागलोकस्य रक्षणे ॥ ५ ॥
तत्र गत्वा स भगवाञ्छम्भुस्सर्वात्मसम्भवः।
अपिबन्नेत्रमार्गेण तृतीयेन च शङ्करः ॥ ६ ॥
रिक्तान्यमृतकुण्डानि कृत्वा तत्रैव सोत्थितः।
कम्पितश्च तदा लोकं नागानां सर्वतोमुखम् ॥ ७ ॥
कस्येदं कर्मकिञ्जातं सुधा यस्मादितोगता।
इत्युक्त्वा च ततस्सर्वे नागावासुकिपुरोगमाः ॥ ८ ॥

महदतिक्रमणेशङ्काः पुरात्तेचबहिर्ययुः। किंकुर्मःक्वचगच्छामः केनेदंहेलनंकृतम् ॥ ९
येनास्माकंप्रकुप्तेन हतंचामृतमुत्तमम्। अस्माकं जीवनं तस्मात्कथंजीवामपन्नगाः
इत्युक्त्वापन्नगास्सर्वे सस्त्रीबालपरिग्रहाः। हरिंप्रजग्मुश्शरणं मनसांपरिशङ्किताः
तेषामनुग्रहार्थाय वागुवाचाशरीरिणी। श्रूयतांचोरगास्सर्वे युष्माभिर्देवहेलनम्
भिक्षार्थमागतश्शम्भुः क्षुधार्तश्च गृहेगृहे। विदित्वातिथिवेलां स कपालकरभिक्षुकः
सादत्ताहिनकेनापि भोगवत्यांपिनाकिनः। तदाबहिर्गतोनाथः क्षुधितोधर्मविग्रहः
तेननष्टासुधासर्वा कुण्डान्ते पन्नगोत्तमाः। यूयंप्रयातपातालान्महाकालवनोत्तमे ॥

तत्रैकावैसरिच्छ्रेष्ठा क्षिप्रानामेति विश्रुता । त्रैलोक्यपावनीह्येषा सर्वकामफलप्रदा
यस्यादर्शनमात्रेण सर्वपापक्षयो भवेत् । तत्रगत्वाभवद्भिश्च स्नानंकार्यं यथाविधि
भजनंदेवदेवस्य ततः पूताभविष्यथ । भजनाद्देवदेवस्य शिप्रासलिलमज्जनात् ॥

भविष्यति ततस्सद्यस्सुधालोकेतु वोरगाः (पुरेव वः) ।
इति सम्भाष्य तान्नागान् तत्रैवान्तरधीयत ॥ १९ ॥
वाणी (णीं) व्यास!तदा दिव्या (म्) सहसा लोकसाक्षिणी (म्)
श्रुत्वा देवेरितां वाणीं तथेत्युक्त्वा च पन्नगाः ॥ २० ॥

सस्त्रियोबालवृद्धाश्च महाकालवनंययुः । तत्रगत्वाददृशुस्तेनदींत्रैलोक्यवन्दिताम् ॥

सर्वत्र कुसुमाकीर्णां तरुच्छायागतश्रमाम् ।
हंसकारण्डवाकीर्णां मणिमुक्ताप्रवालकाम् ॥ २२ ॥
मणिसोपानरचितां पद्मखण्डैश्च मण्डिताम् ।
सायंप्रातः स्थिता विप्रास्सन्ध्योपासनतत्पराः ॥ २३ ॥

ऋषयश्चमहाभागा भृगुराङ्गिरसादयः । सगन्धर्वाश्च तत्रैव नारदाद्यास्सुरर्षयः ॥ २४
वसवश्चतथादित्याह्यश्विनौमरुतस्तथा । रुद्रास्साध्याश्चदेवाश्च पितरोविमलाशयाः
उपासन्तेचशिप्रांवै सन्ध्याकालेसमाहिताः । ऋषिपत्नीमहाभागादेवकन्याप्सरोगणाः
पतिव्रतामहाभागास्तत्रैव पतिनासह । उपासन्तेसदाचारा वर्णाश्रमपुरोगमाः ॥
राजर्षयस्समासीना निर्वाणपदवींगताः । कुर्वन्तेतत्र धर्माणि महादानानिसर्वशः ॥

सिद्धायोगेश्वराश्शान्तास्तापसास्संशितव्रताः ।
नानादेशोद्भवालोका यात्रिणस्समुपागताः ॥ २९ ॥
शिप्राकूले समासीना नरनारीसमन्विताः ।
एवंविधां समालोक्य व्यास!त्रैलोक्यवन्दिताम् ॥ ३० ॥

नदींसुधामयींसर्वा नागाः परमहर्षिताः । स्नानदानादिकं कृत्वा महादेवमुपासिरे ॥
वेदोक्तविधिनासर्वे चक्रुः पन्नगसत्तमाः । पञ्चाङ्गपूर्वकं स्नानं यक्षकर्दमलेपनम् ॥
अम्लानपङ्कजां मालां नानापुष्पाक्षतैस्तथा । वासः स्रगनुलेपाद्यैश्चन्दनैर्गन्धधूपकैः

दीपदानादिनैवेद्यैस्ताम्बूलमथदक्षिणाम् । कर्पूरार्तिकरास्सर्वे महादेवमुपागताः ॥

स्तुतिमारेभिरे कर्तुं सुधाकामास्तदोरगाः ।

सर्पा ऊचुः

नमोऽनन्ताय बृहते सर्वदेव! नमोनमः ॥ ३५ ॥
चन्द्रचूड! (चन्द्रमौले) नमस्तेऽस्तु जटामुकुटधारिणे ।
शेषहार! नमस्तेऽस्तुचिताभस्माङ्गधारिणे ॥ ३६ ॥

कृत्तिवासनमस्तेऽस्तुवस्मरायनमोनमः । त्रिपुरघ्न!नमस्तेऽस्तुस्मरान्तकनमोऽस्तुते
मृगव्याधनमस्तेऽस्तु गिरीशाय नमोनमः । शङ्करात्मन्नमस्तेऽस्तु सर्वकामफलप्रद
सर्वसाक्षिन्नमस्तेऽस्तु सर्वभूताशयाकृते । सर्वाधारनमस्तेऽस्तुसर्वशक्तिधरायच ॥
सर्वभोगनमस्तेऽस्तु सर्वबीजसमुद्भव । दिव्यहास!नमस्तेऽस्तु नमोऽमृतस्रवायच
काम्यकामनमस्तेऽस्तु सर्वकामवरप्रद । नमश्शिवायशान्ताय पशूनां पतयेनमः ॥
नमोमृडायदान्ताय शान्तरूपायवैनमः । एवंप्रसादितोनागैर्भगवान् वृषभध्वजः ॥

प्रसन्नवदनो भूत्वा प्रत्यक्षं (क्षः) प्राह पन्नगान् ॥ ४२ ॥

श्रीमहादेव उवाच

श्रूयतामुरगास्सर्वे वचस्तथ्यं वदामि वः ॥ ४३ ॥

एकदानागलोकेतुभिक्षणार्थंगतोऽस्म्यहम् । गृहेगृहेभोगवत्यांविचरन्क्षुधितोभृशम्

कपालं च करे कृत्वा धृत्वा कन्थां सुचीरकाम् ।
अप्राप्तभिक्षो भिक्षार्थी पुनरागां ततो गृहम् ॥ ४५ ॥

तेनपापप्रसङ्गेन सुधानष्टातदालयात् । किञ्चित्पुण्यप्रसङ्गेन महाकालवनोत्तमे ॥ ४६

यूयं प्राप्ता महाभागा हित्वा नागालयोत्तमम् ।
बालवृद्धैःस्त्रिभिस्साकं दृष्टा शिप्रा सरिद्वरा ॥ ४७ ॥
यस्या दर्शनमात्रेणसुनिष्पापोऽस्म्यहं पुरा ।
शिप्रायाः स्नानजं पुण्यं वक्तुं शक्यं न केनचित् ॥ ४८ ॥
दर्शनाज्जायते शम्भुस्तत्क्षणाद् भुवि पन्नगाः ।

तस्मात्स्नानं कृतं सर्वैः शिप्रायां पन्नगोत्तमैः ॥ ४६ ॥
तेनपुण्यप्रभावेण सुधावोऽस्तुगृहेगृहे । नीत्वाक्षिप्रोदकंपुण्यं कुण्डेषुपरिषेचय ॥ ५०
तेनैतानि हि कुण्डानि अमृतेनैकविंशतिः ।
सम्पूर्णानि भविष्यन्ति स्थिराणि पन्नगोत्तमः! ॥ ५१ ॥
तथेत्युक्त्वाचतेसर्वैधृत्वाक्षिप्रोदकंकरैः । गतास्तेवैस्वकंलोकं नमस्कृत्वामहेश्वरम्
ततः प्रभृतिसाशिप्रा जातानागेऽमृतोद्भवा ।
सर्वलोकेषु विख्याता व्यास! शिप्रामृतोद्भवा ॥ ५३ ॥
यएतस्यांप्रकुर्वन्तिनराः स्नानादिकंभुवि । नतेषांदुष्कृतं किञ्चिन्नापदोनचदुर्गतिः
नवियोगोभवेत्तेषां पुत्रदारादिकैः कदा । नचमित्राणिदुष्यन्ति नरोगोनदरिद्रता
कथापापहरापुण्या सर्वकामवरप्रदा । पटनाच्छ्रवणाद्वापि गोसहस्रफलं लभेत् ॥
इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे क्षिप्राया अमृतोद्भवानामकथनं नामद्विषष्टितमोऽध्यायः ॥ ६२ ॥

———

त्रिषष्टितमोऽध्यायः

क्षिप्रामाहात्म्यवर्णनम्

सनत्कुमार उवाच

भूयः श्टणुमहाभाग शिप्रामाहात्म्यमुत्तमम् । यस्यश्रवणमात्रेण हयमेधफलंलभेत्
क्षिप्रासर्वत्रपुण्यातिपवित्रापापहारिणी । अवन्त्यांचविशेषेण क्षिप्रावैपापहारिणी
तथापितत्समुत्पत्ति विस्तराद्गदतोमम । यथावाराहतनया विष्णुदेहोद्भवाशिवा ॥
श्टणु व्यास!महापुण्यां कथाम्पौराणिकीं शुभाम् ।
पुरा महासुरो जातो हिरण्याक्षो महाबलः ॥ ४ ॥
सचेमांसकलांपृथ्वीं वशीकृत्वाचकारह । राज्यंचसार्वभौमानां दानवैश्चदुरात्मभिः

जित्वा च सकलाँल्लोकान् सुरानिन्द्रपुरोगमान् ।
दिक्पालान्वसुपालांश्च तिरस्कृत्याऽसुराधिपः ॥ ६ ॥
सर्वांश्चसर्वकामेभ्यः स्वयमेवाधितिष्ठति । स्वर्गान्निराकृताः सवतेनदेवगणाभुवि
विचरन्तियथामर्त्या भ्रष्टराज्याःपराजिताः । अलब्धशरणाःसर्वेब्रह्माणंशरणंययुः ॥
तत्रगत्वानमस्कृत्वादैत्यकृत्यंन्यवेदयन् । भगवन्!किमिदंकार्यंभवतापरमेष्ठिना ॥ ६
येनदेवगणाःसर्वेनष्टप्रायाश्चतत्क्षणात् । हिरण्याक्षेणदैत्येन हृतंस्वर्गमकण्टकम् ॥
यज्ञभागाश्चयेसर्वे उपाश्नातिपृथक्पृथक् । केनोपायेनजीवामः कथंतिष्ठामभूतले ॥
इतिविक्लवितंश्रुत्वा देवानांसपितामहः । उवाचवचनंरम्यं तत्कालेसमयोचितम्

ब्रह्मोवाच

श्टण्वन्तुभोसुरश्रेष्ठा!यूयंसर्वेसमाहिताः । पुराऽयंपार्षदश्रेष्ठोद्वारपालः समाहितः ॥
वैकुण्ठभवनेरम्ये विष्णोरतुलतेजसः । जयोनाममहाबाहुर्विजयेन च संयुतः ॥ १४
द्वावेवसचिवौदान्तौ विष्णुवेषधरावुभौ । आत्तयष्टीचविक्रान्तौतिष्ठतोद्वारिसर्वदा
एकदावैमुनिश्रेष्ठ ब्रह्मणोमानसात्मजाः । स्वैरंचरन्तोलोकेषु विष्णोर्भवनमागताः
सनकादयो महाभागा विष्णुदर्शनलालसाः ।
ताभ्यां निवारिताः सर्वे प्रपेतुर्धरणीतले ॥ १७ ॥
मुमुहुश्चतदाव्यास कुमाराभृशदुःखिताः । ततोऽगात्समहाबाहुर्भगवान्कमलेक्षणः ॥
ददर्शसहसाविष्णुःकुमारान्भुविदुःखितान् । उत्थाप्यैकंसमारोप्यसस्वजेमधुसूदनः
मूर्ध्निचाघ्रायबाहुभ्यां परिष्वज्य उवाचह ।
कस्माद्वःकश्मलमिदं केनापि दुःखिताभृशम् ॥ २० ॥
सर्वं तत्कारणं बाला ब्रूत नो धर्मवित्तमाः! ।

कुमारा ऊचुः

श्रूयताम्भोमहाराज! अस्माकं दुःखमीदृशम् ॥ २१ ॥
येनप्राप्तावयंब्रह्मन् दशामेतांःसुसुव्रत । आयाताभ्रातरोह्येते चत्वारोलोकविश्रुताः ॥
दर्शनार्थंरमानाथसाभिलाषाःसुरार्दिताः । निवारिताश्चसहसा द्वारपालैर्बलोत्कटैः

तेन चेयं दशा प्राप्ता भवता परिपालिता ।
अतःप्रभृति स्थानेऽस्मिन् स्थितिर्नास्ति च शाश्वती ॥ २४ ॥
एतस्मादासुरीं योनिं प्राप्नुतां सुसमाहितौ ।
सद्यःप्राप्तौ तदा व्यास! आसुरीं योनिकुत्सिताम् ॥ २५ ॥
जयश्चविजयाख्यश्च दुष्टभावं समाश्रितौ । जन्मान्तरसहस्रेण तपोदानसमाधिभिः
नराणांक्षीणपापानां कृष्णेभक्तिःप्रजायते । दुष्टभावेनवैसद्यो जन्मभिर्जायतेत्रिभिः
भविष्यति च वां तस्माद्विष्णुभक्तिःपरा स्मृता ।
जन्मजन्मान्तरे जातौ तामसीं योनिमुद्धतौ ॥ २८ ॥
हिरण्यकशिपुश्चैवहिरण्याक्षोमहाबलः । तथैवकुम्भकर्णाख्योरावणोलोकरावणः॥
दन्तवक्त्रःशिशुपालएवंजन्मत्रयेस्मृताः । योऽसौमहाबलोदैत्योहिरण्याक्षइतिस्मृतः
दुष्टभावंसमापन्नो देवब्राह्मणनिन्दकः । जित्वाचसकलान्देवान्स्वयमेवाधितिष्ठति
स्वर्गान्निराकृताः सर्वे भ्रष्टराज्याः पराजिताः ।
विचरन्ति यथामर्त्यास्तेन देवगणा भुवि ॥ ३२ ॥
स्वधाकारोवषट्कारः स्वाहाकारोनदृश्यते । देवपूजार्चनंनास्तिब्राह्मणानांविशेषतः
नैवतीर्थानिकाशन्तेपुण्यान्यायतनानिच । आश्रमेषुचसर्वेषु ऋषीणांचमहात्मनाम्
अत्यद्भुतंप्रकुर्वन्ति दुष्टदैत्याः प्रहारिणः । वर्णाश्रमवतांधर्माःस्त्रीणांचैवसुशीलता
उच्छिन्ना हि तदा जाता तस्मिन् राज्ञि दुरात्मनि ।
दुष्टाचारा दुरात्मानो मायिनो बहुमानिनः ॥ ३६ ॥
पाखण्डिनोविक्रमिणः सर्वधर्मबहिर्मुखाः । पशुधर्मगता ह्येते सर्वंब्रह्मेतिशंसिनः॥
बहुम्लेच्छा बहुक्लेशा बहुबाधावनिष्कृता! ।
कोवेदः कास्मृतिः पुण्या को यज्ञः का च दक्षिणा ॥ ३८ ॥
तमोभूतंजगत्सर्वं दृश्यतेवसुधातले । एवंव्यास!यदाजातं दृष्टंसर्वंजगत्त्रयम् ॥ ३९
यदायदाहिधर्मस्य ग्लानिर्भवतिभारत । अभ्युत्थानमधर्मस्य तदात्मानंसृजाम्यहम्
इतिज्ञात्वामहाविष्णुर्वाराहंवपुरात्मवान् । दधारलीलयादिव्यं श्वेतद्वीपोपमंशुभम्

यूपदंष्ट्रो हविर्गन्धो बीजौषधितनूरुहः ।
वेदपादः स्मृतिर्घोणा जिह्वाग्निस्तालु चाहुतिः ॥ ४२ ॥
अन्तरास्यरुचाटोपोयज्ञकायःसुदक्षिणः । उद्गमोघुर्घुरोनादोविहारोऋत्विजाकृतिः
श्वेतः श्वासररोदक्षः सदस्यावयवःस्मृतः । पुच्छःकर्मासनोनित्यंयजतांबहुमानदः
वेदापल्वलसंतारो ब्रह्माध्वर्यूर्वनाकरे । लोककल्पोलोकसाक्षी परावरवहः शुचिः
आद्यःपुरुषईशानः पुरुहूतःपुरुष्टुतः । तेनासौनिहतोदैत्यो हिरण्याक्षोदुरासदः ॥
सङ्ग्रामान् सुबहून् कृत्वा बहुकष्टेन विष्णुना ।
दैत्येन पीडिता पृथ्वी रसातलतलं गता ॥ ४७ ॥
उद्धृताचवराहेणदंष्ट्रयाचन्द्ररेखया । हतास्तेदानवाः सर्वेशेषाः पातालमाययुः ॥
ववुः पुण्यास्तदा वाताः सुप्रभोऽभूद्दिवाकरः ।
जज्वलुश्चाग्नयः शान्ताः शान्तादिग्जनितस्वनाः ॥ ४६ ॥
सरितोमार्गवाहिन्यः सागराः प्रकृतिंगताः । दृष्ट्वादेवोऽखिलं व्यासप्रसन्नात्माबभूवह
वाराहमूर्त्तिर्भगवान् सर्वकामफलप्रदः । आनन्दनिर्भरोदेवो हतदैत्यो वरप्रदः ॥ ५१
तस्यापि हृदयाज्जातानदीह्येषासनातनी । आनन्दजलसम्पूर्णा सर्वानन्दवरप्रदा ॥
बहुयोजनविस्तारा बहुला कामचारिणी ।
पद्माकरसमाकीर्णा हंसकारण्डवाकुला ॥ ५३ ॥
सरलातरलामाया यक्षगन्धर्वसेविता । किन्नरीभिर्गीयमाना गीयमानाखगालिभिः ॥
नृत्यन्त्यप्सरसो नित्यं स्तूयमाना महर्षिभिः ।
हुताग्निभिर्युता नित्यं राजर्षिभिःसमाश्रिता ॥ ५५ ॥
तुङ्गस्तनभराक्रान्तवरस्त्रीभिः समावृता । क्वचित्करिवरान्दोलै रम्यमाणाविराजिता
वेदविद्भिर्द्विजैःसेव्या ऋषिभिश्शंसितात्मभिः ।
सर्वदा सर्वकाले च ऋद्धिसिद्धिप्रदा नृणाम् ॥ ५७ ॥
महाकालपुरेरम्ये रम्यापद्मावतीपुरी । सुन्दरंकुण्डमपरंव्यास रम्यंप्राचीनकंशुभम्
यत्रस्नात्वानरायान्ति शिवलोकंसनातनम् । तत्रलीनापराव्यास क्षिप्रावैलोकपावनी

वाराहेणकृतंसर्वं दुष्टदैत्यनिवर्हणम् । तेनदेवा निरातङ्काः कृता वाराहमूर्त्तिना॥
भूत्वाप्राञ्जलयःसर्वे देवाइन्द्रपुरोगमाः । स्तुतिं महाविष्णु' सन्नताःपुरतः स्थिताः॥

देवा ऊचुः

देवदेवजगन्नाथ पुण्यश्रवणकीर्तन। किं दानं किं तपः पुण्यं किं तीर्थंकाच देवता॥
येन पुण्यप्रभावेन पुनःस्वर्गोह्यवाप्यते। एवंनिश्चित्यनोब्रूहि सर्वंगुह्यतरं विभो!॥

श्रीवाराह उवाच

श्रूयतांभोसुराः!सर्वे युष्माकंसिद्धिकारणम्। गुह्याद्गुह्यतरंपुण्यंमहाकालवनेशुभम्
ममदेहोद्भवाक्षिप्रा यत्रलीना पयस्विनी। नीलगङ्गासरिच्छ्रेष्ठा यत्रप्राची सरस्वती
पुष्करंच गयातीर्थं पुरुषोत्तमसरःशुभम्। तद्गुयूयंगच्छतक्षिप्रं पुनर्लोकानवाप्स्यथ
इति श्रुत्वापरंवाक्यं देवदेवजगद्गुरोः। तत्रदेवगणाःसर्वे ब्रह्मइन्द्रपुरोगमाः॥
महाकालवनेरम्ये यत्रक्षिप्रासरिद्वरा। स्नानदानादिकं कृत्वा श्राद्धंकृत्वायथोचितम्

तेन पुण्यप्रभावेण स्वकाँल्लोकान् गताः सुराः।
एवं व्यास!समाख्याता क्षिप्रा वै लोकपावनी॥ ६६॥

जातंसरोवराहस्य विष्णोरतुलतेजसः। यस्यदर्शनमात्रेण ब्रह्महत्या व्यपोह्यते॥

तत्र स्नात्वा पयःपीत्वा श्राद्धं कृत्वा यथोचितम्।
पयस्विनीं च गां दत्वा विष्णुलोके महीयते॥ ७१॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-ऽवन्तीक्षेत्रमाहात्म्ये क्षिप्रामाहात्म्यं नाम त्रिषष्टितमोऽध्यायः॥ ६३॥

चतुःषष्टितमोऽध्यायः

सुन्दरकुण्डपिशाचमोचनतीर्थवर्णनम्

सनत्कुमार उवाच

पृथिव्यां यानि तीर्थानि तानि सर्वाणि सुव्रत!।
अवन्त्यां सुन्दरे तीर्थे तिष्ठन्ति सर्वदा भुवि॥ १॥

व्यास उवाच

किमिदंसुन्दरंकुण्डंकदाकालेऽभवत्क्षितौ। निर्मितंकेनकोदेवःकिंवातस्यफलंस्मृतम्

सनत्कुमार उवाच

शृणुपुण्यतमेक्षेत्रे सुन्दराख्यं यदाभवत्। सर्वपापप्रशमनं वाञ्छितार्थफलप्रदम्॥
यस्य श्रवणमात्रेण ब्रह्महत्या व्यपोह्यते। अश्वमेधाधिकंपुण्यं वाजपेयशताधिकम्
पुराकल्पक्षये व्यास! नष्टकल्पा च मेदिनी। प्रचण्डवातवर्षाभ्यां घूर्णितोमेरुपर्वतः
तदात्रपतितंव्यास!वैकुण्ठशितखरोत्तमम्। महाकालवने घोरे गुह्येचैवाव्यये ध्रुवे॥

तत्क्षणात्पतिते शृङ्गे कुण्डं जातं सुनिश्चितम्।
रत्नसोपानसुस्वच्छं मुक्तासैकतपूरितम्॥ ७॥

जाम्बूनदकृतरोहं हेमपद्मविराजितम्। कल्पद्रुमकृतच्छायं चिन्तामणिसमुच्छ्रितम्
हंसकारण्डवाकीर्णं महर्षिगणसेवितम्। बीजौषधिगणाकीर्णं सर्वतरवाभिसंयुतम्
कल्पक्षयेनक्षीयन्ते यानितरवानिसर्वदा। तानि तत्र प्रतिष्ठन्ति मूर्त्तिमन्तिपराणिच

वेदशास्त्रपुराणानि गाथा गीत्यक्षराः स्वराः।
ॐकारश्च वषट्कारः गायत्री त्रिपदीपरा॥ ११॥

कलाकाष्ठामुहूर्तानि लवत्रुटिपलं घटिः। अहर्निशश्चयामाश्चपक्षौमासौऋतुस्तथा
संवत्सरोयुगश्चैवकुण्डेतिष्ठन्तिमूर्तितः। देवायक्षाश्चनागाश्च गुह्यकाःकिन्नरास्तथा
गन्धर्वाप्सरसोयक्षाःसिद्धाःकिंपुरुषास्तथा। उपासाञ्चक्रिरेतस्यकल्पदोषभयातुराः

ब्रह्मा रुद्रश्च कालश्च लोकपाला महौजसः ।
केचिद् ध्यानपराः सिद्धास्तापसाःशंसितव्रताः ॥ १५ ॥
तिष्ठन्तिबहुयुगंव्यास यावत्कल्पःसमाप्यते । सुदर्शनसमाकारं पूरितंचामृताम्बुभिः
दिव्याभिप्रायसंयुक्तं पारिजातगुणान्वितम् ।
दिव्यस्त्रीस्नानगन्धोदैर्वासितं तु सदैव हि (र्वासितोद्गारिसौरभम्)
क्वचिन्मयूरा नृत्यन्ति क्वचित् कूजन्ति कोकिलाः ।
क्वचिच्च केकाभिरवाः क्वचिद्घोष समाकुलम् ॥ १८ ॥
सुन्दरं सुन्दराकारं सुन्दरं तत्तथोच्यते । बहुपुण्यकरं व्यास! सर्वपापहरंपरम् ॥
यत्रसन्निहितोविष्णुःशिवःशक्त्यायुतोवशी । उपास्यश्चक्रिरेशश्वत्सर्वकालेषुसर्वदा
क्षणार्द्धंक्षणमेकंच सुन्दरकुण्डे नरोवसेत् । वैकुण्ठे नियतंवासःयावत्कल्पशतंभवेत्
पतङ्गाः पक्षिणः कीटा मृता यान्ति शिवालयम् ।
किं पुनर्मानवा लोके स्नानपूतास्तु तज्जले ॥ २२ ॥
योददातिलान्धेनुं गजवाजिरथाचर्नामः । दासीदाससुवर्णंच रत्नानिविविधानिच
शय्यादानविमानानिदानानिविविधानिच । नतस्यदानजंवेत्मिकीदृग्व्यासफलंभवेत्
भूयःश्रृणुपरं व्यास सुन्दरकुण्डफलंस्मृतम् । एकदाबहुपापेन पतितः पापयोनिषु
पिशाचोमोक्षमापन्नः शिवरूपधरोगतः । पिशाचमोचनेस्नात्वा दृष्ट्वा देवं महेश्वरम्
मुच्यते सर्वपापेभ्यो यद्यपि ब्रह्महा भवेत् ।

व्यास उवाच

क्व पिशाच इति ख्यातः किं तेन दुष्कृतं कृतम् ॥ २७ ॥
येन पापप्रसङ्गेन पिशाचत्वं समागतः । कथंतीथ प्रसङ्गोऽस्य जातोवैद्विजसत्तम!
एतद्वेदितुमिच्छामि त्वत्तो ब्रह्मविदाम्वर! ।

सनत्कुमार उवाच

श्रृणु व्यास! महाख्यानं तीर्थमाहात्म्यमुत्तमम् ॥ २६ ॥
यस्यश्रवणमात्रेण सर्वपापक्षयोभवेत् । ब्राह्मणो देवलोनाम दाक्षिणात्योद्विजाधमः

सदापापरतोलोभी कूटसाक्षीचलम्पटः । गुरुद्रोहीकितवोधूर्तो भ्रूणहागुरुतल्पगः ॥
हेमहारी सुरापीच ब्रह्महास्वामिद्रोहकः । अभक्ष्यभक्षकश्चैव वेदशास्त्रविवर्जितः ॥
बहुजन्मार्जितपापी सर्वधर्मबहिष्कृतः । विश्वासघातकोमानी चोरसङ्गरतः खलः ॥
देशान्तरगतोमन्दश्चौरकार्यार्थसाधकः । बहवो निहतामार्गे पापचारेण जन्तुना ॥
मगधेषु गतो दुष्टः प्रसङ्गात्पापकारिणाम् । तत्रैको ब्राह्मणोदान्तो वेदवेदाङ्गपारगः
साग्निकः शुद्धसत्त्वस्थो ब्रह्मकर्मरतः सदा ।
श्वशुरगृहस्थितां भार्यां तामादाय यशस्विनीम ॥ ३६ ॥
चलितोमार्गमारुद्ध्य तेनपापेनघातितः । तस्यस्त्रीच वरारोहा रूपलावण्यशालिनी
पतिव्रता महाभागा पूतचित्ताशुचिस्मिता । हतेभर्तरिदुःखार्ता पत्युर्विरहकातरा
वनेघोरे परिभ्रष्टा काष्ठमादाय भामिनी । आरुरोहचितांदीप्तां पतिनाशुद्धमानसा
सचदुष्टतरःसर्वं तस्य विप्रस्यजीवनम् । गृहीत्वा चलितोमार्गेगृहीतोराजकिङ्करैः
निगडित्वा तु वित्तेन वेदितो राजसन्निधौ ।
घातितो वै गले बद्ध्वा रज्जुना वृक्षकोटरे ॥ ४१ ॥
चाण्डालैर्घृष्टितोभूमावितश्चेतः श्वपाकिभिः । तेनकर्मविपाकेन रौरवंनरकंगतः ॥
षष्टिवर्ष सहस्राणि विष्ठायांकृमितांगतः । ततो हि नरकं प्राप्तोयमशासनकारकैः ॥
कुम्भीपाकगतो रौति वैतरण्यां प्रपीडितः ।
एवं बहुविधान्नरकान् भुक्त्वा पापी स दुःखतः (नवान्नवान्) ॥ ४४ ॥
ततःप्रेतत्वमापन्नो युगानांपञ्चसप्ततिम् । सूचीमुखोमहाकायो महारावोमहोदरः ॥
क्षुधातृषापराक्रान्तो मरुदेशसमाश्रितः । ततःकष्टतरंप्राप्यपैशाचींतनुमाश्रितः ॥
कुटिलोदुष्टभावश्च दुष्टाचारीदिगम्बरः । विष्ठामूत्रकृताहारो पूतिपर्युष्टभोजनः ॥
श्मशानेविट्प्रभोजीच कृत्तिवासाविलोचनः । भग्नवाप्यांतडागेच्चशुष्कवृक्षेचनिर्जले
प्राकारपरिघाकारे शून्यागारेनदीतटे । निवासोरोचतेतस्य सर्वदासर्वसन्धिषु ॥
एवं बहुयुगे याते महाकालवनेगतः । यत्रमाहेश्वरंलिङ्गं सुन्दरंकुण्डमद्भुतम् ॥ ५०
तत्रापिक्षणमात्रेणसिंहेनविनिपातितः । घातयित्वाचतंपापं जलार्थीकुण्डमाविशत्

दंष्ट्रान्तरगतंचास्थिपतितंतन्मुखाज्जले । तेनपुण्यप्रभावेणसर्वपापं क्षयं गतम् ॥
मृतमात्रे चलिङ्गं तन्नेत्रान्तरगतं तदा । हित्वापैशाचकंदेहं ज्योतिस्तल्लिङ्गमाविशत्
तदारभ्यपरंव्यासतीर्थंपैशाचमोचनम् । पिशाचमोचनेशाख्योभुविविख्याततांगतः

तावद् गर्ज्जन्ति पापानि मदोन्मत्ता गजाइव ।
यावन्नायाति क्षिप्रायां तीर्थे पैशाचमोचने ॥ ५५ ॥
पिशाचमोचने स्नात्वा शुचिर्भूत्वा समाहितः ।
पिशाचमोचनेशाख्यं पूजयित्वा यथाविधि ॥ ५६ ॥

सर्वपापविशुद्धात्मा जायतेनात्रसंशयः । पिशाचमोचनेव्यास महादानानिकारयेत्
नतस्यपुनरावृत्तिः शिवलोकात्कदाचन । पिशाचमोचनकथां पवित्रांपापहारिणीम्

पठनाच्छ्रवणाच्चैव हयमेधफलं लभेत् ॥ ५९ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डेऽवन्तीक्षेत्रमाहात्म्येसुन्दरकुण्डपिशाचमोचनमाहात्म्यंनामचतुःषष्टितमोऽध्यायः ॥६४

———

पञ्चषष्टितमोऽध्यायः

नीलगङ्गामाहात्म्यवर्णनम्

व्यास उवाच

भूयस्तुश्रोतुमिच्छामित्वत्तोब्रह्मविदांवर! । नीलगङ्गाकदाब्रह्मन्क्षिप्राकुण्डेसमागता

सनत्कुमार उवाच

शृणुव्यासमहातीर्थं सर्वतीर्थफलप्रदम् । नीलगङ्गांनरः स्नात्वासङ्गमेश्वरमर्चयेत् ॥
दुष्टसङ्गोद्भवादोषा नभवन्तिकदाचन । एकदाब्रह्मलोकेवै गङ्गात्रिपथगानदी ॥ ३ ॥
गतापुनन्तीत्रींल्लोकान्नीलवासाशुचार्दिता । भगवन्किमिदंजातं पातकंमेकृतम्पुरा
दुष्टाचारपरामेऽद्य येनैषाप्रापितादशा । सर्वलोकेषुयत्किञ्चिज्जनानांपातकम्भुवि ॥

तत्सर्वंमयितिष्ठेत्तु सर्वेषामपिदेहिनाम् । तेनाहंवैभराक्रान्ता नोशक्ताचलितुंधराम्
नीलवासाविवर्णाच सर्वधर्मबहिर्मुखैः । यत्किञ्चित्क्रियतेकर्म शुभंवायदिवाशुभम्
मयित्यक्त्वापुनन्तीमेजन्तवःसर्वशोऽमलाः । तिष्ठन्तिपुण्यलोकेषुभुक्तिमुक्तिप्रदेषुच
अस्माकंचमहत्कष्टं जातंधातः परमलम् । नहिशर्मनैवशान्तिर्ननिद्रानचनिर्वृतिः ॥
नहिलोकेस्थितिर्मेऽद्य पापिष्ठायासनातनी । दुष्टसङ्गोद्भवैर्दोषैः प्लाविताहंजगद्गुरो
किंकरोमिक्वगच्छामि येनशान्तिर्भवेन्मम । किंतपःकिञ्चदानंमेकिंतीर्थंकिंचसाधनम्
येनाहंपापलिप्ताङ्गी पूर्वप्रकृतिमाप्नुयाम् । एवंज्ञात्वामहायोगिन् यथायोग्यंतथाकुरु

ब्रह्मोवाच

श्रूयताम्भोःसरिच्छ्रेष्ठे! कारणं पापनाशनम् ।
महाकालवने रम्ये पुरी ह्येषाऽमरावती ॥ १३ ॥

तत्रक्षिप्रासरिच्छ्रेष्ठा वर्ततेभुविपावनी । तस्यादर्शनमात्रेण सर्वपापक्षयोभवेत् ॥
तत्रगच्छमहाभागे सद्यश्चात्मविशुद्धये । ब्रह्मणेदंसमाख्यातं श्रुत्वागङ्गासरिद्वरा ॥
तमभिज्ञायसम्प्राप्ता महाकालवनंशुभम् । पुष्करस्याग्रमार्गेच यत्रदेवोमरुत्सुतः ॥

विन्ध्यस्य चोत्तरेभागे अञ्जन्याश्रममुत्तमम् ।
सा पुत्रेण तपस्तेपे पवित्रा ब्रह्मचारिणी ॥ १७ ॥

पतिव्रताभिः सर्वाभिःपतिभिर्ब्रह्मचारिभिः । देवाङ्गनाभिर्बहुभिःक्रीडद्भिर्बालकुञ्जरैः
सरसीफुल्लकह्लारैर्मत्तालिकुलनादितम् । निर्वैरजन्तुभिःसेव्यं ब्रह्मर्षिगणसेवितम् ॥
मनआह्लादकंपुण्यं पवित्रंपापनाशनम् । तत्रप्रवेशमात्रेणनीलवासासरिद्वरा ॥ २० ॥
शुक्लवासाभवत्सातु नष्टपापमलाशुभा । शरच्चन्द्रनिभाकारा धूतपापायशस्विनी ॥
तत्रैवचाश्रमंचक्रेमनसोहर्षकारणम् । ततःप्रभृतिसमाख्यातं सर्वलोकेषुपुण्यदम् ॥ २२

नीलगङ्गेति तत्तीर्थं व्यास!किल्बिषनाशनम् ।
अस्मिंस्तीर्थे नरः स्नात्वा हनुमन्तमथार्चयेत् ॥ २३ ॥

तस्यसिद्धिः करगता भविष्यतिनसंशयः । आश्विनेमासिसंप्राप्तेकृष्णपक्षेसमाहितः
दर्शेपितॄन्समुद्दिश्यश्राद्धंकुर्यान्महालयम् । तारितंतेनस्वकुलंसर्वमेकोत्तरंशतम् ॥

सप्तगोत्रेषुयेजाताः पूर्वजाः पितरस्तथा । तेसर्वेसद्गतियान्ति तेषांलोकाःसनातनाः
स्नात्वातिलाञ्जलिंदद्यात्पितृनुद्दिश्यतत्परः । अक्षयाजायतेतृप्तिःस्वर्गलोकेमहीयते
भोजयेद्ब्राह्मणान्सप्त श्राद्धंकृत्वातुपायसैः । अक्षयंलभतेश्राद्धमश्वमेधफलंभवेत् ॥
तीर्थंपुण्यतरंव्यास!श्रृणुपुण्यतरंस्मृतम् । दुग्धकुण्डमितिख्यातंत्रिषुलोकेषुविश्रुतम्
सर्वपापहरंपुण्यं सर्वकामवरप्रदम् । पुरा दुग्धा धरादेवी पृथुना धर्ममूर्तिना ॥ ३० ॥
दुग्धंसर्वंहविर्भाव्यं सर्वेषांजीवनप्रदम् । दत्तंनिधायकुण्डेऽस्मिंस्तेनदुग्धसरःस्मृतम्

कुण्डे स्नात्वा पयः पीत्वा दत्त्वा गाश्च पयस्विनीम् ।
सर्वबाधाविनिर्मुक्तो धनधान्यसमन्वितः ॥ ३२ ॥

जायतेसर्वकालेषु मृतः स्वर्गपुरंव्रजेत् । ततःपुष्करमासाद्य स्नानदानादिकंचरेत् ॥
सर्वपापविशुद्धात्मा पुष्करस्य फलं लभेत् ॥ ३४ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे ऽवन्तीक्षेत्रमाहात्म्येनीलगङ्गामाहात्म्यंनामपञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

षट्षष्टितमोऽध्यायः

विन्ध्यावासिनीविमलोदतीर्थवर्णनम्

व्यास उवाच

कोऽसौविन्ध्यगिरिर्ब्रह्मन् कदाकालेसमागतः । महाकालवनेरम्ये केनवाप्रेषितःपुरा

सनत्कुमार उवाच

पुरारेवाजलैर्व्यास प्लावितैषावसुन्धरा । तदासर्वसुरैरेवमगस्तिर्मुनिसत्तमः ॥
आराधितो महाभाग!धरणीत्राणकारणात् ।
तदागत्य गिरौ रम्ये विन्ध्ये स मुनिसत्तमः ॥ ३ ॥
एकाग्रमानसो भूत्वा भवानीं विन्ध्यवासिनाम् ।

आराधनं तदा चक्रे तस्या देव्या वरेप्सया ॥ ४ ॥
कंसविद्रावणकरीमसुराणांक्षयंकरीम् । भारावतारणींपुण्यां बलस्यभगिनींशुभाम्
यशोदागर्भसम्भूतां चाणूरबलमर्दिनीम् ।
विद्युद्रूपां नभस्थां तु कृष्णां कृष्णाहिमर्दिनीम् ॥ ६ ॥
जननींदेवसेनस्य कवीनांवाक्यदेवताम् । गायत्रींद्विजमुख्यानां बृहतींछन्दसांवराम्
सहस्राक्षीं सुरेन्द्रस्य ऋषेश्चारुन्धतीम्पराम् ।
गवांकामदुघां श्यामां लतां मधुतमप्रियाम ॥ ८ ॥
अदितिं सर्वमातृणां पार्वतीं सर्वयोषिताम् ।
ज्योत्स्नाञ्चान्द्रमसीं बालां सर्वकामवरप्रदाम् ॥ ९ ॥
शारदांऋतुवेलायांवृन्दावनवरींवराम् । मायिनांवैष्णवींमायांसर्वदैत्यविमोहिनीम्
महालक्ष्मीं श्रीमभीष्टां यक्षिणीं धनदार्चिताम् ।
महोदधीप्सितां वेलां राज्ञां कार्येषु चक्रिणीम् ॥ ११ ॥
वेदिकांयज्ञशालानां वराहस्यावनींशुभाम् । दक्षिणांसर्वदीक्षाणांसर्वकामफलप्रदाम्
एवंस्तुतातदादेवी प्रत्यक्षाविन्ध्यवासिनी । प्राहप्रसादसुमुखी ऋषीणांप्रवरंऋषिम्
व्रियताम्भोद्विजश्रेष्ठ! तदस्मत्तोऽभिवाञ्छितम् ।
यदीप्सितं त्वया वत्स! स्तुतिर्मे सुचिरं कृता ॥ १४ ॥

अगस्तिरुवाच

यदिमातर्वरोदेयोदेवानामुपकारिणि! । रेवेयंवर्द्धितालोके सर्वलोकभयप्रदा ॥ १५ ॥
तयेदंप्लावितंविश्वं तस्यानिग्रहणंकुरु । इतिसाप्रार्थितातेन तदाकालेमहर्षिणा
अगात्साध्वी तदा व्यास! महाकालवनं शुभम् ।
सान्त्वपूर्वं वचः पथ्यमगस्तिमिदमब्रवीत ॥ १७ ॥
वारयिष्येपरान्देवींवर्द्धमानांद्रुतंऋषे । तावत्त्वंऋषिभिः सार्कंविन्ध्यस्यचमहागिरेः
परमेत्रिकुटेद्वारे स्थास्यसिऋषिसत्तम! । पुरीह्येषामुनिश्रेष्ठ त्रिषुलोकेषुविश्रुता
अत्रैवसुचिरंकालं मातृभिर्निवसाम्यहम् । तत्रापित्वंसदासिद्धक्षेत्राधिपतिमाप्नुहि

मत्सरोनिर्मलंपुण्यंविमलोदन्तुविश्रुतम् । यत्रपुण्यवतांवासोदेव्यस्तिष्ठन्तिकोटिशः

तस्मिंस्तीर्थे नराः स्नात्वा भूत्वा चैव समाहिताः ।
यजन्ति चैव माम्भक्त्या धूपदीपाग्नितर्पणैः ॥ २२ ॥
क्षीरखण्डाज्यभोज्यैश्च भोजयेद्विधिवद्द्विजान् ।
न तेषां दुर्लभं किञ्चित् त्रिषु लोकेषु विद्यते ॥ २३ ॥
धनधान्यधरैश्वर्यपुत्रदारादिसम्पदः ।
प्राप्नोति विविधान् भोगान् देवानामपि दुर्लभान् ॥ २४ ॥

नशत्रुतोभयंतेषांदस्युभ्योवानराजतः । नशस्त्रानलतोयौघात्कदाचित्सम्भविष्यति

दीर्घायुर्बुद्धिमाँल्लोके उषित्वा शाश्वतीःसमाः ।
सर्वपापविशुद्धात्मा मृतः शिवपुरं व्रजेत् ॥ २६ ॥
एवं व्यास!पुरीम्प्राप्य रम्यां चोज्जयिनीं शुभाम् ।
समाश्रिता तदा देवी सततं विन्ध्यवासिनी ॥ २७ ॥
तस्मिंस्तीर्थेनरः स्नात्वा सर्वपापैः प्रमुच्यते ।
स्त्रियो वा रजदोषाक्ता बन्ध्या वै काकबन्ध्यका ॥ २८ ॥
दुर्भगा शीलहीना च सर्वकामविवर्जिता ।
विमलोदेऽपि ताःस्नात्वा दृष्ट्वा वै विन्ध्यवासिनीम् ॥ २९ ॥

मुच्यतेसर्वदोषैस्तु नात्रकार्याविचारणा । अपुत्राः प्राप्नुयुःपुत्रान्कन्यावीरंपतिंवरा
प्राप्यतेसर्वसौभाग्यं सर्वकामवरप्रदम् । विद्यावाञ्जायतेविप्रः क्षात्रयोविजयीभवेत्
वैश्यश्चबहुलाभाढ्यः शूद्रस्तुसुखमश्नुते । कथाम्पुण्यवतीमेतां सर्वकामवरप्रदाम्

पठनाच्छ्रवणाद्वापि गोसहस्रफलं लभेत् । ॥ ३३ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे-
ऽवन्तीक्षेत्रमाहात्म्येविन्ध्यवासिनीविमलोदतीर्थमाहात्म्यं नाम
षट्षष्टितमोऽध्यायः ॥ ६६ ॥

सप्तषष्टितमोऽध्यायः

क्षातासङ्गममाहात्म्यवर्णनम्

सनत्कुमार उवाच

तीर्थमन्यतरंव्यास क्षातासङ्गमसम्भवम् । यत्रतुस्नानमात्रेण महापापैःप्रमुच्यते
अमावैशनिवारेण यदायातिसमाहितः । पितॄनुद्दिश्ययः कुर्याच्छ्राद्धंचैवतिलोदकम्
पश्येच्छनैश्चरंदेवंस्थावरंलिङ्गमुत्तमम् । तस्यशानिश्चरीपीडा नभवेत्तुकदाचन ॥

व्यास उवाच

महातीर्थंसमाख्यातं महाकालवनेशुभे । भूयस्तुश्रोतुमिच्छामिविस्तरेणतपोधन

सनत्कुमार उवाच

श्रूयतांभोद्विजश्रेष्ठ!कथापौराणिकीशुभा । यस्याःश्रवणमात्रेणमहापापक्षयोभवेत्
रेवाचर्मण्वती क्षातातिस्रोनद्यः पुरानघ । त्रैलोक्यपावनीर्जाताभुविचामरकण्टकात्

पुण्याःपुण्यजला रम्याः पवित्राः पापहारिणीः (हारकाः) ।
पुनन्त्यः सर्वलोकानां पापिनः पापकारिणः (स्नानात्पानात्तथापगाः)

एकदोपवनेरम्ये मान्धातृक्षेत्रउत्तमे । मिथोरमन्तिसंहृष्टाः परस्परजिगीषया ॥ ८ ॥
किञ्चिद्वोग्प्रसङ्गेनमिथोभेदोह्यजायत । रेवासङ्गंपरित्यज्यभित्त्वाविन्ध्यगिरिंवरम्
महाकालवनेरम्ये समायातासरिद्वरा । यत्रक्षिप्रामहापुण्यापुरीह्येषाऽमरावती ॥ १०
सर्वतीर्थवरंश्रेष्ठं नाम्नारुद्रसरः स्मृतम् । भुक्तिमुक्तिप्रदंनित्यं सिद्धर्षिगणसेवितम्
यत्रागत्यपुराक्षाता क्षिप्रासङ्गंसमाश्रिता । तत्रतीर्थंपरंजातं क्षातासङ्गमसंज्ञितम् ॥

यत्रभूतरजो (जा) जातः सद्यःप्रोक्तो विभावसुः ।

व्यास उवाच

कथं सूर्यस्त्वया प्रोक्तो विरजो ह्यभवत्पुरा ॥ १२ ॥
एतद्वेदितुमिच्छामि त्वत्तो ब्रह्मविदाम्वर! ।

सनत्कुमार उवाच

पुरा तु सञ्ज्ञां सावित्रीं त्वष्टा स्वतनयान्ददौ ॥ १४ ॥

पतिधर्मरतानित्यं सवित्रेलोकचक्षुषे। तस्यांवैमिथुनंजज्ञेलोकसाक्षिविभावसोः॥
यमोवैवस्वतोजातोयमुनालोकपावनी। ततःसञ्ज्ञाब्रवीच्छायांस्वकीयांसूनृतांगिरम्
मिथुनंमेतवोत्सङ्गे धृतंतत्परिपालय। यावत्त्वहमितश्छाये वत्स्यामिस्वपितुर्गृहे
रविभक्तिरताताववचरत्वंममवेश्मनि। नोवाच्याहंकदाछाये! पितुर्वेश्मगतारवेः॥
एवंसासमयंकृत्वा सावित्रीह्यगमत्तदा। पितुर्वेश्मगताबाला सवितुर्भयविह्वला॥
पित्रानिवारितासातुवडवारूपधारिणी। विचचारवनेरम्ये बहूलोदकशाड्वले॥
एकदायाचितातेन सा यमेनबुभुक्षुणा। नौदनंवैतयादत्तं याचमानायतत्क्षणात्॥
तदापदाहतातेन छाया तं चशशापह। यस्मात्पादेन मे घातं कृतवान्बालभावतः॥
तस्मात्त्वंतुपदाखञ्जो भविष्यसिनसंशयः। एवंशप्तोरुजाक्रान्तो विललापशुचार्दितः
एतस्मिन्नन्तरेव्यास परिभूयवसुन्धराम्। भावयन्सकलाँल्लोकान्ब्रह्मचारीविभावसुः
दृष्ट्वाचतनयम्पङ्गुमित्युवाचतदायमम्। किमिदंवत्सतेकष्टंकुतः प्राप्तंत्वयाऽनघ!॥

इति पृष्टो यदा तेन सवित्रा लोकभावनः (लोकभास्वता)
उवाच गद्गदवचा यमः संयमिनीपतिः ॥ २६ ॥

प्रातराशायमेनाथ याचितंमातुरन्तिकात्। नोदत्तम्भोजनंक्षिप्रं बालभावेनताडिता
पादौमेगलितौसद्यो मातुःशापतिरस्कृतौ। तच्छ्रुत्वामोहमापन्नोरविर्ध्यानपरायणः

विचित्रमिदमाख्यातं मातुःशापस्य कारणम्।
एवं ध्यात्वा चिरं कालं ज्ञातवान् रविरंशुमान् ॥ २९ ॥

नेयंसारुचिरापाङ्गीत्वाष्ट्रीलोकस्यपावनी। केयंवाकुतआयाताकात्वंवदशुचिस्मिते

छायोवाच

नसासंज्ञामहाराज! छायातादात्म्यसम्भवा। गतावैसापितुर्गेहे धारिताहं तयाऽनघ
सवित्रेनैववक्तव्यं छायेकिञ्चित्कथञ्चन। एषमेसमयोनाथतेनाहं मौनमास्थिता॥
तच्छ्रुत्वाभगवांस्त्वष्टुः समीपंरथमास्थितः। जगामसहसाभानुर्बहुरोषसमन्वितः

तंदृष्ट्वासहसोत्थाय त्वष्टालोकपितामहः। पाद्यार्घाचमनीयादिमधुपर्कैरपूजयत्
नत्वा पादौपरिक्रम्यबहुमानपुरःसरम्। ऊचे मधुरयावाचा प्रियन्तेकरवामकिम्

रविरुवाच

क्वसातुसंज्ञासावित्री ममविप्रियकारिणी। आगता ते गृहं तात!मममार्गानुभेदिनी

त्वष्टोवाच

नहिजानीमहेतात प्रियायास्तेगतागतम्। इत्युक्ते वचनेत्वष्ट्रा रविर्दुःखितमानसः
किंकरोमिक्वगच्छामि क्वचप्रियतरामम। इतिसम्भाषमाणेतुत्वष्टावाक्यमथाब्रवीत्
तवतेजः परिभ्रष्टा भग्नाक्वापिगताबला। यदितेवल्लभाभार्या तेजस्त्वम्परिशामय

सूर्य उवाच

यद्येवंदुःसहंतेजो ममापूर्वंपितामह। यथातेरोचतेसम्यक् तथामेवर्षणंकुरु ॥ ४० ॥

इति सूर्यवचः श्रुत्वा शाणं कृत्वा सुदर्शनम्।
घृष्टितः क्षुरधारेण लघीयान्निर्मलोऽभवत् ॥ ४१ ॥

तस्यवर्षितमात्रेणतवष्टाचक्रेविवस्वतः। शा (श्रो) णंसुदर्शनंचक्रेसैकतामणिजातयः
तदात्वष्टाऽब्रवीद्वाक्यंमधुरंसूर्यसन्निधौ। महाकालवने रम्ये वडवा रूपधारिणी॥
गृह्यतांभोः सुरश्रेष्ठशीघ्रं गच्छतुशाड्वले। यत्रक्षिप्रासरिच्छ्रेष्ठायत्रक्षातासमागता
उभयोः सङ्गमो यत्रतत्रमुक्तिर्नसंशयः। तत्रसासुभगापत्नी प्राप्यते ते नसंशयः॥
इतितस्यवचः श्रुत्वा सवितासर्वतापनः। तत्रागच्छद्वनंयत्र महाकालस्यपावनम्॥
क्षातासङ्गमसंयुक्तायत्रक्षिप्रापयस्विनी। तत्रभुक्तिश्चमुक्तिश्च धनधान्यसमागमः॥

तत्रागत्य प्रियाम्भार्यां वडवारूपधारिणीम्।
ददर्श ताम्पुनःश्यामां हरिरूपधरो हरिः ॥ ४८ ॥
नासिकाघ्राणमात्रेण यौ जातावाश्विनावुभौ।
दर्शनीयौ सुकृष्णाङ्गौ भिषजौ तौ दिवौकसाम ॥ ४९ ॥

छायाचसुपुत्रेतत्र मिथुनंद्विजसत्तम!। तापींशनैश्चरं चैव सर्वलोकप्रतापनम्॥
शनियोगेयदाऽमावै जायतेसर्वकामदा। तदास्नानंतदादानं श्राद्धंचैवतुकारयेत्॥

तस्यहस्तगतालक्ष्मीजायतेसर्वदाभुवि । यःक्षातासङ्गमेस्नात्वादानंदद्याच्चशक्तितः
स्थावरेश्वरमभ्यर्च्यतस्यपापक्षयोभवेत् ।
सौरिःशनैश्चरोमन्दःकृष्णोऽनन्तोऽन्तकोयमः ॥ ५३ ॥
पिङ्गश्छायासुतोबभ्रुः स्थावरः पिप्पलायनः ।
एतानि शनिनामानि प्रातःकाले पठेन्नरः ॥ ५४ ॥
तस्यशानैश्चरीपीडा नभवेत्तुकदाचन । धर्मोऽपिसाक्षादत्रैव तपस्तेपेसुदुस्तरम् ॥
यज्ञकुण्डोत्तरेभागे तत्रतिष्ठतिमारुतिः । धर्मसरइतिख्यातंनाम्नातीर्थमनुत्तमम् ॥
यत्र सिद्धिम्परां प्राप्तस्तपसा पवनात्मजः ।
तस्मिंस्तीर्थे नरः स्नात्वा दत्त्वा वै कांस्यभाजनम् ॥ ५७ ॥
सवासो मणिमुक्ताभिः काञ्चनालङ्कृतंवरम् ।
ब्राह्मणेभ्योऽलंकृतेभ्यो वेदविद्भ्यश्च सादरात् (म) ॥ ५८ ॥
मातृलोकसमुत्तीर्णोब्रह्मलोकेमहीयते । श्रावणेधवलेपक्षेएकादश्यांतुयोनरः ॥ ५६ ॥
धर्मतीर्थे सदाचारी स्नानदानादिकाः क्रियाः ।
करोति सततं तस्य विष्णुलोकं सनातनम् ॥ ६० ॥
च्यवनाश्रमे नरः स्नात्वा च्यवनेशं विलोकयेत् ।
यत्र सिद्धिं गतौ पुण्यावाश्विनौ भिषजाम्वरौ ॥ ६१ ॥
च्यवनस्यप्रसादेनदेवपङ्क्तिमवापतुः । च्यवनेन पुरादृष्टिः प्राप्तावैदेवभेषजात् ॥ ६२
तस्मिंस्तीर्थेद्विजश्रेष्ठ!देवदृष्टिर्भवेन्नरः । अत्रैवप्राप्तवान्सूर्यः साग्निहोत्राश्रमम्परम्
ततःसंज्ञामहाभागा सावित्रीलोकविश्रुता । सूर्यलोकंसमासाद्यबुभुजेविपुलांश्रियम्
तस्माद्व्यास!परंतीर्थं क्षातासङ्गमसञ्ज्ञितम् । सर्वपापहरम्पुण्यं सर्वकामवरप्रदम् ॥
यएतांसुकथाम्पुण्यां शृणोतिभुविभक्तितः । पठेद्वाप्रातरुत्थाय तस्यपुण्यफलंशृणु
कपिलागोसहस्रेण फलम्भवतिपर्वणि । तत्फलं समवाप्नोति नात्रकार्याविचारणा
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे
क्षातासङ्गममाहात्म्यं नामसप्तषष्टितमोऽध्यायः ॥ ६७ ॥

अष्टषष्टितमोऽध्यायः

गयातीर्थमाहात्म्येगयातीर्थप्रशंसनम्

सनत्कुमार उवाच

शृणु व्यास!प्रवक्ष्यामि तीर्थमेकमतः परम् ॥ १ ॥
तीर्थानामुत्तमंतीर्थं गयानामेतिनामतः । यत्रस्नात्वानरोनित्यंमुच्यतेचऋणत्रयात्
देवान् पितॄन्समभ्यर्च्य विष्णुलोकं स गच्छति ।

व्यास उवाच

कीकटेषुगयापुण्या नदीपुण्या पुना पुनः(पुनःपुना) ॥ ३ ॥
तीर्थानामुत्तमंतीर्थंपुण्योराजगिरिस्तथा(च्यवनस्याश्रमःपुण्यःपुण्योराजगिरिस्तथा)
सकथंविदितोदेशे महाकालवनेशुभे । एतद्वेदितुमिच्छामि विस्तरेण तपोधन! ।

सनत्कुमार उवाच

शृणु व्यास!कथाम्पुण्यां पवित्रां पापहारिणीम् ॥ ५ ॥
यस्याः श्रवणमात्रेण पितरोयान्तिसद्गतिम् । पुराकृतयुगेपुण्ये युगादिदेवनामतः ॥
राजासीत्सतुधर्मात्मापुण्यश्रवणकीर्तनः। तस्यपालयतःसम्यक्प्रजाःपुत्रानिवौरसान्
बभूवुःसर्वसम्पन्ना वर्द्धमानाःसमन्ततः । धर्मश्चतुष्पदोनित्यं यस्मिन्राज्ञिप्रशासति
कालेवर्षी च पर्जन्यो ऋतवः स्वाङ्गचारिणः ।
बहुसस्यफला पृथ्वी गावश्च बहुदुग्धदाः ॥ ६ ॥
वेदवादरताविप्राः क्षत्रियाबाहुशालिनः । वैश्याधनपरा नित्यं शूद्राःशुश्रूषणेरताः ॥
वर्णाश्रमरताःसर्वे सर्वधर्मोपदेशकाः । श्रुतिस्मृतिपरोधर्मोहृष्टपुष्टजनाकरः ॥ ११ ॥
नाधिव्याध्यभिसम्भूता लक्ष्यन्ते केऽपि मानवाः ।
दुःशीला दुर्भगा नार्या विधवा नो तथैवच ॥ १२
बहुपुत्राल्पपुत्राश्च मृतपुत्रानबन्ध्यकाः । रूपशीलगुणोपेताः पतिव्रतपरायणाः ॥

सुमार्गकरसङ्कीर्णा दस्युदोषविवर्जितः । हूयताम्भुज्यतांशश्वद्दीयताञ्चगृहेगृहे ॥
जपदानतपोहोमस्तुतियज्ञक्रियापराः । जनाःसर्वत्रदृश्यन्तेसर्वधर्मपरायणाः ॥ १५ ॥
चतुष्पदश्चरोधर्मोह्यधर्मः पादविग्रहः । एवं राजा सधर्मात्मा युगादिदेवसञ्ज्ञितः
येनेयंपालितापृथ्वीधर्मेणवर्द्धिताः प्रजाः । अवन्त्यांच पुराव्यास!यज्ञकोटिसमाचरत्
तस्मिन्कालेऽतिविक्रान्तस्तुहु (ह) ण्डोनामदानवः ।
तेन सर्वं वशं नीतं चराचरमिदं जगत् ॥ १८ ॥
घोरं तप्त्वा तपः पुण्यं ब्रह्मलब्धवरःखलः । नैवदेवानयज्ञाश्च वेदमार्गविवर्जिताः॥१६
देवतापूजनं नास्ति स्वधास्वाहानदृश्यते । उत्सन्नोधर्ममार्गोऽयंशाश्वतोवैदुरासदः
नष्टप्रायाःसुरास्तेन कृताः सर्वोत्तमोत्तमाः । ब्रह्माणंशरणंजग्मुः पितॄणांसहसाधुभिः
किं कुर्मः क च गच्छामस्तुहु (ह) ण्डेन पराजिताः ।
इति श्रुत्वा वचस्तेषां ब्रह्मा लोकपितामहः ॥ २२ ॥
समुत्थायततः सर्वैर्विष्णुलोकंजगामह । तत्रगत्वासमाराध्य विष्णुदेवगणैः सह
स्तुतिपुरुषसूक्तेनविष्णोरतुलतेजसः । प्रचक्रुस्तुसर्वएतेह्यात्मनोऽभ्युदयाय च ॥ २४
तदा तेषां शमिच्छन्ती वैष्णवी चा (वागुवाचा) शरीरिणी ।
श्रूयताम्भोः सुरश्रेष्ठा भवतां श्रेय उत्तमम् ॥ २५ ॥
यूयंयातक्षितौक्षिप्रं महाकालवनं प्रति । गुह्याद्गुह्यतरं पुण्यं पवित्रंपापनाशनम्
नोयत्रमायिनांमाया प्रकाशयतिभूतले । सर्वतीर्थमयंतीर्थं कोटितीर्थवरप्रदम ॥ २७
यत्रक्षिप्रासरिच्छ्रेष्ठा सर्वकामफलप्रदा । दैत्यान्तकारिणीदिव्या महाकालीकुलेश्वरी
कोटिकोटिगणाकीर्णा मातॄणांशक्तिवर्द्धनी । गयायत्रमहापुण्या फल्गुश्चैवमहानदी
पुरुषोत्तमगिरिः श्रेष्ठो यत्रबुद्धगयास्मृता । तथैवचगयाख्याता त्रिषुलोकेषुविश्रुता
विष्णोःषोडशपदीतीर्थं गदाधरविनिर्मितम् । सर्वपापहरापुण्या यत्रप्राचीसरस्वती
महासुरनदीप्रोक्ता पञ्चतिष्ठन्तिपुण्यदाः । न्यग्रोधश्चाक्षयोनित्यः पुराप्रोक्तोमहर्षिणा
तत्रैव साशिलाप्रोक्ता प्रेतमोक्षकरीशुभा । तत्रैववसतेसर्वा देवताः पितृकल्पजाः ॥
सर्वाक्षरमयोङ्कारः सर्वदेवमयोहरिः । सर्वतीर्थमयादेवा गयातीर्थमनुत्तमम् ॥ ३४ ॥

शीघ्रंगच्छततत्रैव परांसिद्धिमवाप्स्यथ । यत्रप्रविष्टमात्रेण पितरोनिरयस्थिताः ॥
ते सर्वे स्वर्गमायान्ति ब्रह्मभूयाय कल्पते ॥ ३६ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्त्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे-ऽवन्तीक्षेत्रमाहात्म्ये गयातीर्थमाहात्म्येगयातीर्थप्रशंसा नामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥

एकोनसप्ततितमोऽध्यायः

गयामाहात्म्येश्राद्धविधिवर्णनम्

व्यास उवाच

विचित्रमिदमाख्यातं गयामाहात्म्यमुत्तमम् ।
भगवन्! भवता सर्वं विदितं विश्वमूर्तिना ॥ १ ॥
तत्सर्वं श्रोतुमिच्छामि श्राद्धस्यफलमुत्तमम् । क्षेत्रस्यचद्विजश्रेष्ठविस्तरेणतपोधन
कियन्तःपितरोनित्यं तृप्तायान्तिसुरालयम् । केषांकेपितरः प्रोक्ताःकेतआसन्पुरानघ

सनत्कुमार उवच

धन्योऽसि कृतकृत्योऽसि यस्य ते नैष्ठिकी मतिः ।
तथापि श्रूयतां वत्स! श्राद्धस्य विधिमुत्तमम् ॥ ४ ॥
श्राद्धे प्रकल्पिता लोकाः श्राद्धे धर्मः प्रतिष्ठितः ।
श्राद्धे यज्ञा हि तिष्ठन्ति सर्वकामफलप्रदाः ॥ ५ ॥
श्राद्धेयद्दीयतेकिञ्चिद्देवविप्राग्नितर्पणम् । श्राद्धेतद्धिविजानीयात्पुराप्रोक्तं महर्षिणा
मनुष्याऋषयः सर्वे सुरसिद्धाश्चमानवाः । गन्धर्वाः किन्नरानागा ब्रह्मेशानासुरेश्वराः
त्रींस्त्रीन् पिण्डान् समुद्दिश्य श्राद्धं दत्त्वा समाहिताः ।
प्राप्नुवन्त्यखिलान् कामान् सर्वान् व्यास!मनोगतान् ॥ ८ ॥

एवंपरापरम्पमार्गं प्रवर्तन्तेसनातनम् । तथापिपितरोह्येते समाख्यातास्तपस्विभिः
तत्सर्वंसम्प्रवक्ष्यामि यथाश्रुतंतथाशृणु । यथैनंपितरो देवा देवाश्चपितरस्तथा १०
अन्योन्यंपितरोह्यते देवाः पितृगणैःसह । मार्कण्डेनपुरापृष्टं प्रश्नमेतंद्विजोत्तम ॥ ११

निबोधयामि ते व्यास! निखिलं सर्वमादितः ।
यावन्तस्ते पितृगणास्तस्मिंल्लोके च ते गताः ॥ १२ ॥

सनत्कुमार उवाच

सप्तैतेयजतांश्रेष्ठाः सर्वेपितृगणाःस्मृताः । चत्वारोमूर्तिमन्तोवै त्रयस्तेषाममूर्तयः
तेषांलोकंविसर्गञ्चकीर्तयिष्यामितच्छृणु । प्रभावत्वंमहत्त्वञ्च विस्तरेणतपोधन॥
धर्ममूर्तिधरास्तेषां त्रयोयेपरमागणाः । तेषांनामानिलोकांश्चकीर्तयिष्यामितच्छृणु

लोकाः सनातनानाम यत्र तिष्ठन्ति भास्वराः ।
अमूर्तयः पितृणास्ते वै पुत्राः प्रजापतेः ॥ १६ ॥

विराजस्यद्विजश्रेष्ठ वैराजाइतिनः श्रुतम् । यजन्तेतान् देवगणा विधिदृष्टेनकर्मणा
एतेवै योगविभ्रष्टा लोकान्प्राप्यसनातनान् । पुनर्युगसहस्रान्ते जायन्ते ब्रह्मवादिनः

ते प्राप्य तां स्मृतिम्भूयः साङ्ख्ययोगमनुत्तमम् ।
यान्ति योगगतिं सिद्धाः पुनरावृत्तिदुर्ल्लभाम् १६ ॥

एतेस्युः पितरस्तात योगिनांयोगवर्द्धनाः । आप्याययन्तियेपूर्वं सोमंयोगबलेनवै

तस्माच्छ्राद्धानि दीयन्ते योगिनां द्विजसत्तम! ।
एष वै प्रथमः कल्पः सोपानमिति विश्रुतम् ॥ २१ ॥

एतेषां मानसी कन्या मेनानाममहागिरेः । पत्नीहिमवतःश्रेष्ठा यस्यांमैनाकउच्यते

मैनाकस्य सुतः श्रीमान् क्रौञ्चो नाम महागिरिः ।
अग्निष्वात्ताः पितृगणास्तत्र तिष्ठन्ति भास्वराः ॥ २३ ॥
याम्यां बर्हिषदाआसन् यमाद्याश्चैव पश्चिमाम् ।
सोमपाश्चोत्तराम्प्राप्ता दिशं धनदपालिताम् ॥ २४ ॥
अमूर्तिमन्तावाकाशे कव्यवाडनलौ क्षितौ ॥ २५ ॥

यक्षरक्षःपिशाचाश्च यजन्ते भावितात्मनः ।
साध्या देवान्यन्तिस्म विश्वेदेवा ऋषींस्तथा ॥ २६ ॥

मानवाः श्राद्धदेवं च ऋषयो ब्रह्म सनातनम् । एवं परम्पराप्राप्तः श्राद्धधर्मः सनातनः
देवकार्यात्परं कार्यं पितृकार्यं विशिष्यते । भरद्वाजात्मजाः सप्त श्राद्धधर्मपरायणाः

जातिस्मरत्वमापन्ना निर्वाणपदवीं गताः ।
गुरोश्च दोग्ध्रीं गां हत्वा सप्तैते वै द्विजाधमाः ॥ २६ ॥

पितॄनुद्दिश्य ते सर्वे भक्षयन्तः क्षुधार्दिताः । तेन पुण्यप्रभावेण योगभ्रष्टा दिवंगताः

सप्त जातिस्मरास्ते वै योगयुक्ता बभूविरे ।
तस्माच्छ्राद्धं परं प्रोक्तं सूरिभिः परमात्मभिः ॥ ३१ ॥
श्राद्धे प्रतिष्ठिता लोकाः श्राद्धे योगः परन्तप! ।
एवं ते पितरः प्रोक्ताः श्राद्धस्य च विधिं शृणु ॥ ३२ ॥

ब्रह्मचर्यरतो दान्तो नक्रोधी न चमत्सरी । शौचाचारपरोधीरःशास्त्रदृष्टिजितेन्द्रियः
एवं यः कुरुते श्राद्धंतीर्थे चैवविशेषतः । ततोऽधिकतराप्रोक्ता तृप्तिर्व्यास क्षयेऽहनि
वृद्धिश्राद्धे तथा प्रोक्ता महालयेशताधिका । ततो दशगुणाप्रोक्ताप्रयागे द्विजसत्तम

प्रयागाद्दशगुणा तृप्तिः कुरुक्षेत्रे च सत्तम ।
कुरुक्षेत्रात्ततो व्यास दशाधिका गया स्मृता ॥ ३६ ॥

ततो दशाधिका व्यासमहाकालवने शुभे । अवन्त्यांसर्वतःपुण्यं गयातीर्थे चसर्वदा
येषां निरयमापन्नाः पितरो जन्मजन्मनि । तेषामुद्धरणार्थाय तीर्थमेतत्सुदुर्लभम्
सकृत्स्मरणमात्रेण पितॄणां दत्तमक्षयम् । ये नरा रणमध्यस्थाः पितृवंशविवर्जिताः
गर्भपाते मृता ये च नामगोत्रच्युतास्तथा । स्वगोत्रे परगोत्रे वा आत्मघातमृताःपरे
तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयताम् । उद्बन्धनमृता येच विषशस्त्रैर्मृताश्चये
दंष्ट्रिभिर्व्यङ्गतो वापि दौर्ब्राह्मण्ये मृताश्च ये । तेषामुद्धरणार्थाय अत्रश्राद्धं विधीयते

अग्निदग्धाश्च ये जीवा नाग्निदग्धास्तथा परे ॥ ४३ ॥

विद्युद्घातेन ये केचिन्मुद्गराभिहताः परे । तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते

रौरवे चान्धतामिस्रे कालसूत्रे च ये गताः ।
अनेकयातनासंस्थाः प्रेतलोके च ये गताः ॥ ४५ ॥
असिपत्रवने घोरे कुम्भीपाके च ये गताः । पशुयोनिगता ये च पक्षिकीटसरीसृपाः
तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ४६ ॥
उदकेषु मृता ये च नारीसूतीमृतास्तथा ॥ ४७ ॥
अश्वसूकरकृमिदंष्ट्रिश्वशृङ्गिशकटाहताः । तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते
भग्नदंष्ट्राश्च शस्त्रास्त्रव्याघ्राहिगजभूमिपैः । शलभैर्वृश्चिकैर्दंष्ट्रिचोरैर्ये चापि घातिताः
तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ४९ ॥
अष्टशल्यैर्मृता येचशौचाचारविवर्जिताः । विषूचिकामृता ये चयेचातोसारतोमृताः
तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ५० ॥
शाकिन्यादिग्रहग्रस्तजलमध्ये च ये मृताः ।
अस्पृश्यस्पर्शसंस्पृष्टाः पापा अपत्यवर्जिताः ।
तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ५१ ॥
जन्मांतरसहस्राणिभ्रमंतिस्वेन कर्मणा । मानुषंदुर्लभं येषांतेभ्यःश्राद्धंविधीयताम्
येऽन्यजन्मन्यबान्धवा येऽन्यजन्मनि बान्धवाः ।
येऽन्यजन्मनि संबद्धामित्रामित्रे तथा परे ।
तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ५३ ॥
पितृवंशे मृता ये च मातृवंशे तथैव च । गुरुश्वशुरबंधूनां ये चान्ये बाधन्वामृताः
तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ५४ ॥
ये मे कुले लुप्तपिंडाः पुत्रदारादिवर्जिताः ।
क्रियालोपगता ये च तेभ्यः श्राद्धं विधीयते ॥ ५५ ॥
पङ्गुकुब्जा विरूपाश्च आमगर्भाश्च ये मृताः ।
ज्ञाताऽज्ञाताः कुले ये च तेभ्यः श्राद्धं विधीयते ॥ ५६ ॥
आब्रह्मभुवनाद्ये च अन्यैर्दुर्मरणैर्मृताः । तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते

तृषार्ताः क्षुधिताश्चैवहापिताश्चैवयेमृताः । प्रेतयोनि गताश्चैव म्लेच्छयोनिगताश्चये
तेषामुद्धरणार्थाय अत्र श्राद्धं विधीयते ॥ ५८ ॥
एवं श्राद्धविधिं व्यास! तस्मिंस्तीर्थे समाचरेत् ।
ऋणत्रयविनिर्मुक्तो वाञ्छितार्थं लभेत सः ।
गयायां च समासाद्य सुरा इन्द्रपुरोगमाः ।
चक्रुश्च विधिवत्सर्वं यदुक्तं देवभाषया ॥ ५९ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
ऽवन्तीक्षेत्रमाहात्म्ये गयामाहात्म्ये श्राद्धविधिवर्णनं
नामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

सप्ततितमोऽध्यायः

गयातीर्थमाहात्म्यवर्णनम्

सनत्कुमार उवाच

ततः सुरगणाः सर्वे धूतपापाः समाहिताः । पुनर्योगबलं प्राप्य स्वाधिकारंययुः पुरा
एवं व्यास गयातीर्थं कुमुद्वत्यां सुनिश्चितम् ।
गयायां यानि तीर्थानि पुण्यान्यायतनानि च ॥ २ ॥
तत्तीर्थेषु नरः स्नात्वा तत्तत्तीर्थफलं भवेत् । तथैव च गयाक्षेत्रं गयाश्राद्धफलप्रदम्
फल्गुश्च सरितां श्रेष्ठातथैवफलदायिनी । आदिगयाबुद्धगया तथाविष्णुपदीस्मृता
गयाकोष्ठस्तथा प्रोक्तोगदाधरपदानि च । वेदिका षोडशी प्रोक्ता तथैवचाक्षयोवटः
प्रेतमुक्तिकरी नित्यं शिला चोक्ता तथैव च ।
अच्छोदा निम्नगा प्रोक्ता पितृणां चाश्रमोत्तमः ॥ ६ ॥
देवानां दानवानां च यक्षकिन्नररक्षसाम् । पन्नगानां च सर्वेषां तथैवाश्रम उत्तमः

एतत्स्थानेषु सर्वेषु स्नानदानादिकाः क्रियाः ।
श्राद्धं च विधिवद्देयं तत्तत्तीर्थफलं लभेत् ॥ ८ ॥
गयायां पितृरूपेणस्वयमेवजनार्दनः । तं ध्यात्वा पुंडरीकाक्षंमुच्यते च ऋणत्रयात्
एवं व्यास! गयातीर्थं पुरावन्त्यां प्रतिष्ठितम् ।
पश्चात्तु कैकटे जातं यत्रसन्निहितोऽसुरः ॥ १० ॥
तदारभ्य द्विजश्रेष्ठ गया तत्र प्रतिष्ठिता । गदाधरपदाघातैर्महासुरो निपातितः
तत्पदे च महिमानं जनार्दनसमर्पितम् ॥ १२ ॥
पंचकोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः । यत्र तत्र करिष्यामि पितॄणां दत्तमक्षयम्
सर्वदा सर्वकालेषु गयाश्राद्धं विधीयते ॥ १३ ॥
सम्वत्सरे परं व्यास! दिनमेकं प्रतिष्ठितम् । कन्यास्थे च दिवानाथेहस्तनक्षत्रसंयुते
महालयेति तत्प्रोक्तं पितॄणां दत्तमक्षयम् ॥ १४ ॥
सर्वदा सर्वकालेषु गयाश्राद्धं विधीयते ॥ १५ ॥
सम्वत्वसरेपरंव्यासदिनमेकंप्रतिष्ठितम् । अन्वष्टकायांकुर्वन्तिमातॄणांश्राद्धमुत्तमम्
अक्षया जायते तृप्तिः पितॄणां कल्पसङ्ख्यया ।
एवं व्यास! पुरी रम्या स्नानदानादिकर्मसु ॥ १७ ॥
भूयस्तु सम्प्रवक्ष्यामि माहात्म्यं परमाद्भुतम् ।
तच्छृणुष्व मयाख्यातं पवित्रं पापनाशनम् ॥ १८ ॥
सप्तर्षीणां च या भार्या ऋषिपत्न्यः पतिव्रताः ।
स्वाहादोषपरिभ्रष्टा दूषिताः पावकेन च ॥ १६ ॥
ऋषिभिश्च परित्यक्ता बभ्रमुश्च वनाद्वनम् । एवं बहुतिथे कालेनारदो देवदर्शनः
तासां च प्रियमन्विच्छन्समायातो वनान्तरे ।
ताभिश्च सत्कृतो नित्यं समासीनो धृतव्रतः ॥ २१ ॥
उवाच श्लक्ष्णयावाचा देशकालोचितं वचः । किमिदंविकृतंजातंभवतीनांपराभवः
कस्माच्च ऋषिभिस्त्यक्ता लोकमातरः पतिव्रताः ॥ २३ ॥

ऋषिपत्न्य ऊचुः

न जानीमो वयंतातयेनदोषेणतापसैः । विमुक्ताः साग्निकैःक्षिप्रं कार्तिकेयप्रसङ्गतः
लोकापवादजं किञ्चिज्जातंदिष्टवशादघम् । किं कुर्मोवाक्वगच्छामःकितपःकाचदेवता
यस्याराधनपुण्येन पतिसान्निध्यमाप्नुयुः । एतन्निश्चित्य भोब्रह्मन्ब्रूहित्वंवेदतत्त्वतः
इति पृष्टस्तदा ताभिर्ऋषिपत्नीभिर्नारदः । उवाच सुचिरंध्यात्वातासांसशर्महेतवे

नारद उवाच

श्रूयतां भोस्तपःश्रेष्ठाभवतीनां च कारणम् । महाकालवने रम्येगयातीर्थमनुत्तमम्
तत्रैव चाक्षयो नाम न्यग्रोधः शाखिनां वरः । तत्रागमनमात्रेण धूतदोषाभविष्यथ
सर्वदोषहरं तीर्थं सर्वकामवरप्रदम् । सर्वसौख्यकरं पुण्यं तत्र गच्छत माचिरम्
नारदस्य वचः श्रुत्वा ऋषिपत्न्यः सुचोदिताः ।
महाकालवने व्यास! इच्छन्त्यः प्रियमात्मनः ॥ ३१ ॥
आजग्मुस्तद्वनं तत्र यत्रतीर्थंगयाभिधम् । तत्रगत्वाशुचीभूयस्नानदानादिकाःक्रियाः
कृतास्ताभिश्च पुण्याभिर्नभस्यस्यासितेतरे ।
पञ्चम्यामृषिसञ्ज्ञायां ताभिः सुचरितं व्रतम् ॥ ३३ ॥
उपोष्य चैकरात्रंतु जागरं चैव योगतः । कृतमात्रे व्रते व्यास धूतपापाबभुःक्षणात्
भर्तृकोपपरिभ्रष्टाः सद्यः प्राप्ता गृहाश्रमम् । ऋषिभिःसाग्निकं दत्तं पूर्ववदृषिसत्तम
तदाप्रभृति लोकेऽस्मिन्पञ्चमी ऋषिसञ्ज्ञिता ।
ये नराश्चाथ नार्यो यास्तां कुर्वन्ति तु भक्तितः ॥ ३६ ॥
नीवाराहारकं कृत्वा शुचीभूय समाहिताः ॥ ३७ ॥
नतेषांजायतेकिञ्चिदापद्दुःखं कदाचन । दुर्भगत्वंचनारीणां न वियोगश्चमातृभिः
पुत्रतो धनतो वापि कदाचित्सम्भविष्यति ।
एवं व्यास! समाख्यातं यत्त्वया परिपृच्छितम् ॥ ३६ ॥
अवन्त्यामीदृशं तीर्थं वर्तते भुविसत्तम । तादृशं पुण्यदं किञ्चिन्नास्तिब्रह्मांडगोलके
अस्मिंस्तीर्थे नरः कश्चिन्महादानानि चेच्चरेत् ।

अक्षयाणि भवन्त्यस्य विष्णुलोके महीयते ॥ ४१ ॥
यो वै नियमवान्भूत्वा कथामेतां शृणोति वा ।
पठेच्च सततं व्यास!हयमेधफलं लभेत् ॥ ४२ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-ऽवन्तीक्षेत्रमाहात्म्ये गयातीर्थमाहात्म्यवर्णनं नामसप्ततितमोऽध्यायः ॥ ७० ॥

एकसप्ततितमोऽध्यायः

पुरुषोत्तमेश्वरमाहात्म्यवर्णनम्

व्यास उवाच

पुरुषोत्तमं परं तीर्थं त्वयाप्रोक्तं पुरानघ । माहात्म्यंतस्यतीर्थस्य विस्तराद्वदमेप्रभो
एतत्तु श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥ १ ॥

सनत्कुमार उवाच

शृणुष्व भो द्विजश्रेष्ठ! कथां पापहरां पराम् ॥ २ ॥
यस्याः श्रवणमात्रेण महापापक्षयो भवेत् । पुराकल्पेषु वै ब्रह्मन्वैकुण्ठे विमले शुभे
समासीनो रमानाथो पार्षदैःसनकादिभिः ।
महर्षिभिः सदाचारैः पितामहपुरोगमैः ॥ ४ ॥
ऋद्धिसिद्धिगुणोपेतैस्तत्त्वैस्तैर्महदादिभिः ।
गणगन्धर्वसङ्घैश्च सेव्यमानः समन्ततः ॥ ५ ॥
किन्नरोद्गानसन्मावैर्नृत्यद्भिरप्सरोगणैः । चिंतामणिगृहोद्गारललिताङ्गणभूमिषु
कल्पद्रुमकृतच्छाय आसीने हि मुरद्विषि ।
धर्मवादरताः सर्वे ब्रह्ममार्गसुनिश्चिताः ॥ ७ ॥
तेषां मध्ये परा भाषा ह्यपृच्छत्कमलापतिम् ॥ ८ ॥

लक्ष्मीरुवाच

पुण्यकानां विधिं नाथ! श्रोतुमिच्छामि तत्त्वतः ।
सर्वज्ञोऽसि महाप्राज्ञ! वाचयतां यदि रोचते ॥ ९ ॥

श्रीभगवानुवाच

दानं स्नानं तपः श्राद्धं सदा शस्तं हि शोभने! ।
तथापि विधिना प्राप्तं तत्सर्वं चाक्षयं भवेत् ॥ १० ॥
देशे काले पर्वणि च तीर्थे चायतनेपदे । दानंस्नानंतपःश्राद्धं मुनिभिःपरिकीर्तितम्
पूर्णमास्याममावास्यांसङ्क्रान्तौग्रहणेतथा। वैधृतौचव्यतीपातेदानवृद्धिःपरास्मृता
गङ्गायां भास्करक्षेत्रे कुरुक्षेत्रे च पुष्करे । गोदावर्यां गयायांच तीर्थे चामरकण्टके
अवन्त्यां च हुतदत्तं तत्सर्वं चाक्षयंभवेत् । तस्मात्सर्वप्रयत्नेन पर्वे तीर्थं समाचरेत्
कुचैलो दुर्भगो मूर्खो जडो रोग समन्वितः ।
तीर्थपर्वपरिभ्रष्टो नरो भवति निश्चितम् ॥ १५ ॥
के योगाः सुकृतानां च कर्तव्याश्च विशेषतः ॥ १६ ॥

श्रीकृष्ण उवाच

साधु पृष्टः प्रिये!प्रश्नः पुण्यकानांत्वयाऽनघे । मलमासेसमायाते ये नरा व्रतवर्जिताः
जन्मजन्मनि दारिद्र्यं तेषां भवति शोभने! ॥ १७ ॥

श्रीरुक्मिण्युवाच

कीदृशो हिमलोमासःकेनयोगेन जायते । कदा काले समायातिएतन्नोवदविस्तरात्

श्रीकृष्ण उवाच

युक्तमुक्तं त्वयादेवि प्रश्नः कालोयमीदृशः । देवतापितृकार्याणिविधिनाहिमलिम्लुचे
क्षौरं मौंजी विवाहश्चव्रतोपवासकंतथा । विशेषेण गृहस्थानां वर्ज्यं मुनिवरोत्तमैः
सम्वत्सरत्रयान्तेच मासोयमधिगच्छति । असंक्रमे रवेरस्मिंस्तस्मादधिकमासकः
अधिमासाधिपत्योऽहं सदैव पुरुषोत्तमः । ममाभिधानं तीर्थं च महाकालवने शुभम्
पुरुषोत्तमाख्यं मे धाम सदैवात्र प्रतिष्ठति । तस्मात्सर्वप्रयत्नेन गन्तव्यंहित्वयासह

महाकालवनेतत्र यत्र तीर्थं ममाभिधम् । प्राणिनोयेसमायांति मज्जनार्थंप्रियेध्रुवम्
तेषामिह ममादेयं न कदापि भविष्यति । धनधान्यकलत्रादि पुत्रसौख्यं सदैव हि
असङ्क्रान्तेऽपि सम्प्राते मामुद्दिश्य व्रतं चरेत् ।
अधिमासाधिपत्योऽहं सदा वै पुरुषोत्तमः ॥ २६ ॥
स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम् ।
देवतार्चा च मध्याह्ने ये कुर्वन्ति नरोत्तमाः ॥ २७ ॥
अक्षयं च भवेत्सर्वं तेषां वै कमले ध्रुवम् । मलमासो गतः शून्यो येषांदेविप्रमादतः
दारिद्र्यं चसदातेषांशोकरोगविवर्धनम् । अधिमासेसमायाते अवन्त्यांव्रतमाचरेत्
तेषां ददाम्यहं प्रीत्या त्वामेव च न संशयः ।
स्वल्पं दानमलं कार्यं यत्किंचिदिह यत्कृतम् ।
तत्सर्वं मत्प्रसादेन ह्यनन्तं प्रियदर्शने! ॥ ३० ॥

श्रीरुवाच

ईदृशो हि त्वया प्रोक्तो ह्यधिमासस्य सुव्रत ॥ ३१ ॥
महिमा ह्यपि लोकानां सर्वकामवरप्रदः । अधिमासव्रतं पुण्यं कथयस्व प्रसादतः ॥

श्रीकृष्ण उवाच

असङ्क्रान्तोयदामासःप्राप्यतेमानवैःप्रिये।महोत्सवस्तदाकार्यआत्मनोहितकाङ्क्षिभिः
कृष्णपक्षेचतुर्दश्यां नवम्यां वा सुरेश्वरि । अष्टम्यां चाथकर्तव्यं व्रतंशोकविनाशनम्
यथालाभोपहारेण मासे चापि मलिम्लुचे ।
पुण्याहेप्रातरुत्थायकृत्वा पौर्वाह्णिकीं क्रियाम् ॥ ३५ ॥
गृहीत्वा नियमं पश्चाद्वासुदेवं हृदि स्मरन् । उपवासं च नक्तं च एकभुक्तंच मानिनि
एकस्य निश्चयं कृत्वा ततो विप्रान्निमन्त्रयेत् ।
सपत्नीकान्सदाचारान्कुलीनाञ्ज्ञातिसम्भवान् ॥ ३७ ॥
ततोमध्याह्नसमये लक्ष्मीयुक्तं सनातनम् । स्थापयेदव्रणे कुम्भे वेदमन्त्रैर्द्विजातिभिः
पूजयेत्परयाभक्त्यागोत्रिभिःसपितामहम् । गन्धतोयेन संस्थाप्यपञ्चामृतैस्तथैव

मिष्टान्नैर्नवभिश्चैव नैवेद्यैर्धूपदापकैः । आच्छादनैश्च वस्त्रैश्च पीतकौशेयकैस्तथा
घण्टामृदङ्गनिर्ह्रादैर्घोषध्वनिसमन्वितैः । आरार्तिकं व्रती कुर्यात्कर्पूरागरुचन्दनैः ॥
अलाभे तूल्मुकैश्चापि फलस्यानन्त्यहेतवे । ताम्रपात्रस्थिते तोयेचन्दनाक्षतपुष्पकैः
अर्घ्यं दद्यात्सपत्नीकः प्रहृष्टेनान्तरात्मना ।
पञ्चरत्नैः समायुक्तैर्जानुनीकृत्य भूतले ॥
समादाय च पाणिभ्यां सर्वभक्तिसमन्वितः ॥ ४३ ॥

अर्घ्यमन्त्रः

कृपावन्सर्वभूतेषु जगदानन्दकारक! । गृहाणार्घ्यमिमं देवसम्पूर्णफलदो भव ॥

प्रार्थनामन्त्रः

स्वयम्भुवे नमस्तुभ्यं ब्रह्मणेऽमिततेजसे । नमोऽस्तु ते श्रियानन्दब्रह्मानन्द कृपाकर
एवं सम्प्रार्थ्य गोविन्दं पूजयेद् ब्राह्मान्स्वयम् ।
सपत्नीकाञ्छुचीन्स्नाताल्लँक्ष्मीनारायणौ स्मरन् ॥ ४६ ॥
पूजयित्वा विधानेन भोजयेद्घृतपायसैः ॥ ४७ ॥
भोजयित्वा विधानेन सपत्नीकं यथोचितम् ।
विद्याविनयसम्पन्नं तथा पत्न्या समन्वितम् ॥ ४८ ॥
पूजयित्वा यथाशक्त्या वस्त्रालङ्कारकुङ्कुमैः ।
गोस्तन्याम्रकपित्थैश्चखर्जूरैः कदलीफलैः ॥ ४९ ॥
पनसैर्नारिकेलैश्च नारङ्गैर्दाडिमैस्तथा । घृतपक्वान्नगोधूमैः शुभैः सोमालिकैर्वटैः ॥
शर्कराघृतपूरैश्च कर्णिकैः खण्डमण्डकैः । उर्वारुकर्कटीशाकैः शृङ्गबेरैः समूलकैः ॥
अन्यैश्च विविधैः शाकैराम्रैः पक्वैःपृथक् पृथक् ।
भक्ष्यभोज्यलेह्यपेयकन्दकानि विशेषतः ॥ ५२ ॥
सुवासितान्गोरसांश्च परिवेष्यमृदु ब्रुवन् । इदं स्वादुरसंभोज्यं भवदर्थेप्रकल्पितम्
याच्यतांरोचतेयच्चयन्मयापाचितंप्रभो ।धन्योऽस्म्यनुगृहीतोस्मिकृतंसार्थंचमन्दिरम्
विसर्जयेत्ततो विप्रान्दत्त्वा ताम्बूलदक्षिणाः । चतुर्भिर्मिलितैर्दैवताम्बूलंमम वल्लभम्

यो ददाति द्विजश्रेष्ठे स भवेत्सुभगो नरः। सुभगा च सदाचारा वल्लभा स्वजनेसदा
पुत्रसौभाग्ययुक्ता च ताम्बूलैर्जायते प्रिये! ।
पत्रैस्तु केशवः प्रीतः पूगैरीशः सहोमया ॥ ५७ ॥
चूर्णकेनानलःप्रीतःखदिरेणतुमन्मथः। चतुर्भिर्विश्वरूपोऽसौ यः पुष्णातिजगत्त्रयम्
परितोष्य सपत्नीकान्हस्ते दत्त्वा च मोदकान्।
आसीमान्तमनुव्रज्य भुञ्जीत सह बन्धुभिः ॥ ५९ ॥
असङ्क्रान्ते व्रतं नारी या करोतीह सुप्रिये! ।
दारिद्र्यं पुत्रशोकं च वैधव्यं नाप्नुयात्कचित् ॥ ६० ॥
नरो वा यदि वा नारी यः कुर्याच्च मलिम्लुचे।
स सर्वसुखभोक्ता च भवेन्नास्त्येव संशयः ॥ ६१ ॥
मलिम्लुचे प्राप्य न पूजितो यैर्नारायणोऽहं परयेह भक्त्या।
कथं भवेयुः सुखपुत्रसम्पत्सुहृत् सुभार्याः सुगुणैरुपेताः ॥ ६२ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमे ऽवन्तीखण्डे-ऽवन्तीक्षेत्रमाहात्म्ये पुरुषोत्तममाहात्म्ये दानादिमाहात्म्यवर्णनं नामैक-सप्ततितमोऽध्यायः ॥ ७१ ॥

———

द्विसप्ततितमोऽध्यायः

अधिमासस्नानदानादिमाहात्म्यवर्णनम्

सनत्कुमार उवाच

अधिमासं समासाद्ययोऽन्यत्रस्थितिमात्मनः। करोतिसनरोमूर्खो महाकालवनादृते
अधिमासे नरो व्यास! तीर्थे पुरुषोत्तमाभिधे।
स्नात्वा दत्त्वा च दानानि तेषां लोकाः सनातनाः ॥ २ ॥

पुरुषोत्तमं समभ्यर्च्य रमालालितपादकम्। तथैवच उमां देवीं शङ्करेण च पूजयेत्
वाञ्छितार्थशतं प्राप्य विष्णुलोके महीयते।
भाद्रपदे सिते पक्षे एकादश्यां समाहितः ॥
उपोष्य विधिवद्व्यास! रात्रौ जागरणं चरेत् ॥ ४ ॥
विषमोद्ध पूजनं कार्यं जलयात्रातथैवच। पुरुषोत्तमसरेनित्यं तस्यपुण्यफलंश्रृणु
पुत्रदारधनं सम्यगायुरोग्यसम्पदः। न तेषां दुर्लभंकिञ्चित्त्रिषु लोकेषु विद्यते॥
तस्य पूर्वतरे भागे जटेश्वरमहेश्वरः। तिष्ठति तापसस्तीरे यत्र राजा भगीरथः॥
तपस्तप्त्वा परं लेभे पुण्यं पुण्यवताम्वरः। गङ्गां भूतलमानीय सर्वलोकसुखाय वै
तस्य तीर्थे नरः स्नात्वा तिलधेनुं प्रदापयेत्।
सर्वयज्ञफलं प्राप्य पुत्रवाञ्जायते नरः ॥ ६ ॥
तस्येशानतरे भागे रामो भार्गवसत्तमः। तपस्तेपे सुधर्मात्मा आत्मकायविशुद्धये
कौशिकी च सरिच्छ्रेष्ठा सर्वतीर्थवरप्रदा।
तत्र स्नात्वा नरो जातिहत्यादोषविवर्जितः ॥ ११ ॥
रामेश्वरं समालोक्य धूतपापो भवेन्नरः ॥ १२ ॥
इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डेऽ-ऽवन्तीक्षेत्रमाहात्म्ये पुरुषोत्तमेश्वरमाहात्म्येऽधिमासस्नानदानादि-माहात्म्यवर्णनंनामद्विसप्ततितमोऽध्यायः ॥ ७२ ॥

———

त्रिसप्ततितमोऽध्यायः

गोमतीतीर्थकुण्डमाहात्म्यवर्णनम्

व्यास उवाच

गोमतीकुण्डं त्वया प्रोक्तं पुरा ब्रह्मन्सनातनम् ।
कस्मिन्काले कदा जातं तन्नो वद सुविस्तरात् ॥ १ ॥

सनत्कुमार उवाच

श्रृणुष्वभोमहाप्राज्ञकथांपापहरांपराम् । गोमतीकुण्डोद्भवांपुण्यांपुरारुद्रेणभाषिताम्
नैमिषे च समासीनाऋषयःशौनकादयः । कथयन्तिकथांपुण्यांसर्वतीर्थोद्भवांशुभाम्
तस्मिन्नवसरे पुण्ये काशीमाहात्म्यमुत्तमम् । कथितं नारदेनैव पवित्रं पापहारकम्
ऊषरःपुण्यपापानांधन्यावाराणसीपुरी । ध्रुवं लभन्ते मोक्षञ्च समं चण्डालपण्डिताः
असीवरुणयोर्मध्येपञ्चक्रोशी महाफलम् । अमरा मरणमिच्छन्तिकाकथाइतरेजनाः

इति स्मृत्वा तदा व्यास! स्वयम्भूः प्रत्यभाषतः ।
श्रृण्वतां सर्वदेवानामृषीणां च परन्तप! ॥ ७ ॥

नदी न गोमतीतुल्या कृष्णतुल्या न देवता । सर्वपातालभूमध्ये न द्वारकासमापुरी
इतितेनिश्चयंज्ञात्वाऋषयःशौनकादयः । यत्रतत्रस्थिताःसर्वे प्रातःसन्ध्यामुपासितुम्
तत्रैवगोमतीतीरेचक्रुस्तेवै धृतव्रताः । सान्दीपनोऽपिऽतत्रैवप्रातःसन्ध्यांसमाचरत्

एवं बहुतिथे काले चरतस्तस्य वै व्रतम् ।
सान्दीपनस्य वै व्यास! ह्यवन्तीपुरवासिनः ॥ ११ ॥
तस्यैव कामपूर्त्यर्थं विद्यार्थिनौ रामजनार्दनौ ।
समायातौ सुकुमाराङ्गौ सततं ब्रह्मचारिणौ ॥ १२ ॥

निवासं चक्रतुस्तस्य गुरोर्गेहे परन्तप । तस्य पाठयतःसम्यग्विद्यां सर्वश्रुतीःपराम्
उषस्युषसि तत्रैव दृश्यते न तदा गुरुः । विद्योपदेशकालोऽयं क गतो नौ गुरुर्व॰

इति पृष्टे तयोरेवं गुरुपत्नी ह्युवाच ह । सदैव कुरुते वत्स!प्रातःसन्ध्याद्युपासनम्

तत्रैव याति वै नित्यं गुरुस्ते स्नानकारणात् ।
गोमता वै सरिच्छ्रेष्ठा द्वारकायां च पावनी ॥ १६ ॥
इति श्रुत्वा तदा कृष्णो रामेण सह संयुतः ।
किं कर्तव्यमिहास्माभिरात्मनो हितमुत्तमम् ॥ १७ ॥
गुरोरागमनं काङ्क्षे अत्रैव स्थितिकाङ्क्षया ।
एतस्मिन्नेव काले तु सान्दीपनिरगाद् गृहम् ॥ १८ ॥

तत उत्थाय तौ वीरौ गुरोरावन्दनं ततः । प्रश्रयावनतौ कृत्वा ह्यब्रूतां वचनं गुरुम्
श्रूयतांभोमहायोगिन्नस्माकंवासकारणम् । विद्यार्थिनाविहप्राप्तौ युष्माकञ्चगृहोत्तमे

प्रातःकाले च ते ब्रह्मन्समयो नास्ति नौ प्रभो! ।
एतच्छ्रुत्वा वचस्तस्य कृष्णस्य च बलस्य च ॥ २१ ॥
उवाच भगवान्व्यास! आत्मनो व्रतकारणम् ।
अस्माकं परमं वत्स!व्रतं वै शाश्वतं मतम् ॥ २२ ॥
गोमतीस्नानं कर्तव्यं प्रातःकाले सदा बुधैः ।
तत्रैवोपासनं पुण्यं सन्ध्याया इति निश्चितम् ॥ २३ ॥
इति निश्चित्य युष्माभिर्यद्योग्यं क्रियतां तथा ।
तच्छ्रुत्वा भगवान्विष्णुर्मायामानुषरूपवान् ॥ २४ ॥

गोमत्याराधनं चक्रे कुशस्थल्यांद्विजोत्तम । यत्र शिवेश्वरोदेवो यज्ञकुण्डमनुत्तमम्
कान्थडेश्वरस्योत्तरेभागेगोमतीसा समागता । पातालतलमाभेद्यसरस्वत्यासहागता

प्रातरुत्थाय ते सर्वे गोमतीं सरितां वराम् ।
ददृशुः सुचिरापाङ्गीं व्यास! स्वाश्रमगामिनीम् ॥ २७ ॥

श्रीकृष्ण उवाच

अत्रैव चागता ब्रह्मन्गोमती सरितांवरा । स्नानदानादिकं सर्वमत्रैव समुपासय
गोमत्यत्रसमालीनायज्ञकुण्डेसरस्वती । तदाप्रभृतिलोकेऽस्मिन्गोमतीकुण्डमुच्यते

सर्वेषामपि लोकानां मार्गोऽत्रैव च विद्यते ।
तस्माद् व्यास! महापुण्यं भुवि तीर्थमनुत्तमम् ॥ ३० ॥
गोमतीकुण्डमाख्यातं सर्वपापप्रणाशनम् ।
भाद्रे मास्यसिताऽष्टम्यां कृष्णजन्मसमुद्भवम् ॥ ३१ ॥
तत्र स्नात्वा नरो नित्यं रात्रौ जागरणं चरेत् ।
उपोष्य विधिवद्व्यास! सशिष्यं व्यासमर्चयेत् ॥ ३२ ॥

वैष्णवांश्चनरांश्चैव कृष्णजन्मोत्सुकान्वरान् । नानासुगन्धपुष्पाद्यैर्वस्त्रालङ्कारसंयुतैः गोब्राह्मणानां पूजाश्चक्रियन्ते यैः समाहितः । न तेषां दुर्लभंकिञ्चित्सर्वलोकेषुविद्यते गोमतीस्नानजात्पुण्याद्वासुदेवसमागमात् । मनोरथफलप्राप्तिर्जायते नाऽत्र संशयः तथा चैत्रसितेपक्षेयावच्चैकादशीभवेत् । तद्दिने चनरःस्नात्वागोमत्यांचविशेषतः रात्रौ जागरणं कृत्वाविष्णुपूजांतथैव च । आमलकीं ततो गत्वा प्रदक्षिणात्पदेपदे

गोसहस्रफलं तेषां प्राप्यते नाऽत्र संशयः ।
ये शृण्वन्ति कथां पुण्यां पवित्रां पापहारिणीम् ॥ ३८ ॥
सर्वपापविनिर्मुक्ता विष्णुलोकं प्रयान्ति ते ॥ ३६ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-ऽवन्तीक्षेत्रमाहात्म्येगोमतीतीर्थकुण्डमाहात्म्य-वर्णनं नामत्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

चतुःसप्ततितमोऽध्यायः

श्रीविष्णुसहस्रनामस्तोत्रवर्णनम्

सनत्कुमार उवाच

कन्थडेश्वर इति ख्यातं तत्र तीर्थमनुत्तमम् । तत्रतीर्थे नरःस्नात्वा दृष्ट्वा देवं महेश्वरम् मुच्यते सर्वपापेभ्यः शुचिः प्रयतमानसः । विमानशतसंयुक्तः शिवलोके महीयते भुवि पुण्यतमंतीर्थं सर्वपापहरं परम । खगर्तासङ्गमो यत्र गङ्गेश्वरसमीपतः ॥ ३ ॥ महापापहरं पुण्यं महापुण्यफलप्रदम् । आकाशात्पतिता यत्र गङ्गा त्रैलोक्यपावनी

विधृता शिरसि सद्यो महादेवेन शम्भुना ।
तस्मिंस्तीर्थे नरः स्नात्वा गङ्गेशमवलोकयेत ॥ ५ ॥

गङ्गास्नानफलं प्राप्यविष्णुलोकेमहीयते । वीरेश्वरमनुप्राप्य तस्मिंस्तीर्थेनरोवसेत्

सर्वपापविशुद्धात्मा वीरलोकमवाप्नुयात ।
तीर्थमन्यन्महापुण्यं भुवि ख्यातं महर्षिभिः ॥ ७ ॥

वामनकुण्डेतिविख्यातत्रिषुलोकेषु विश्रुतम । यस्यदर्शनमात्रेणब्रह्महत्यांव्यपोहति

मनोरथशतं प्राप्य पश्चाद्विष्णुपुरं व्रजेत् ।

व्यास उवाच

कदा काले समुत्पन्नं वामनाख्यं पुराऽनघ! ॥ ६ ॥
तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर! ।

सनत्कुमार उवाच

शृणुष्व भो द्विजश्रेष्ठ! कथां पापहरां पराम ॥ १० ॥

यस्य श्रवणमात्रेण सर्वपापात्प्रमुच्यते । दैत्येन्द्रस्तु पराप्रोक्तो विष्णुभक्तिपरायणः प्रह्लाद् इति विख्यातः सर्वधर्मभृतां वरः । आचारविजितोधर्मः सत्येन विजितारमा

धैर्येण च धृता लोकाः क्षमया विधृता मही ।

गाम्भीर्येणाऽर्णवा दिव्याः शौर्येण शत्रूणां गणाः ॥ १३ ॥

प्रश्रयेणाभ्यागताश्च जितास्तेनमहात्मना। दक्षिणाभिर्जितोयज्ञो हविषाहव्यवाहनः

शौचाऽऽचारविशुद्धात्मा तपसा च हताशुभः।

दानमानजिता विप्रा भोजनाच्छादनादिभिः ॥ १५॥

संस्कारेण जितं जन्म दमेनाऽऽत्मा सनातनः।

प्राणायामजितो वायुर्योगध्यानजितो हरिः ॥ १६ ॥

ईदृशश्च महायोगी सत्यधर्मपरायणः। प्रह्लादेन समो धीरो न भूतो न भविष्यति

तस्य पौत्रः सदाचारी बलिरित्यभिधीयते।

तस्यपालयतःसम्यक्प्रजाः सम्यग्विवर्धिताः ॥ १८ ॥

नाल्पायुर्न जडो मूर्खो न रोगी न च मत्सरी।

अपुत्रो द्रव्यहीनश्च कोऽपि नाऽस्ति महीतले ॥ १९ ॥

महाराजो महीपालो यज्वा विपुलदक्षिणः। सप्तद्वीपवती तेन पालितावसुधासदा

एकदा च समासीने सभामध्ये वरासने। जयशब्दे वर्तमाने गन्धर्वा ललितं जगुः

वाद्यमानेषुवाद्येषु ननृतुश्चाऽप्सरोगणाः। कथायांकथ्यमानायांशुभायांचविचक्षणैः

सूता वैतालिकाः सिद्धाश्चारणाश्च बहुश्रुताः। ऋषयश्च समायातास्तत्रैवद्विजसत्तम

सुन्दोपसुन्दतुहुण्डाद्या महिषासुरकोल्बणाः।

शुम्भनिशुम्भधूम्राक्षकालकेयाश्च दानवाः ॥ २४ ॥

कालनेमिश्चविक्रान्तोदीर्घदोमूषको यमः। निकुम्भःकुम्भविशठोह्यन्धकश्चमहाबलः

शङ्खो जलन्धरो रौद्रोवातापीचबलाधिकः। सर्वजिद्विश्वहन्ताचकामचारीहलायुधः

एते चाऽन्ये च बहवो दनुवंशविवर्धनाः। उपासाञ्चक्रिरे तत्र बलिराजमकल्मषम्

सिद्धा नागाश्च यक्षाश्च किन्नराः किम्पुरुषास्तथा।

खेचरा भूचरा बाला राक्षसाश्चैव दारुणाः ॥ २८ ॥

एते चाऽन्ये च बहवो राजानं पर्युपासत। तत्र सभामहादिव्या शुशुभे च द्विजोत्तम

ग्रहैरुज्ज्वलितैः कीर्णा शरदीव नभःस्थलम्।

तत्सभायां समासीनो रराज बलिराट् तथा ॥ ३० ॥

मरुद्भिरिव संवीतो वासवो दिवि देवतैः। एकदा च सभामध्ये नारदो देवदर्शनः

आगतस्तेषु सर्वेषु दानवेषु स्थितेषु च। दृष्ट्वा तमागतं सर्वे ह्युत्तस्थुर्दितिनन्दनाः

ववन्दिरे सर्वशस्तु बलिना किंनरोत्तमम्। सत्कृत्य चासनं दत्त्वा पप्रच्छकुशलंनृपः

कृत्वाऽऽतिथ्यं समासीनो नारदः प्राह सत्तमः।

मेघगम्भीरया वाचा बलिं प्राहर्षिसत्तमः ॥ ३४ ॥

नारद उवाच

श्रूयतां दितिजश्रेष्ठ गतोऽहं वृषमंदिरे। तत्र देवसभा रम्या दिव्याऽभिप्रायसंयुता

तत्र देवाः सगन्धर्वाः पुरन्दरपुरोगमाः ॥ ३५ ॥

समासीनाः कथांपुण्यांकथयन्तिपरस्परम्। तत्रदैत्यकथांशुभ्रांमयाख्यातांनसेहिरे

हिरण्यकशिपुर्दैत्यः पुराऽऽसीच्च प्रजापतिः। त्रैलोक्यविजयी नेतायेनेयंवसुधाजिता

सर्वलोकं वशीकृत्य बुभुजे च वसुन्धराम्। अतीवतेजः संपन्नो महाबलपराक्रमः

वशी सर्वत्रगः कामी नृसिंहेन निपातितः। बलिं कियद्बलं लोके नारदत्वंप्रशंससि

इतिमांधर्षयित्वाचबिडौजा लोकसङ्ग्रही। बहुधा वादयन्वादान्कटुकान्दानवोत्तम

तस्मात्त्वं दानवश्रेष्ठपितृपर्यागतांमहीम्। विजित्यसार्वभौमस्त्वं लभस्ववसुधाधिप

कियद्बलधृता नूनं देवाश्च दनुजोत्तम!। पलायनपरादान्ताःसदैवरणभीरवः ॥ ४२ ॥

मम वाक्यपरो भूत्वात्रैलोक्याधिपतिर्भव। नारदस्यवचःश्रुत्वा बलिर्वैरोचनिस्तदा

चकार कोपमतुलं त्रैलोक्यविजये द्विज। मंत्रयित्वाऽसुरान्सर्वान्सर्वदैत्यजनेश्वरः

सङ्ग्राममकरोत्तीव्रंवासवेनबलीयसा। जित्वा च सकलान्देवान्वशीचक्रेसवासवान्

सर्वलोकेश्वरो जातोबलिर्वैरोचनोऽसुरः। हताधिकारास्त्रिदशाभ्रष्टराज्याःपराजिताः

विचरन्ति यथा मर्त्यास्तेन देवगणाभुवि। किञ्चित्कालंसमासाद्यब्रह्माणंशरणंययुः

भो ब्रह्मन्बलिना भ्रष्टा देवलोकात्परन्तप। किं कुर्मःक्वचगच्छामः कमुपायं चरामहे

ब्रह्मोवाच

श्रूयतां भोः सुरश्रेष्ठायुष्माकं साधनंपरम्। यूयं यात पुरींरम्यांपद्मावतीममरोत्तमाः

तत्र तीर्थवरं श्रेष्ठं नाम्ना चोत्तरमानसम् ।
यत्राऽष्टसिद्धिदा ख्याता महासिद्धिप्रदा नृणाम् ॥ ५० ॥
निधयश्च नवैवापि तत्र तिष्ठन्तिसत्तम! । तस्यैव दक्षिणे भागे विष्णुतीर्थमनुत्तमम्
तत्र स्नात्वा नरः पश्येत्सिद्धेश्वरीं सुसिद्धिदाम् ।
ऋद्धिसिद्धिपरो भूत्वा विष्णुलोके महीयते ॥ ५२ ॥
आश्विनस्य सिते पक्षे दशम्यां दिवसे तथा ।
अष्टसिद्धिशमीदेशे गणेश्वरं प्रपूजयेत् ॥ ५३ ॥
विजयी सर्वलोकेषु जायतेनाऽत्र संशयः । शमीमूलस्थितं नित्यमृद्धिसिद्धिवरप्रदम्
पूजयेद्वै नरो नित्यं गणेशं सर्वकामदम् । सर्वकामवरं लब्ध्वा पुत्रवान्धनवान्भवेत्
तस्मात्सर्वप्रयत्नेन महाकालवनं व्रजेत् । यत्रविष्णुसरस्तीर्थं तत्र गच्छतमाचिरम्
उपासनांसुरश्रेष्ठाविष्णोरतुलतेजसः । कुरुध्वं सर्वभीतिभ्यस्त्रातासस्यात्सुरोत्तमाः
इति श्रुत्वा वचस्तस्य ब्रह्मणः शंसितात्मनः ।
महाकालवने प्राप्ता देवास्ते कार्यसाधकाः ॥ ५८ ॥
अत्राऽऽगत्य शुचीभूय स्नानदानादिकर्मभिः ।
उपासाञ्चक्रिरे सिद्धा विष्णुभक्तिपरायणाः ॥ ५६ ॥
ब्रह्माणमथ ते सर्वे पप्रच्छुर्विधिमादरात् । उपासनाया देवस्य देवाः शक्रपुरोगमाः

देवा ऊचुः

ब्रह्मन्केनप्रकारेण विष्णुभक्तिःपराभवेत् । तत्सर्वंश्रोतुमिच्छामस्त्वत्तोब्रह्मविदांवर

ब्रह्मोवाच

श्रूयतां भोः सुरश्रेष्ठा! विष्णुभक्तिमनुत्तमाम् ।
शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ॥ ६२ ॥
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये । लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः
येषामिंदीवरश्यामोहृदयस्थो जनार्दनः । अभीप्सितार्थसिद्ध्यर्थंपूज्यते यःसुरैरपि
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः । कल्पादौ सृष्टिकामेन प्रेरितोऽहंच शौरिणा

न शक्तो वै प्रजाः कर्तुं विष्णुध्यानपरायणः ।
एतस्मिन्नन्तरे सद्यो मार्कण्डेयो महाऋषिः ॥ ६६ ॥
सर्वसिद्धेश्वरोदान्तोदीर्घायुर्विजितेन्द्रियः ।
मयादृष्टोऽथगत्वातं तदाहं समुपस्थितः ॥
ततः प्रफुल्लनयनौ सत्कृत्य चेतरेतरम् ॥ ६७ ॥
पृच्छमानौ परं स्वास्थ्यं सुखासीनौ सुरोत्तमाः ।
तदा मया स पृष्टो वै मार्कण्डेयो महामुनिः ॥ ६८ ॥
भगवन्केन प्रकारेण प्रजा मेऽनामया भवेत् ।
तत्सर्वं श्रोतुमिच्छामि भगवन्मुनिवन्दित! ॥ ६६ ॥

श्रीमार्कण्डेय उवाच

विष्णुभक्तिः परा नित्या सर्वार्तिदुःखनाशिनी ।
सर्वपापहरा पुण्या सर्वसुखप्रदायिनी ॥ ७० ॥
एषा ब्राह्मी महाविद्या न देया यस्य कस्यचित् ।
कृतघ्नाय ह्यशिष्याय नास्तिकायानृताय च ॥ ७१ ॥
ईर्ष्यकाय च रूक्षाय कामिकाय कदाचन । तद्गतं सर्वं विघ्नन्तियत्तद्धर्मंसनातनम्
एतद्गुह्यतमं शास्त्रं सर्वपापप्रणाशनम् । पवित्रं च पवित्राणां पावनानां च पावनम्
विष्णोर्नामसहस्रं च विष्णुभक्तिकरं शुभम् ।
सर्वसिद्धिकरं नृणां भुक्तिमुक्तिप्रदं शुभम् ॥ ७४ ॥
ॐ अस्य श्रीविष्णुसहस्रनामस्तोत्रमन्त्रस्य मार्कण्डेयऋषिः ।
विष्णुर्देवताअनुष्टुपूछन्दः सर्वकामावाप्त्यर्थं जपे विनियोगः ।

अथ ध्यानम्

सजलजलदनीलं दर्शितोदारशीलं करतलधृतशैलं वेणुवाद्ये रसालम् ।
व्रजजनकुलपालं कामिनीकेलिलोलं तरुणतुलसिमालं नौमि गोपालबालम् ॥
ॐविश्वं विष्णुर्हृषीकेशः सर्वात्मा सर्वभावनः ।

सर्वगः शर्वरीनाथो भूतग्रामाऽऽशयाशयः ॥ ७६ ॥
अनादिनिधनो देवः सर्वज्ञः सर्वसम्भवः । सर्वव्यापी जगद्धाता सर्वशक्तिधरोऽनघः
जगद्बीजं जगत्स्रष्टा जगदीशो जगत्पतिः ।
जगद्गुरुर्जगन्नाथो जगद्धाता जगन्मयः ॥ ७८ ॥
सर्वाऽऽकृतिधरः सर्वविश्वरूपी जनार्दनः ।
अजन्मा शाश्वतो नित्यो विश्वाधारो विभुः प्रभुः ॥ ७९ ॥
बहुरूपैकरूपश्च सर्वरूपधरोहरः । कालाग्निप्रभवो वायुः प्रलयान्तकरोऽक्षयः ॥८०॥
महार्णवो महामेघो जलबुद्बुदसम्भवः ।
संस्कृतो विकृतो मत्स्यो महामत्स्यस्तिमिङ्गिलः ॥ ८१ ॥
अनन्तोवासुकिःशेषोवराहोधरणीधरः । पयःक्षीरविवेकाढ्योहंसोहैमगिरिस्थितः
हयग्रीवो विशालाक्षो हयकर्णो दयाकृतिः । मन्थनो रत्नहारी च कूर्मो धरधराधरः
विनिद्रो निद्रितोनन्दी सुनन्दोनन्दनप्रियः । नाभिनालमृणालीच स्वयंभूश्चतुराननः
प्रजापतिपरो दक्षः सृष्टिकर्ता प्रजाकरः । मरीचिः कश्यपोदक्षः सुरासुरगुरुःकविः
वामनो वाममार्गी च वामकर्मा बृहद्वपुः । त्रैलोक्यक्रमणो दीपो बलियज्ञविनाशनः
यज्ञहर्ता यज्ञकर्ता यज्ञेशो यज्ञभुग्विभुः ।
सहस्रांशुर्भगो भानुर्विवस्वानरविरंशुमान् ॥ ८७ ॥
तिग्मतेजाश्चाल्पतेजाः कर्मसाक्षी मनुर्यमः । देवराजः सुरपतिर्दानवारिः शचीपतिः
अग्निर्वायुसखो वह्निर्वरुणो यादसांपतिः । नैर्ऋतोनादनोऽनादीरक्षयज्ञोधनाधिपः
कुबेरोवित्तवान्वेगो वसुपालो विलासकृत् । अमृतस्रवणःसोमः सोमपानकरःसुधीः
सर्वौषधिकरः श्रीमान्निशाकरदिवाकरः । विषारिर्विषहर्ता च विषकण्ठधरोगिरिः
नीलकण्ठो वृषी रुद्रो भालचन्द्रो ह्युमापतिः ।
शिवः शान्तो वशी वीरो ध्यानी मानी च मानदः ॥ ९२ ॥
कृमिकीटो मृगव्याधो मृगहा मृगलाञ्छनः ।
बटुको भैरवो बालः कपाली दण्डविग्रहः ॥ ९३ ॥

श्मशानवासी मांसाशा दुष्टनाशी वरान्तकृत् ।
योगिनीत्रासको योगी ध्यानस्थो ध्यानवासनः ॥ ९४ ॥
सेनानीः सेनदःस्कन्दोमहाकालोगणाधिपः । आदिदेवोगणपतिर्विघ्नहाविघ्ननाशनः
ऋद्धिसिद्धिप्रदोदन्ती भालचन्द्रोगजाननः । नृसिंह उग्रदंष्ट्रश्च नखी दानवनाशकृत्
प्रह्लादपोषकर्ता च सर्वदैत्यजनेश्वरः । शलभः सागरः साक्षी कल्पद्रुमविकल्पकः
हेमदो हेमभागी च हिमकर्ता हिमाचलः । भूधरो भूमिदोमेरुःकैलासशिखरोगिरिः
लोकालोकान्तरो लोकी विलोकी भुवनेश्वरः ।
दिक्पालो दिक्पतिर्दिव्यो दिव्यकायो जितेन्द्रियः ॥ ९९ ॥
विरूपो रूपवान्रागी नृत्यगीतविशारदः । हाहा हूहूश्चित्ररथो देवर्षिर्नारदः सखा
विश्वेदेवाः साध्यदेवा धृताशीश्च चलोऽचलः ।
कपिलो जल्पको वादी दत्तो हैहय सङ्घराट् ॥ १०१ ॥
वसिष्ठो वामदेवश्च सप्तर्षिप्रवरो भृगुः । जामदग्न्योमहावीरः क्षत्रियान्तकरोह्यृषिः
हिरण्यकशिपुश्चैवहिरण्याक्षोहरप्रियः । अगस्तिः पुलहोदक्षः पौलस्त्योरावणोघटः
देवारिस्तापसस्तापीविभीषणहरिप्रियः । तेजस्वीतेजदस्तेजी ईशो राजपतिःप्रभुः
दासरथी राघवोरामोरघुवंशविवर्धनः । सीतापतिःपतिःश्रीमान्ब्रह्मण्योभक्तवत्सलः
सन्नद्धः कवची खड्गी चीरवासा दिगम्बरः ।
किरीटी कुण्डली चापी शङ्खचक्री गदाधरः ॥ १०६ ॥
कौशल्यानन्दनोदारो भूमिशायी गुहप्रियः ।
सौमित्रो भरतो बालः शत्रुघ्नो भरताग्रजः ॥ १०७ ॥
लक्ष्मणः परवीरघ्नः स्त्रीसहायः कपीश्वरः । हनुमानृक्षराजश्चसुग्रीवोबालिनाशनः
दूतप्रियो दूतकारी ह्यङ्गदो गदतां वरः । वनध्वंसी वनी वेगो वानरध्वजलाङ्गुली
रविदंष्ट्री च लङ्काहा हाहाकारो वरप्रदः । भवसेतुर्महासेतुर्बद्धसेतू रमेश्वरः ॥ ११० ॥
जानकीवल्लभः कामी किरीटी कुण्डली खगी ।
पुण्डरीकविशालाक्षो महाबाहुर्घनाकृतिः ॥ १११ ॥

चञ्चलश्चपलः कामी वामी वामाङ्गवत्सलः ।
स्त्रीप्रियः स्त्रीपरः स्त्रैणः स्त्रियो वामाङ्गवासकः ॥ ११२ ॥
जितवैरी जितकामो जितक्रोधो जितेन्द्रियः ।
शान्तो दान्तो दयारामो ह्येकस्त्रीव्रतधारकः ॥ ११३ ॥
सात्त्विकः सत्त्वसंस्थानो मदहा क्रोधहा खरः ।
बहुराक्षससम्वीतः सर्वराक्षसनाशकृत ॥ ११४ ॥
रावणारी रणक्षुद्रदशमस्तकच्छेदकः । राज्यकारी यज्ञकारी दाता भोक्ता तपोधनः
अयोध्याधिपतिः कान्तो वैकुण्ठोऽकुण्ठविग्रहः ।
सत्यव्रतो व्रती शूरस्तपी सत्यफलप्रदः ॥ ११६ ॥
सर्वसाक्षी सर्वगश्च सर्वप्राणहरोऽव्ययः ।
प्राणश्चाथाप्यपानश्च व्यानोदानः समानकः (तः ? ॥ ११७ ॥
नागः कृकलः कूर्मश्च देवदत्तो धनञ्जयः । सर्वप्राणविदो व्यापी योगधारकधारकः
तत्त्ववित्तत्त्वदस्तत्त्वी सर्वतत्त्वविशारदः ।
ध्यानस्थो ध्यानशाली च मनस्वी योगवित्तमः ॥ ११६ ॥
ब्रह्मज्ञो ब्रह्मदोब्रह्मज्ञाताचब्रह्मसम्भवः । आध्यात्मविद्विदोदीपो ज्योतिरूपोनिरञ्जनः
ज्ञानदोऽज्ञानहा ज्ञानी गुरुः शिष्योपदेशकः ।
सुशिष्यः शिक्षितः शाली शिष्यशिक्षाविशारदः ॥ १२१ ॥
मन्त्रदो मन्त्रहा मन्त्री तन्त्री तन्त्रजनप्रियः ।
सन्मन्त्रो मन्त्रविन्मन्त्री यन्त्रमन्त्रैकभञ्जनः १२२ ॥
मारणो मोहनो मोही स्तम्भोच्चाटनकृत्खलः ।
बहुमायो विमायश्च महामायाविमोहकः ॥ १२३ ॥
मोक्षदो बन्धको बन्दी ह्याकर्षणविकर्षणः ।
ह्रींकारो बीजरूपी च क्लींकारः कीलकाधिपः ॥ १२४ ॥
सौंकारः शक्तियाञ्छक्तिः सर्वशक्तिधरोधरः ।

अकारोकार ओंकारश्छन्दोगायत्रसम्भवः ॥ १२५ ॥
वेदोवेदविदोवेदीवेदाध्यायी सदाशिवः । ऋग्यजुःसामाथर्वेशःसामगानकरोऽकरी
त्रिपदो बहुपादीच शतपथः सर्वतोमुखः । प्राकृतःसंस्कृतोयोगी गीतग्रन्थप्रहेलिकः
सगुणो विगुणश्छन्दो निःसङ्गो विगुणो गुणी ।
निर्गुणो गुणवान्सङ्गी कर्मी धर्मी च कर्मदः ॥ १२८ ॥
निष्कर्मा कामकामी च निःसङ्गः सङ्गवर्जितः ।
निर्लोभो निरहंकारी निष्किञ्चनजनप्रियः ॥ १२६ ॥
सर्वसङ्गकरो रागी सर्वत्यागी बहिश्चरः । एकपादो द्विपादश्च बहुपादोऽल्पपादकः
द्विपदस्त्रिपदोऽपादी विपादी पदसंग्रहः । खेचरो भूचरो भ्रामी भृङ्गकीटमधुप्रियः
क्रतुः संवत्सरोमासो गणितार्कोह्यहर्निशः । कृतं त्रेता कलिश्चैव द्वापरश्चतुराकृतिः
दिवाकालकरःकालःकुलधर्मःसनातनः । कलाकाष्ठाकलानाड्योयामःपक्षःसितासितः
युगो युगन्धरोयोग्यो युगधर्मप्रवर्तकः । कुलाचारः कुलकरः कुलदैवकरः कुली ॥
चतुराश्रमचारी च गृहस्थो ह्यतिथिप्रियः ।
वनस्थो वनचारी च वानप्रस्थाश्रमोऽश्रमी ॥ १३५ ॥
बटुकोब्रह्मचारीचशिखासूत्रीकमण्डली । त्रिजटीध्यानवान्ध्यानीबद्रिकाश्रमवासकृत्
हैमाद्रिप्रभवोहैमो हेमराशिर्हिमाकरः । महाप्रस्थानको विप्रो विरागी रागवान्गृही
नरनारायणोऽनागो केदारोदारविग्रहः । गङ्गाद्वारतपःसारस्तपोवनतपोनिधिः ॥
निधिरेव महापद्मः पद्माकरश्रियालयः । पद्मनाभः परीतात्मा परिव्राट्पुरुषोत्तमः ॥
परानन्दः पुराणश्च सम्राड्राज विराजकः । चक्रस्थश्चक्रपालस्थश्चक्रवर्ती नराधिपः
आयुर्वेदविदो वैद्यो धन्वन्तरिश्च रोगहा ।
औषधीबीजसम्भृतो रोगी रोगविनाशकृत् ॥ १४१ ॥
चेतनश्चेतकोऽचिन्त्यश्चित्तचिन्ताविनाशकृत् ।
अतीन्द्रियः सुखस्पर्शश्चरचारी विहङ्गमः ॥ १४२ ॥
गरुडः पक्षिराजश्च चाक्षुषो विनतात्मजः । विष्णुयानविमानस्थो मनोमयतुरंगमः

बहुवृष्टिकरो वर्षी ऐरावणविरावणः। उच्चैःश्रवाऽरुणो गामी हरिदश्वोहरिप्रियः
प्रावृषो मेघमाली च गजरत्नपुरन्दरः। वसुदो वसुधारश्च निद्रालुः पन्नगाशनः॥१४५

शेषशायी जलेशायी व्यासः सत्यवतीसुतः।
वेदव्यासकरो वाग्मी बहुशाखाविकल्पकः॥ १४६॥

स्मृतिः पुराणधर्मार्थीपरावरविचक्षणः। सहस्रशीर्षा सहस्राक्षः सहस्रवदनोज्ज्वलः
सहस्रबाहुः सहस्रांशुः सहस्रकिरणोनरः। बहुशीर्षैकशीर्षश्च त्रिशिराविशिराःशिरी

जटिलो भस्मरागी च दिव्याम्बरधरः शुचिः।
अणुरूपो बृहद्रूपो विरूपो विकराकृतिः॥ १४६॥

समुद्रमाथको माथी सर्वरत्नहरोहरिः। वज्रवैडूर्यको वज्री चिन्तामणिमहामणिः

अनिर्मूल्यो महामूल्यो निर्मूल्यः सुरभिः सुखी।
पिता माता शिशुर्बन्धुर्धाता त्वष्टार्यमा यमः॥ १५१॥

अन्तःस्थोबाह्यकारीच बहिस्थोवैबहिश्चरः। पावनः पावकापाकीसर्वभक्षीहुताशनः
भगवान्भगहा भागी भवभञ्जो भयङ्करः। कायस्थः कार्यकारी च कार्यकर्ता करप्रदः

एकधर्मा द्विधर्मा च सुखी दूत्योपजीवकः।
बालकस्तारकस्त्राता कालो मूषकभक्षकः॥ १५४॥

सञ्जीवनोजीवकर्तासजीवोजीवसम्भवः। षड्विंशकोमहाविष्णुःसर्वव्यापीमहेश्वरः
दिव्याङ्गदोमुक्तमालीश्रीवत्सोमकरध्वजः। श्याममूर्तिर्घनश्यामःपीतवासाःशुभाननः
चीरवासा विवासाश्च भूतदानववल्लभः। अमृतोऽमृतभागनीच मोहिनीरूपधारकः
दिव्यदृष्टिः समदृष्टिर्देवदानववञ्चकः। कबन्धः केतुकारी च स्वर्भानुश्चन्द्रतापनः॥

ग्रहराजो ग्रही ग्राहः सर्वग्रहविमोचकः।
दानमानजपो होमः सानुकूलः शुभग्रहः॥ १५६॥

विघ्नकर्ताऽपहर्ताच विघ्ननाशो विनायकः। अपकारोपकारी च सर्वसिद्धिफलप्रदः
सेवकःसामदानी च भेदी दण्डीचमत्सरी। दयावान्दानशीलश्चदानीयज्वाप्रतिग्रही

हविरग्निश्चरुस्थाली समिधश्चानिलो यमः।

होतोद्गाता शुचिः कुण्डःसामगो वैकृतिः सवः॥ १६२॥

द्रव्यंपात्राणिसङ्कल्पो मुशलोह्यरणिःकुशः। दीक्षितोमण्डपोवेदिर्यजमानःपशुः क्रतुः

दक्षिणा स्वस्तिमान्स्वस्ति ह्याशीर्वादः शुभप्रदः।
आदिवृक्षो महावृक्षो देववृक्षो वनस्पतिः॥ १६४॥
प्रयागो वेणुमान्वेणी न्यग्रोधश्चाऽक्षयो वटः।
सुतीर्थस्तीर्थकारी च तीर्थराजो व्रती व्रतः॥ १६५॥

वृत्तिदाता पृथुःपुत्रोदोग्धागौर्वत्सएव च। क्षीरंक्षीरवहःक्षीरीक्षीरभागविभागवित्
राज्यभागविदोभागी सर्वभागविकल्पकः। वाहनो वाहको वेगी पदचारी तपश्चरः

गोपनो गोपको गोपी गोपकन्याविहारकृत्।
वासुदेवो विशालाक्षः कृष्णोगोपीजनप्रियः॥ १६८॥

देवकीनन्दनो नन्दी नन्दगोपगृहाऽऽश्रमी। यशोदानन्दनो दामी दामोदर उलूखली
पूतनारिः पदाकारी लीलाशकटभञ्जकः। नवनीतप्रियो वाग्मी वत्सपालकबालकः

वत्सरूपधरो वत्सी वत्सहा धेनुकान्तकृत्।
बकारिर्वनवासी च वनक्रीडाविशारदः॥ १७१॥
कृष्णवर्णाकृतिः कान्तो वेणुवेत्रविधारकः।
गोपमोक्षकरो मोक्षो यमुनापुलिनेचरः॥ १७२॥

मायावत्सकरो मायी ब्रह्ममायापमोहकः। आत्मसारविहारज्ञो गोपदारकदारकः॥
गोचारी गोपतिर्गोपो गोवर्धनधरोबली। इन्द्रद्युम्नोमखध्वंसीवृष्टिहा गोपरक्षकः

सुरभित्राणकर्ता च दावपानकरः कली।
कालीयमर्दनः काली यमुनाह्रदविहारकः॥ १७५॥
सङ्कर्षणो बलश्लाघ्यो बलदेवो हलायुधः।
लाङ्गली मुसली चक्री रामो रोहिणिनन्दनः॥ १७६॥
यमुनाकर्षणोद्धारो नीलवासा हलो हली।
रेवतीरमणो लोलो बहुमानकरः परः॥ १७७॥

धेनुकारिर्महावारो गोपकन्याविदूषकः। काममानहरः कामी गोपीवासोऽपतस्करः
वेणुवादी च नादी च नृत्यगीतविशारदः। गोपीमोहकरो गानी रासको रजनीचरः
दिव्यमाली विमाली च वनमालाविभूषितः । कैटभारिश्चकंसारिर्मधुहा मधुसूदनः
चाणूरमर्दनो मल्लो मुष्टी मुष्टिकनाशकृत् । मुरहा मोदको मोदी मदघ्नोनरकान्तकृत्

विद्याध्यायी भूमिशायी सुदामा सुसखा सुखी ।
सकलो विकलो वैद्यःकलितो वै कलानिधिः ॥ १८२ ॥
विद्याशाली विशाली च पितृमातृविमोक्षकः ।
रुक्मिणीरमणो रम्यः कालिन्दीपतिः शङ्खहा ॥ १८३ ॥

पाञ्चजन्यो महापद्मो बहुनायकनायकः। धुन्धुमारो निकुम्भघ्नः शम्बरान्तोरतिप्रियः
प्रद्युम्नश्चानिरुद्धश्च सात्वतां पतिरर्जुनः। फाल्गुनश्च गुडाकेशः सव्यसाचीधनञ्जयः

किरीटी च धनुष्पाणिर्धनुर्वेदविशारदः ।
शिखण्डी सात्यकिः शैव्योभीमो भीमपराक्रमः ॥ १८६ ॥
पाञ्चालश्चाभिमन्युश्च सौभद्रो द्रौपदीपतिः ।
युधिष्ठिरो धर्मराजः सत्यवादी शुचिव्रतः ॥ १८७ ॥

नकुलः सहदेवश्च कर्णोदुर्योधनो घृणी। गाङ्गेयोऽथगदापाणिर्भीष्मोभागीरथीसुतः
प्रज्ञाचक्षुर्धृतराष्ट्रोभारद्वाजोऽथ गौतमः। अश्वत्थामा विकर्णश्च जह्नुर्युद्धविशारदः

सीमन्तिको गदी गालवो विश्वामित्रो दुरासदः ।
दुर्वासा दुर्विनीतश्च मार्कण्डेयो महामुनिः ॥ १९० ॥
लोमशो निर्मलोऽलोमी दीर्घायुश्च चिरोऽचिरा ।
पुनर्जीवी मृतो भावी भूतो भव्यो भविष्यकः ॥ १९१ ॥

त्रिकालोऽथ त्रिलिङ्गश्चत्रिनेत्रस्त्रिपदीपतिः। यादवोयाज्ञवल्क्यश्च यदुवंशविवर्धनः
शल्यक्रीडी विक्रीडश्चयादवान्तकरः कलिः । सदयोहृदयोदायोदाधदोदायभाग्दयी
महोदधिर्महीपृष्ठोनीलपर्वतवासकृत् । एकवर्णो विवर्णश्च सर्ववर्णबहिश्चरः ॥ १९४

यज्ञनिन्दी वेदनिन्दी वेदवाह्यो बलो बलिः ।

बौद्धारिर्बाधको बाधोजगन्नाथो जगत्पतिः ॥ १९५ ॥

भक्तिर्भागवतोभागी विभक्तोभगवत्प्रियः। त्रिग्रामोऽथनवारण्योगुह्योपनिषदासनः
शालिग्रामःशिलायुक्तोविशालोगंडकाश्रयः। श्रुतदेवः श्रुतःश्रावीश्रुतबोधःश्रुतश्रवाः

कल्किः कालकलः कल्को दुष्टम्लेच्छविनाशकृत् ।
कुङ्कुमी धवलो धारः क्षमाकरो वृषाकपिः ॥ १९८ ॥

किङ्करः किन्नरः कण्वः केकीकिम्पुरुषाधिपः। एकरोमाविरोमाचबहुरोमाबृहत्कविः
वज्रप्रहरणोवज्रीवृत्रघ्नोवासवानुजः। बहुतीर्थकरस्तीर्थःसर्वतीर्थजनेश्वरः ॥ २०० ॥
व्यतीपातोपरागश्च दानवृद्धिकरः शुभः। असंख्येयोऽप्रमेयश्चसंख्याकारोविसंख्यकः

मिहिकोत्तारकस्तारो बालचन्द्रः सुधाकरः ।
किम्वर्णः कीदृशः किञ्चित्किस्वभावः किमाश्रयः॥ २०२ ॥

निर्लोकश्च निराकारी बह्वाकारैककारकः। दौहित्रः पुत्रिकः पौत्रो नप्तावंशधरोधरः

द्रवीभूतो दयालुश्च सर्वसिद्धिप्रदो मणिः ॥ २०४ ॥

आधारोऽपि विधारश्च धरासूनुः सुमङ्गलः। मङ्गलो मङ्गलाकारो माङ्गल्यःसर्वमङ्गलः
नाम्नां सहस्रंनामेदं विष्णोरतुलतेजसः। सर्वसिद्धिकरं काम्यंपुण्यंहरिहरात्मकम्

यः पठेत्प्रातरुत्थाय शुचिर्भूत्वा समाहितः ।
यश्चेदं शृणुयान्नित्यं नरो निश्चलमानसः ॥ २०७ ॥

त्रिसन्ध्यं श्रद्धया युक्तं सर्वपापैः प्रमुच्यते । नन्दते पुत्रपौत्रैश्च दारैर्भृत्यैश्चपूजितः
प्राप्नुते विपुलां लक्ष्मींमुच्यतेसर्वसंकटात्। सर्वान्कामानवाप्नोतिलभतेविपुलंयशः

विद्यावाञ्जायते विप्रः क्षत्रियो विजयी भवेत् ।
वैश्यश्च धनलाभाढ्यः शूद्रः सुखमवाप्नुयात् ॥ २१० ॥

रणेघोरे विवादे च व्यापारे पारतन्त्रके । विजयी जयमाप्नोति सर्वदा सर्वकर्मसु ॥

एकधा दशधा चैव शतधा च सहस्रधा ।
पठते हि नरो नित्यं तथैव फलमश्नुते ॥ २१२ ॥
पुत्रार्थी प्राप्नुते पुत्रान्धनार्थीधनमव्ययम् ।

मोक्षार्थी प्राप्नुते मोक्षं धर्मार्थी धर्मसञ्चयम् ॥ २१३ ॥

कन्यार्थी प्राप्नुते कन्यां दुर्लभां यत्सुरैरपि ।

ज्ञानार्थी जायते ज्ञानी योगी योगेषु युज्यते ॥ २१४ ॥

महोत्पातेषु घोरेषु दुर्भिक्षे राजविग्रहे । महामारीसमुद्भूते दारिद्र्ये दुःखपीडिते

अरण्ये प्रान्तरे वाऽपिदावाग्निपरिवारिते । सिंहव्याघ्राभिभूतेऽपिवनेहस्तिसमाकुले

राज्ञा क्रुद्धेन चाज्ञप्ते दस्युभिः सह सङ्गमे ।

विद्युत्पातेषु घोरेषु स्मर्तव्यं हि सदा नरैः ॥ २१७ ॥

ग्रहपीडासु चोग्रासु वधबन्धगतावपि । महार्णवे महानद्यां पोतस्थेषु न चापदः

रोगग्रस्तो विवर्णश्च गतकेशनखत्वचः । पठनाच्छ्रवणाद्वापि दिव्यकायाभवन्तिते

तुलसीवनसंस्थाने सरोद्वीपे सुरालये । बद्रिकाश्रमे शुभे देशे गङ्गाद्वारे तपोवने

मधुवने प्रयागे च द्वारकायां समाहितः । महाकालवनेसिद्धेनियताःसर्वकामिकाः

ये पठन्ति शतावर्तं भक्तिमन्तो जितेन्द्रियाः ।

ते सिद्धाः सिद्धिदा लोके विचरन्ति महीतले ॥ २२२ ॥

अन्योन्यभेदभेदानां मैत्रीकरणमुत्तमम् ।

मोहनं मोहनानां च पवित्रं पापनाशनम् ॥ २२३ ॥

बालग्रहविनाशाय शान्तीकरणमुत्तमम् । दुर्वृत्तानां च पापानां बुद्धिनाशकरं परम्

पतद्गर्भा च वन्ध्या च स्राविणी काकवन्ध्यका ।

अनायासेन सततं पुत्रमेव प्रसूयते ॥ २२५ ॥

पयः पुष्कलदागावोबहुधान्यफला कृषिः । स्वामिधर्मपराभृत्यानारीपतिव्रताभवेत्

अकालमृत्युनाशाय तथादुःस्वप्नदर्शने । शान्तिकर्मणि सर्वत्र स्मर्तव्यं च सदानरैः

यः पठत्यन्वहं मर्त्यः शुचिष्मान्विष्णुसन्निधौ ।

एकाकी च जिताहारो जितक्रोधो जितेन्द्रियः ॥ २२८ ॥

गरुडारोहसंपन्नः पीतवासाश्चतुर्भुजः ।

वाञ्छितं प्राप्य लोकेऽस्मिन्विष्णुलोके स गच्छति ॥ २२९ ॥

एकतः सकला विद्या एकतःसकलं तपः । एकतःसकलोधर्मोनामविष्णोस्तथैकतः

यो (मां) हि नामसहस्रेण स्तोतुमिच्छति वै द्विजः ।

सोऽय (ऽह) मेकेन श्लोकेन स्तुत एव न संशयः ॥ २३१ ॥

सहस्राक्षः सहस्रपात्सहस्रवदनोज्ज्वलः । सहस्रनामानन्ताक्षःसहस्रबाहुर्नमोऽस्तुते

विष्णोर्नामसहस्रं वै पुराणं वेदसम्मतम् । पठितव्यं सदा भक्तैः सर्वमङ्गलमङ्गलम्

इति स्तवाभियुक्तानां देवानांतत्र वैद्विज । प्रत्यक्षंप्राह भगवान्वरदो वरदार्चितः

श्रीभगवानुवाच

व्रियतां भोः सुराः! सर्वैर्वरोऽस्मत्तोऽभिवाञ्छितः ।

तत्सर्वं सम्प्रदास्यामि नाऽत्रकार्या विचारणा ॥ २३५ ॥

देवा ऊचुः

वरदोऽसि यदा विष्णो वरमेतं ददस्व नः । अदितेर्गर्भसंभूतःशक्रस्याऽप्यनुजोभव

इति संप्रार्थितो देवैर्ब्रह्मशक्रपुरोगमैः । तथेत्युक्त्वा च भगवांस्तत्रैवान्तरधीयत

ततः कतिपये काले भगवानदितिनन्दनः । विष्णुरूपधरोऽनन्तोवामनत्वाच्चवामनः

बलिर्वैरोचनो व्यास वाजिमेधशतेन च । ईजे द्विजवरश्रेष्ठ!इन्द्रराज्यजिहीर्षया ॥

ऋत्विजं कश्यपं कृत्वा होतारं भृगुसत्तमम् । ब्रह्मा तत्राभवच्चैवस्वयमेवपितामहः

अध्वर्युर्भगवानत्रिर्बभूव मुनिसत्तमः । उद्गाता नारदश्चैव वसिष्ठश्च सभासदः

ये यत्र विहिताःसर्वेतत्रतत्रमुनीश्वराः । बलिस्तत्राऽभवद्व्यास दीक्षितोराजसत्तमः

एवं प्रवर्तमानेषु यज्ञेषु मुनिसत्तम! । हूयतां भुज्यतां चैव दीयतां धीयतां तथा

इति वाचः शुभास्तत्र श्रूयन्ते च द्विजोत्तम! ।

तस्मिन्काले सुचित्रेषु वामनोऽगाच्छुचिस्मितः ॥ २४४ ॥

पठमानो मुखाग्रेण चातुर्वेदिकमन्त्रकान् । द्वारे तिष्ठति राजेन्द्र वामनो द्विजसत्तमः

प्रतिहारेण वै व्यास!सर्वं राज्ञेनिवेदितम् । उत्थाय च महाराजोबलिर्वैरोचनिस्तदा

अर्घ्यमादाय तत्सर्वं जगाम स्वैः सभासदैः ।

पूजयित्वा यथान्यायं वामनं लोकभावनम् ॥ २४७ ॥

आनयित्वा सभामध्ये दत्त्वाऽऽसनपरिग्रहम् ।
कुतस्त्वागमनं ब्रह्मन्किन्तेऽभीष्टं ददामि वै ॥ २४८ ॥

वामन उवाच

राजराजाखिला सृष्टिर्ब्रह्मणः परमेष्ठिनः । ततोऽहमागतो भूमन्यज्ञं चैव दिदृक्षया
वरुणस्यच यज्ञो वै दृष्टो मे वै पुराऽनघ! । यक्षाधिपतेर्नूनं च यज्ञंवै दृष्टवानहम्
धर्मस्यापि च यज्ञो मे प्रजापतेश्च सत्तम । वायोर्यज्ञो महाराज दृष्टोमेविधिपूर्वकः
राजर्षीणां च ये यज्ञा दृष्टास्तेऽपि महाव्रत! । यादृशं वै महाराज यज्ञं ते दृष्टवानहम्
ईदृशो राजराजेन्द्र न भूतोनभविष्यति । तस्मादिहागतो राजन्!याचनार्थंतवाऽनघ

बलिरुवाच

याचस्व त्वं द्विजश्रेष्ठ! किं तेऽभीष्टं ददाम्यहम् ॥ २५४ ॥

वामन उवाच

देहि मे राजराजेन्द्र! पदानि त्रीणि मेदिनीम् ।
वासार्थं रोचते तेऽद्य यदि पार्थिवसत्तम! ॥ २५५ ॥

बलिरुवाच

किमिदं याचितं विप्र! स्वल्पं ते नहि तेपरम् ।
गजवाजिरथाः क्षोणा रत्नानि विविधानि च ॥ २५६ ॥
दासदासीर्वरारोहाःस्त्रियोनानावसूनिच । द्रव्याणिवाससीशुभ्रेयाचस्वत्वंद्विजोत्तम
पात्रोऽसि कृतकृत्योऽसि वेदवेदाङ्गपारग! ॥ २५८ ॥

वामन उवाच

न मे किञ्चित्स्पृहा राजन्विद्यते भुवि मानद! ।
देहि त्वं त्रिपदां भूमिं यदि श्रद्धाऽस्ति तेऽधुना ॥ २५९ ॥
इत्युक्ते वामनेनाथ बलिर्वचनमब्रवीत् । गृहाण त्रिपदां भूमिं वासस्यार्थंहि मानद
इत्युक्त्वासचराजर्षिर्ददौभूमिंद्विजाय वै । वारितोऽपितदाव्यासभृगुणादैवनोदितः
दत्तमात्रे जलेसद्यो ब्रह्माण्डं चाक्रमद्धरिः । सार्धंपादद्वयं जाता सशैलवनकानना

वसुधेयं तदा व्यास!बलिना चार्पितं वसु ।
जित्वाऽसुरगणान्सर्वान्राज्यं दत्त्वा शतक्रतोः ॥ २६३ ॥
पश्चात्कुमुद्वतीं प्राप्तो विष्णुर्वामनरूपधृक् ॥ २६४ ॥
ऋद्धिसिद्ध्याश्रमे पुण्ये तीर्थं कृत्वाऽऽत्मसंभवम् ।
निवासमकरोद्व्यास तत्रैव स सुरोत्तमः ॥ २६५ ॥
वामनेन कृतं तीर्थं वामनं कुण्डमुच्यते । भाद्रेमासिसितेपक्षेद्वादशा श्रवणान्विता
वामनद्वादशी प्रोक्ता हत्याकोटिविनाशिनी ।
अस्मिंस्तीर्थे नरः स्नात्वा ह्युपोष्यैकादशीं यदा ॥ २६७ ॥
रात्रौ जागरणं कुर्याद्ब्रह्मभूयाय कल्पते । द्वादश्यां वै विशेषेण महादानानिकुर्वते
नतेषांदुर्लभं किञ्चित्त्रिषुलोकेषु विद्यते । एवं वै वामनं तीर्थं पुरा प्रोक्तं महर्षिणा ॥
सर्वपापहरं पुण्यं सर्वकामवरप्रदम् । प्राप्यते तेन सर्वं हि नाऽत्र कार्याविचारणा

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे ऽवन्तीक्षेत्रमाहात्म्ये वामनकुण्डमहिमविष्णुसहस्रनामकथनंनामचतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

पञ्चसप्ततितमोऽध्यायः

कालभैरवतीर्थयात्रावर्णनम्

सनत्कुमार उवाच

अतः परं प्रवक्ष्यामि वीरेश्वरमथो शृणु ।
तस्मिंस्तीर्थे नरः स्नात्वा वीरलोकमवाप्नुयात् ॥ १ ॥
नागानां प्रवरं तीर्थं सर्वकामवरप्रदम् । कालभैरवमित्याख्यं तच्च तीर्थंपरंस्मतम्
यस्य दर्शनमात्रेण सर्वदुःखातिगो भवेत् ॥ ३ ॥

व्यास उवाच

कस्मिन्काले हि विख्यातं कालभैरवसंज्ञितम् ।
तीर्थं मुनिवरश्रेष्ठ! एतद्विस्तरतो वद ॥ ४ ॥

सनत्कुमार उवाच

पुराऽयं भैरवो योगी योगिनीत्रासकारकः ।
कालचक्रकृताः कृत्या योगिनीनां गणास्तदा ॥ ५ ॥
तासां कालीति विख्याता योगिनी परमोत्तमा ।
तयाऽयं पालितो नित्यं पुत्रवद् भैरवोऽमलः ॥ ६ ॥
तेनैते च विनिर्धूता दोषोत्पाताश्च सत्तम ।
त्रिविधा भुवि विख्याताः सर्वविघ्नकराः पराः ॥ ७ ॥
कालकृत्यास्तदा तेन भ्रंशिताः परमात्मना ।
महामारी पूतना कृत्या शकुनी रेवती खला ॥ ८ ॥

कोटरी तामसी माया नवैता मातृकाः स्मृताः । दुष्टदोषमहादुष्टा सर्वप्राणिभयङ्कराः
वशीचक्रे स धर्मात्मा सर्वकामवरप्रदाः । शिप्रातीरे स्थितोनित्यं कूलेचोत्तरतःशुभे
ऊषरस्य परे पूर्वे सोऽपि तिष्ठतिसर्वदा । आषाढस्य सिते पक्षे रविवारे समाहितः
नवमींवाऽष्टमींप्राप्यचतुर्दश्यांविशेषतः । पूजांकुर्वन्ति ये केचिन्नरा निश्चलमानसाः
विवाहे पुत्रजनने माङ्गल्ये च शुभे परम् । पत्रपुष्पार्घगन्धैश्च नैवेद्यैर्विविधैस्तथा ॥
ताम्बूलवासगन्धाद्यैःपूजयेद्वरदरूपिणम् । विप्राणां भोजनैर्होमैस्तर्पयेत्सततं विभुम्
एतत्परमकल्याणमेतत्परममङ्गलम् । नत्वा स्तुत्वा च तं देवं सर्वकामार्थसिद्धये ॥

सकलकलुषहारी धूर्तदुष्टान्तकारी सुचिरचरितचारी मुण्डमौञ्जीप्रचारी ।
करकलितकपाली कुण्डली दण्डपाणिः स भवतु सुखकारी भैरवो भावहारी ॥
विविधरासविलासविलासितं नववधूरवधूतपराक्रमम् ।
मदविघूर्णितगोष्पदगोष्पदं भवपदं सततं सततं स्मरे ॥ १७ ॥
अमलकमलनेत्रं चारुचन्द्रावतंसं सकलगुणगरिष्ठं कामिनीकामरूपम् ।

परिहृतपरितापं डाकिनीनाशहेतुं भज जन शिवरूपं भैरवं भूतनाथम् ॥ १८ ॥
सबलबलविघातं क्षेत्रपालैकपालं विकटकटिकरालं ह्यट्टहासं विशालम्
करगतकरवालं नागयज्ञोपवीतं भज जन शिवरूपं भैरवं भूतनाथम् ॥ १९ ॥
भवभयपरिहारं योगिनीत्रासकारं सकलसुरगणेशं चारुचन्द्रार्कनेत्रम् ।
मुकुटरुचिरभालं मुक्तमालं विशालं भज जन शिवरूपं भैरवं भूतनाथम् ॥ २० ॥
चतुर्भुजं शङ्खगदाधरायुधं पीताम्बरं सान्द्रपयोदसौभगम् ।
श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं शीलप्रदं शङ्कररक्षणं भजे ॥ २१ ॥
लोकाभिरामं भुवनाभिरामं प्रियाभिरामं यशसाभिरामम् ।
कीर्त्याभिरामं तपसाऽभिरामं तं भूतनाथं शरणं प्रपद्ये ॥ २२ ॥
आद्यं ब्रह्मसनातनं शुचिपरं सिद्धिप्रदं कामदं
सेव्यं भक्तिसमन्वितं हरिहरैः सृष्ट्या सहं साधुभिः ।
योग्यं योगविचारितं युगधरं योग्याननं योगिनं
वन्देऽहं सकलं कलङ्करहितं सत्सेवितं भैरवम् ॥ २३ ॥
भैरवाष्टकमिदं पुण्यं प्रातःकाले पठेन्नरः ।
दुःस्वप्ननाशनं तस्य वाञ्छितर्थफलं भवेत् ॥ २४ ॥

राजद्वारे विवादे च सङ्ग्रामे सङ्कटेनतथा । राज्ञा क्रुद्धेन चाऽऽज्ञप्ते शत्रुबन्धगतेतथा
दारिद्र्यदुःखनाशाय पठितव्यं समाहितैः ।
न तेषां जायते किञ्चिद् दुर्लभं भुवि वाञ्छितम् ॥ २६ ॥

इति भैरवाष्टकम्

अस्मिंस्तीर्थे प्रकर्तव्यं स्नानदानादिकं नरैः । संसारभयभीतैश्च पूजितो भैरवो वरः
तस्मात्सर्वप्रयत्नेन कर्तव्यं तीर्थमुत्तमम् ॥ २७ ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-
ऽवन्तीक्षेत्रमाहात्म्ये कालभैरवतीर्थयात्रावर्णनं नाम
पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

षट्सप्ततितमोऽध्यायः

तीर्थयात्रायांनागतीर्थमहिमवर्णनम्

व्यास उवाच

नागतीर्थं त्वया ब्रह्मन्पुराप्रोक्तं यशस्विना । तस्यतीर्थवरस्याऽपिमहिमानश्चसत्तम

भूयस्तु श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ।

कियत्काले समाख्यातमेतद्विस्तरतो वद ॥ २ ॥

सनत्कुमार उवाच

श्रृणु ब्रह्मन्प्रवक्ष्यामितवाग्रेनागतीर्थजाम् । कथांपुण्यतमांतुभ्यंभुविपापहरांपराम्

यस्याः श्रवणमात्रेण शापमुक्तो भवेन्नरः । पुरा नागा परिभ्रष्टा मातुः शापात्परन्तप

जनमेजयेन दग्धास्ते मोक्षिता ह्यास्तिकेन च ।

पप्रच्छुस्ते द्विजश्रेष्ठ! जरत्कार्वात्मजं तदा ॥ ५ ॥

नागा ऊचुः

ब्रह्मंस्तवप्रसादेनमोक्षिताहव्यवाहनात् । जनमेजयस्ययज्ञेऽस्मिन्देवराजस्यसंनिधौ

अस्माकं भूतमन्विच्छन्वासस्यार्थं परंतप ।

यस्मिन्स्थाने सदा ब्रह्मन्निवासो जायतेऽभयः ॥ ७ ॥

आस्तीक उवाच

श्रूयतांमातुलश्रेष्ठा युष्माकंहितमुत्तमम् । महाकालवने रम्ये या वै कुशस्थलीस्मृता

तस्या हि दक्षिणे भागे पूर्वतीर्थं सनातनम् ।

नागालयं पुरा प्रोक्तं यत्र सन्निहितो हरिः ॥ ६ ॥

योगनिद्रांसमासाद्य शेते ब्रह्म सनातनम् । शेषशायीतिविख्यातः सर्वलोकेषुगीयते

कल्पदोषो न तत्रैव बाधते सर्वदेहिनाम् । बकदाल्भ्य ऋषिस्तत्र तपस्तेपे धृतव्रतः

लोमशश्च महातेजास्तत्रैव प्रतितिष्ठति । दीर्घायुष्ट्वं समापन्नोमार्कण्डेयो महामुनिः

न वर्तते कालचक्रं महाकालप्रतापतः । कपिलः सिद्धिमापन्नो यत्र तीर्थवरोत्तमे ॥

हरिश्चन्द्रो विमुक्तोऽभूद्गर्ह्यचण्डालयोनितः । सप्तर्षिप्रवरायेते निर्वाणपदवीं गताः

एतस्मात्कारणात्सर्वैस्तत्र विश्रम्यतां सदा ।

मातुः शापोद्भवो दोषो युष्माकं नैव बाधते ॥ १५ ॥

एतत्तेवचनं श्रुत्वामहर्षेरास्तिकस्यच । आगच्छंस्तत्र ते शीघ्रं वासार्थंपन्नगोत्तमाः

एलापत्रः कम्बलश्च कर्कोटकधनञ्जयौ । वासुकिःपन्नगश्रेष्ठस्तक्षको नील एव च ॥

पद्मकश्चार्बुदश्चैव नागास्ते सर्व एव हि ।

अत्रागत्य स्वस्थानानि चक्रुस्ते सुचिरव्रताः ॥ १८ ॥

तत्ररम्याणितीर्थानिजातानिपरमाणि च । नवानि चक्रुःकुण्डानि तीर्थभूतानिसत्तम

महापुण्यप्रदान्याहुर्महापापहराणि च । यत्र सिद्धाश्च गन्धर्वा ऋषयः संशितव्रताः

अप्परोगणसङ्घैश्च सेव्यन्ते च सदा वरैः ।

यत्र शेषो महानागः पुरा प्रोक्तो महर्षिणा ॥ २१ ॥

शेषशायी ह्यलं विष्णुर्भगवान्कमलेक्षणः । तत्र सर्वाणितीर्थानितिष्ठन्तिभुविसर्वदा

श्वेतद्वीपेति विख्याता मणिविक्रान्तभूमिका ।

यत्र पुण्याश्च वै वृक्षाः पुष्पिताश्चैव सर्वशः ॥ २३ ॥

हंसकारण्डकाकादिपिककोकिलसारसाः ।

पद्मखण्डगणास्तत्र नृत्यन्ति च शिखण्डिनः ॥ २४ ॥

निधिरेषमहापद्मो नीलोत्पलसुगन्धिना । वासितो वायुना शुभ्रः किन्नरोद्गारनादितः

यत्र सुसंस्कृता नार्यो विहरन्ति सुराङ्गनाः ।

नागकन्याभी रम्याभिर्मण्डितं परमाद्भुतम् ॥ २६ ॥

यत्रस्नात्वानरोयाति वैकुण्ठंधामशोभनम् । शेषशायी हरिर्यत्र शेते हि च रमापतिः

तत्र रमासरोनाम तीर्थं परमशोभनम् । यत्रस्नात्वानरोनित्यं श्रीमान्भवति नाऽन्यथा

एवं व्यास! परं स्थानं सर्वपापहरं परम् । अत्रैव च परं तीर्थं बलेराश्रमद्भुतम् ॥

अत्रस्नानादिकंकार्यं यत्रसंनिहितोहरिः । सर्वपापविशुद्धात्मा नरोभवति तत्क्षणात्

कियत्प्रमाणमात्रां च ये ददति वसुन्धराम् ।
तनूरुहाणि यावन्ति तावत्कालसुङ्ख्यया ॥ ३१ ॥
अक्षय्या लभ्यते वृद्धिस्तेषां लोकाः सनातनाः ।
श्रावणे मासि दर्शे च पञ्चम्यां सोमवासरे ॥ ३२ ॥
नागानां पूजनं कार्यं श्राद्धं दर्शे विधीयते ।
अक्षयं जायते श्राद्धं वाञ्छितार्थं भवेत्ततः ॥ ३३ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे ऽवन्तीक्षेत्रमाहात्म्ये तीर्थयात्रायां नागतीर्थमहिमवर्णनं नाम षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

सप्तसप्ततितमोऽध्यायः

नृसिंहतीर्थमहत्त्ववर्णनम्

सनत्कुमार उवाच

भूयःश्रृणुपरंव्यास तीर्थानामुत्तमं वरम् । तत्तीर्थं सर्वपापघ्नं नृसिंहस्यमहात्मनः यस्य दर्शनमात्रेण सर्वपापं समुत्तरेत् । दैत्यराजः समाख्यातो हिरण्यकशिपुः पुरा

तेनेयं वसुधा सर्वा सम्प्राप्ता च दुरात्मना ।
दुष्टदैत्यबलैर्व्याप्ता भाराक्रान्ता शुचार्दिता ॥ ३ ॥

गौर्भूत्वाऽश्रुमुखीदेवैर्ब्रह्माणंशरणंययौ । भाराक्रान्तांधरांदृष्ट्वा ब्रह्मालोकपितामहः

उवाच श्लक्ष्णया वाचा तस्याश्रमं व्यपोहितुम् ।
श्रूयतां भोऽवने (?) पुण्ये भवत्या उपकारकम् ॥ ५ ॥

वचो वदामि ते तथ्यं देशकालोचितंतथा । पुराऽनेन तपश्चीर्णं दुष्करंसर्वदेहिनाम् गायत्र्युपासना तेन कृता सुनियतात्मना । मयाचास्य वरोदत्तः प्रीतियुक्तेनचेतसा

न दिवा न तथा रात्रौ नान्तरिक्षे न भूतले ।
नातिशुष्केण चार्द्रेण न चास्त्रशस्त्रघातनैः ॥ ८ ॥

न देवासुरगन्धर्वैर्न यक्षोरगकिन्नरैः । पिशाचैर्गुह्यकाद्यैश्च राक्षसैर्न कदाचन ॥ मानवैःपक्षिजातैश्च न मे मृत्युर्भवेदिति । एककरतलाघातैः सकुलबलवाहनम् ॥ १० मारयिष्यतिमांवीरःसमेमृत्युर्भविष्यति । तथेत्युक्त्वाऽतिदुष्टात्मा तमहंचतदाऽवने आगमंचैव लोकं स्वं स दैत्योघोरशासनः । बभूवसर्वलोकानांशास्ताचातुलविक्रमः तस्यैवाऽधिकृतालोके बभूवुर्विगतज्वराः । त्रैलोक्यं बुभुजे नित्यं सर्वदैत्यजनेश्वरः तस्माद्यूयं वनं यात महाकालं महेशितुः । तत्र तीर्थं महच्चासीत्सर्वतीर्थवरोत्तमम् सङ्गमेश्वरस्य दक्षिणे कर्कराजोत्तरे तथा । शिप्रातीरे शुभे देशे पूर्वं वैकुण्ठसन्निभम्

नृसिंहाख्यं परं धाम तस्य तीर्थं प्रतिष्ठितम् ।
तत्र गत्वा सुरश्रेष्ठाः! स्नानदानादिकाः क्रियाः ॥ १६ ॥

कुरुत सत्वरं सर्वं पुनर्लोकानवाप्स्यथ । ते तस्य वचनं श्रुत्वा देवाइन्द्रपुरोगमाः महाकालवनंप्राप्तायत्र शिप्रापयस्विनी । नृसिंहतीर्थोपकूले उषित्वा शाश्वतीःसमाः

स्नानदानादिकं कृत्वा नृसिंहस्याऽर्चनं तथा ।
एवं कृत्वा विधानेन परां सिद्धिमितो गताः ॥ १९ ॥

नृसिंहस्यस्वरूपेण हतोदानवपुङ्गवः । सभामध्ये तदा व्यास हरिणाऽमित्रघातिना करेणैकप्रहारेण हिरण्यकशिपुर्हतः । ततः सुरगणाः सर्वे स्वाधिकारान्ययुस्तदा तदारभ्य सुराःसर्वे मध्याह्नोपासनं सदा । प्रकुर्वन्ति च तत्रैव यत्र तीर्थे हरिः परम्

एवं तीर्थं परं व्यास! अवन्त्यां विद्यते भुवि ।
अस्मिंस्तीर्थे द्विजश्रेष्ठ! स्नानदानादिकाः क्रियाः ॥ २३ ॥
ये कुर्वन्ति नराः पुण्यास्ते यान्ति परमां गतिम् ।
सर्वदा सर्वकालेषु पुण्यदं तीर्थमुत्तमम ॥ २४ ॥
कदाचिन्नृसिंहतिथिं प्राप्य चैव चतुर्दशीम् ।
स्नानं कृत्वाऽर्चनं तस्य नृसिंहस्य च धीमतः ॥ २५ ॥

नृसिंहेश्वरदेवेशं पूजयेद्यः समाहितः। तस्य हस्तगता लक्ष्मीर्भविष्यति न संशयः

ततोऽगस्त्येश्वरं देवं यः पश्येत्सुसमाहितः।

तस्य व्यास! क्षितौ किञ्चिद् दुर्लभं नैव दृश्यते ॥ २७ ॥

यत्रसिद्धिं परां प्राप्तो हनुमान्पवनात्मजः। ब्रह्मचारीसदाचारोयतिःसर्वार्थसाधकः

तिष्ठति परदैवज्ञः सर्वकामार्थसिद्धये। यस्मिन्वटे पुरा तप्तं तपः परमदुश्चरम् ॥२९

मित्रावरुणपुत्रेण सिद्धिहेतोस्तपस्विना। बोधीन्यग्रोधइत्याख्योह्यगस्तिवटएवच

नरो नारीसमायुक्तःसावित्रीव्रतमाचरेत्। सौभाग्यं लभते नित्यं सावित्र्याश्चपरंतप

यस्मिंस्तीर्थे नरः स्नात्वा दत्त्वा दानं च सौभगम्।

अष्टसौभाग्यसम्पूर्णं वंशपात्रं सवासकम् ॥ ३२ ॥

सप्तधान्यसमोपेतंपञ्चरत्नपरिष्कृतम्। सौगन्ध्यादीनिमाल्यानिमौलिसूत्रसमायुतम्

सावित्रीं हाटकीं कृत्वा यथाशक्ति परन्तप!।

यो वै ददाति विप्राय वेदवेदाङ्गधीमते ॥ ३४ ॥

लभते विपुलां लक्ष्मीं बहुभोगकरीं शुभाम्।

भुक्त्वा वै विविधान्भोगान्पुनः स्वर्गमवाप्नुयात् ॥ ३५ ॥

सावित्रीव्रतकृन्नारी जायते पतिवल्लभा।

पतिव्रता महाभागा विधवा न कदाचन ॥ ३६ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे

ऽवन्तीक्षेत्रमाहात्म्ये नृसिंहतीर्थमहिमवर्णनं नाम

सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

अष्टसप्ततितमोऽध्यायः

कुटुम्बेश्वरमाहात्म्यकथनम्

सनत्कुमार उवाच

शृणुव्यासपरंतीर्थंभुविविख्यातमुत्तमम्। कुटुम्बेश्वरेतिविख्यातो नाम्नाचवमहेश्वरः

तस्यतीर्थवरंतीर्थंसर्वतीर्थफलप्रदम्। यस्मिंस्तीर्थेनरःस्नात्वा कुटुम्बीजायतेध्रुवम्

कुटुम्बार्थं तपस्तेपे पुरा दक्षः प्रजापतिः। नारदेन पुरा व्यास पुत्रषष्टिर्विवासिता

प्रजाकामः स धर्मात्मा सुचिरं व्रतमाचरत्।

सपत्नीको महातेजा निराहारो जितेन्द्रियः ॥ ४ ॥

अस्मिंस्तीर्थे शुचिः स्नातो जपन्ब्रह्म सनातनम्।

वर्षाणामयुतं व्यास! तपस्तेपे सुदारुणम् ॥ ५ ॥

तेन तीर्थप्रसादेन लभेत्स बहुलांप्रजाम्। प्रजापतिरितिख्यातोजातोदक्षःप्रतापवान्

ब्रह्माऽपि तत्र वै पश्चात्तपः कृत्वा सुदुष्करम्।

निष्कलं कमलं रूपं प्राप्तवांस्तत्क्षणाद्विधिः ॥ ७ ॥

महादेवोऽपि तत्रैव प्राप्तवान्ब्रह्मणः पदम्। चतुर्मुखधरं लिङ्गं दृश्यतेऽद्यापिसत्तम

भद्रपीठधरा देवी भद्रकालीति विश्रुता। तत्रैव च सदा व्यास क्रीडतिस्म धृतव्रता

द्वारे तिष्ठति तत्रैव भैरवः क्षेत्रपालकः। पादेन खञ्जतांयातः पुरा दैत्यवरार्दितः॥

पुत्रवत्पालितो देव्या सदा तिष्ठति तत्स्थले।

ये ते देवगणाः सर्वे तस्मिंस्तीर्थे प्रतिष्ठिताः ॥ ११ ॥

ऋषयोऽपि महाभागाः सदा पर्वणिपर्वणि। आयान्ति चैव सन्ध्यार्थंबहुपुत्रप्रदेसरे

अस्मिंस्तीर्थेसदाचाराःस्नानंकुर्वन्ति येनराः। नतेषांदुर्लभं किञ्चिज्जायतेजन्मजन्मनि

महाबाधासु घोरासु महामारीषु तत्परैः। हवनं क्रियते नित्यं सर्षपै राजिकैर्यवैः

पायसैर्विविधैर्भोगैस्तेषां दोषो न जायते। दुर्भिक्षे राज्यभ्रंशे च संग्रामे भृशदारुणे

पूजयेत्क्षेत्रपालं च सर्वापदि समाहितः । सर्वदुःखविनिर्मुक्तोजायतेनाऽत्रसंशयः

स्नात्वा कुटुम्बके तीर्थे पूजयित्वा महेश्वरम् ।

दानं कुष्माण्डकं दद्याद् ब्राह्मणाय तपस्विने ॥ १७ ॥

सौवर्णमणिमुक्ताभिर्वासोऽलङ्कारसंयुतम् । धनधान्यसमायुक्तः कुटुम्बी जायतेनरः

फाल्गुनेच सिते पक्षे या वै चतुर्दशी भवेत् ।

त्रयोदशीयुता व्यास शिवरात्रिस्तथोच्यते ॥ १६ ॥

तद्दिने च नरः स्नात्वा रात्रौ जागरणं चरेत् ।

बिल्वोदकेन गन्धेन बहुपुष्पफलैस्तथा ॥ २० ॥

धूपैर्दीपैश्च नैवेद्यैर्वासोऽलङ्कारकादिभिः । पूजयेद्योनरो भक्त्या गिरीशं सगणंपरम्

तस्य पापं क्षयंयाति शिवलोके महीयते । द्वादशैकादशीपुण्यं लभते भुवि मानवः

अश्वमेधफलं तस्यजागरे च क्षणेक्षणे । ततस्तुप्रातरुत्थायस्नानदानादिकाःक्रियाः

कृत्वा तु विधिवद् व्यास! शिवपूजाऽर्चनं तथा ।

विप्रांश्च भोजयेत्सप्त तस्य पुण्यफलं शृणु ॥ २४ ॥

कपिलानां सवत्सानां सहस्राणि चतुर्दश ।

वाजपेयसहस्रस्य फलं प्राप्नोति नान्यथा ॥ २५ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डेऽवन्तीक्षेत्रमाहात्म्येकुटुम्बेश्वरमाहात्म्यवर्णनंनामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

एकोनाशीतितमोऽध्यायः

अखण्डेश्वरमहिमवर्णनम्

सनत्कुमार उवाच

शृणु व्यास महापुण्यंतीर्थं परमशोभनम् । देवप्रयागमाख्यातं सर्वपापप्रणाशनम् ॥

देवानां च परं स्थानं यत्र तीर्थं परंतप । सोमतीर्थोत्तरे भागे प्रयागस्यच दक्षिणे॥

शि(क्षि) प्रायाः पूर्वभागे च तत्र तीर्थं प्रतिष्ठितम् ।

तत्र तीर्थे नरः स्नात्वा पश्येच्चैव सुरोत्तमम् ॥ ३ ॥

देवं माधवमित्याख्यं भुविसर्वफलप्रदम् । ददातितस्यदेवेन्द्रोवाञ्छितार्थंजगत्पतिः

आनन्दभैरवस्तत्र सर्वदेवनमस्कृतः । यस्य दर्शनमात्रेण सर्वपापक्षयो भवेत् ॥ ५॥

न तस्य जायते व्यास!यातनाभैरवीकदा । स्वर्गद्वारे सदाव्यासजायतेनिर्भयःपुमान्

ज्येष्ठे मासे सिते पक्षे दशम्यां बुधहस्तयोः । गरानन्देव्यतीपातेकन्याचन्द्रेवृषेरवौ

दशाला जायते वत्स! गङ्गाजन्म परं शुचि ॥ ७ ॥

तद्दिने च नरः स्नात्वा सर्वतीर्थफलं लभेत् ।

अखण्डं च परं तीर्थं शृणु व्यास! ह्यतः परम् ॥ ८ ॥

यस्य श्रवणमात्रेण व्रतभङ्गो न जायते । एक एव पुरा ब्रह्मन्ब्राह्मणो ब्रह्मवित्तमः

धर्मशर्मेतिविख्यातः सदाचाररतःशुचिः । बहुव्रतधरो दान्तो वेदवेदाङ्गपारगः ॥

किञ्चिद्दोषप्रसङ्गेन व्रतपूर्तिर्न चाभवत् । एवं बहुतिथे काले नारदो देवदर्शनः ॥

तस्य गेहागतो ब्रह्मन्नातिथ्यार्थं महातपाः ।

तदोत्थाय द्विजो नित्यं बहुमानपुरःसरम् ॥ १२ ॥

सत्कृत्य नारदं भूमन्विधिदृष्टेन कर्मणा । पूजयित्वा द्विजश्रेष्ठः पप्रच्छ मुनिसत्तम

भगवन्भवता सर्वं विदितं ज्ञानचक्षुषा । अस्माकं च परं दोषःकिञ्चिज्ज्ञातः पुराऽनघ

येन पापप्रसङ्गेन व्रतभङ्गोऽभवद्ध्रुवम् । कारणं ब्रूहि मे नाथ किं दोषोऽत्र तु गण्यते

नारद उवाच

श्रूयतां भो द्विजश्रेष्ठ! भवद्भिश्च पुराकृतम् ।
महाराष्ट्रे सुविख्यातो ब्राह्मणो धनसञ्ज्ञकः ॥ १६ ॥

ब्रह्मघ्नेत्यसौ विप्रो वेदब्राह्मणनिन्दकः । धनलोभी पराक्रान्तःसर्वधर्मबहिर्मुखः

नास्तिको देवतीर्थेषु परद्रव्यापहारकः ।
परस्त्रीषु रतो नित्यं द्यूतवादी च तस्करः ॥ १८ ॥

एवमायुः परिक्षीणो धनहीनोऽभवत्तदा । इतस्ततोऽभ्रमद्भ्रष्टो नदीतीरे सुविह्वलः

गतश्चौर्यप्रसङ्गेन यात्रिकैः सह सङ्गतः ।
किञ्चित्कालेषु दुःशीलो मृतिम्प्राप्तो रुजार्दितः ॥ २० ॥
नीतः संयमिनीं विप्रस्तत्कालं यमकिङ्करैः ।
यमराजपुरं प्राप्तो बहुपापकरो द्विजः ॥ २१ ॥

दृष्टोऽसौ धर्मराजेन तदा पापपरायणः । निरीक्ष्य सहसोवाच धर्मपूर्वमिदं वचः

शृणुध्वं किङ्कराः सर्वे यूयमेकाग्रमानसाः । अनेनाचरितं सर्वंदुष्कर्मसर्वकिल्बिषम्

गोदातीरे मृतः पापी तत्र नः कारणं नहि ।
तिस्रःकोट्योऽर्धकोटिश्च यानि तीर्थान्यहर्निशम् ॥ २४ ॥
आयान्ति गौतमीतीरे सिंहस्थेऽपि बृहस्पतौ ।
तेषां तु वायुसंस्पर्शो जातोऽस्यान्ते (न्तः) कलेवरे ॥ २५ ॥

तेन पुण्यप्रभावेणनोऽस्माकंकारणंकचित् । ग्राह्योभवद्भिर्नैवायंमुच्यतांभोःपुराःसराः

एवं तैर्मोचितो विप्रः पुनर्ब्रह्मगतिं गतः । तेन पापप्रसङ्गेन व्रतभङ्गी गतो भुवि

ब्राह्मण उवाच

ब्रह्मन्केन प्रकारेण सर्वपापक्षयो भवेत् । किं तपः किं च दानं चकिंतीर्थव्रतसेवनम्

येन पुण्यप्रभावेण व्रतभङ्गो न जायते ॥ २६ ॥

नारद उवाच

शृणु द्विजवर श्रेष्ठ! महाकालवनं स्मृतम् ।

यत्र रुद्रसरः प्रोक्तमृषिणा तत्त्वदर्शिना ॥ ३० ॥
कोटिकोटिसुतीर्थानि वर्तन्ते द्विजसत्तम! ।
कोटितीर्थेतिविख्यातं तस्माद् द्विज! सनातनम् ॥ ३१ ॥

तत्तीर्थस्योत्तरेभागेसुतीर्थंसर्वकामदम् । नाम्नाऽखण्डसरःख्यातमखण्डेश्वरसन्निधौ

यस्य दर्शनमात्रेणसर्वयज्ञफलं लभेत् । तस्माद्धि सर्वथा वत्सगच्छत्वंतत्रमाचिरम्

इति तस्य वचः श्रुत्वा सद्विजोऽगात्कुमुद्वतीम् ।
स्नात्वाऽखण्डसरे व्यास दृष्ट्वा देवं महेश्वरम् ॥ ३४ ॥
सद्यः पुण्यवतां लोकान्प्राप्तो वै द्विजसत्तमः ।
एवं व्यास! महातीर्थमखण्डेश्वरमुत्तमम् ॥ ३५ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-ऽवन्तीक्षेत्रमाहात्म्येऽखण्डेश्वरमहिमवर्णनंनामैकोनाशीतितमोऽध्यायः ॥ ८६ ॥

अशीतितमोऽध्यायः

कर्कराजतीर्थमाहात्म्यवर्णनम्

सनत्कुमार उवाच

भूयः शृणु परं तीर्थं सर्वतीर्थफलप्रदम् । कीर्तितं ब्रह्मणापूर्वं मार्कण्डेयस्य पृच्छतः

शृणु वत्स महीपृष्ठे शिप्रादिव्यतरानदी । तस्यास्तीरेवरं तीर्थंकर्कराजेतिविश्रुतम्

यस्य दर्शनमात्रेण महापापक्षयो भवेत् । विकारा मानसाः सर्वे चन्द्रोमानससम्भवः

तस्य स्थानेगतोभानुर्याम्यायनकरः परः । ऋतुत्रयंसमाख्यातंविधूम्रार्चिस्तदुच्यते

तत्र मृताः प्रवर्तन्ते योगिनोऽपिपरन्तप । चातुर्मास्ये हरौ सुप्ते ये नरा व्रतवर्जिताः

न तेषां सद्गतिर्वत्स सत्यमेव ब्रवीमि ते ।
चातुर्मास्ये मृता ये च ये मृता दक्षिणायने ॥ ६ ॥

तेषामुद्धरणार्थायतीर्थमेतद्विनिर्मितम् । कर्कराजइतिख्यातंसर्वलोकेषुगीयते ॥ ७ ॥

मार्कण्डेय उवाच

भगवन्भवता सर्वं निर्मितं विश्वमूर्तिना । चराचरमिदं विश्वं जगत्सर्वं जगत्पते ॥

चातुर्मास्ये हरौ सुप्ते धर्माऽऽचारविधिः स्मृतः ।
तदहं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदाम्वर! ॥ ९ ॥

ब्रह्मोवाच

शृणु वत्स! परं पुण्यं चातुर्मास्यफलं शुभम् ।
यच्छ्रुत्वा भारते खण्डे नृणां मुक्तिर्न दुर्लभा ॥ १० ॥

मुक्तिप्रदोऽयं भगवान्संसारोत्तारकारणः । यस्य स्मरणमात्रेण सर्वपापक्षयो भवेत्
मानुष्यंदुर्लभंलोकेतत्राऽपि च कुलीनता । तत्राऽपिसंयमित्वंचतत्र सत्सङ्गमःशुभः

सत्सङ्गमो न यत्राऽस्ति विष्णुभक्तिर्व्रतानि न ।
चातुर्मास्ये विशेषेण विष्णुव्रतकरः शुभः ॥ १३ ॥
चातुर्मास्ये ऽव्रती यस्तु तस्य पुण्यं निरर्थकम् ।
सर्वतीर्थानि दानानि पुण्यान्यायतनानि च ॥ १४ ॥
विष्णुमाश्रित्य तिष्ठन्ति चातुर्मास्ये समागते ।
स विष्णुराश्रितो नित्यं कर्कराजं सुतीर्थकम् ॥ १५ ॥

सुपुष्टेन च देहेन जीवितं तस्य शोभनम् । चातुर्मास्येसमायातेहरिर्येनाऽर्चितस्तदा
कृतार्थास्तस्य विबुधा यावज्जीवं वरप्रदाः । संप्राप्यमानुषंदेहं चातुर्मास्येपराङ्मुखः
तस्य पापशतान्याहुर्देहस्थानि न संशयः । मानुष्यं दुर्लभं लोके हरिभक्तिश्चदुर्लभा
चातुर्मास्ये विशेषेण सुप्ते देवे जनार्दने । चातुर्मास्ये नरःस्नात्वाकर्कराजेद्विजोत्तम
सर्वक्रतुफलं प्राप्य देववद्दिवि मोदते । विशेषेण तु तत्स्नानंकर्कस्थेऽपिदिवाकरे

दुर्लभं सर्वजन्तूनां ससुरासुरमानुषम् ।
देहशुद्धिं विधायाऽऽदौ मुक्तिमार्गमवाप्नुयात् ॥ २१ ॥

तत्राऽपि निर्झरेकूपेतडागेवासरस्यपि । तस्मात्तदधिकंपुण्यंसमाख्यातंसुरासुरैः

तेषु यः स्नाति वै नित्यं तस्य पापक्षयो भवेत् ॥ २२ ॥
तस्मान्नद्यधिका पुण्या समाख्याता सुरासुरः ।
पुष्करे च प्रयागे च यत्र क्वाऽपि महाजले ॥ २३ ॥
चातुर्मास्ये तु यः स्नाति पुण्यसङ्ख्या ततोऽधिका ।
रेवायां भास्करे क्षेत्रे प्राच्यां सागरसङ्गमे ॥ २४ ॥

एकाहमपियःस्नातिचातुर्मास्ये न दुःखभाक् । दिनत्रयंचयःस्नातिनर्मदायांसमाहितः
सुप्ते देवे जगन्नाथे पापं याति सहस्रधा । पक्षमेकं तुयःस्नाति गोदावर्यांदिनोदये

स भित्त्वा कर्मजं देहं याति विष्णोः सलोकताम् ।
अवन्त्यां कर्कराजे तु साक्षाद्विष्णुर्भवेन्नरः ॥ २६ ॥
क्षणमेकं क्षणार्धं वा चातुर्मास्येऽतिलङ्घयेत् ॥ २७ ॥
तिलोदकेनामलसंयुतेन बिल्वोदकेनापि च मज्जयेद्यः ।
न तस्य जानामि फलाधिकं वै किन्तस्य कीदृङ्मुनिभिः प्रणीतम् ॥ २८ ॥

गङ्गां स्मरति यो नित्यमुदपानसमीपतः । तद्गाङ्गेयजलं जातं तेन स्नानंसमाचरेत्
गङ्गाऽपि देवदेवस्य चरणाङ्गुष्ठवाहिनी । पापहासासदाप्रोक्ताचातुर्मास्येविशेषतः

चातुर्मास्ये जलगतो देवो नारायणो भवेत् ।
सर्वतीर्थाऽधिकं स्नानं विष्णुतेजोंऽशसङ्गतम ॥ ३१ ॥
स्नानं दशविधं कार्यं विष्णुनाम्ना महाफलम् ।
सुप्ते देवे विशेषेण नरो देवत्वमाप्नुयात् ॥ ३२ ॥

विनास्नानंतुयत्कर्मपुण्यकार्यमयंशुभम् । क्रियतेविफलंब्रह्मंस्तद्गृह्णन्तिहिराक्षसाः

स्नानेन सत्यमाप्नाति सत्ये धर्मः सनातनः ।
धर्मान्मोक्षपथं प्राप्य पुनर्नवावसीदति ॥ ३४ ॥
ये चाध्यात्मविदः पुण्या ये च वेदान्तपारगाः ।
सर्वदानप्रदाने च तेषां स्नानेन शुध्यति ॥ ३५ ॥

कृतस्नानस्य हि हरिर्देहमाश्रित्य तिष्ठति । सर्वक्रियाफलं येषु सम्पूर्णफलदं भवेत्

सर्वपापविनाशाय देवतातोषणाय च । चातुर्मास्ये जलस्नानं सर्वपापक्षयावहम् ॥
निशायांचैवनस्नायात्सन्ध्यायांग्रहणंविना । उष्णोदकेननस्नायाद्रात्रौशुद्धिर्नजायते
भानुसंदर्शनाच्छुद्धिर्विहिता सर्वकर्मसु ।
चातुर्मास्ये विशेषेण जलशुद्धिस्तु भाविनी ॥ ३६ ॥
अशक्त्यांतुशरीरस्यभस्मस्नानेनशुध्यति । मन्त्रस्नानेनविप्रेन्द्र विष्णुपादोदकेनवा
नारायणाग्रतःस्नानंक्षेत्रेतीर्थेनदीषु च । विशेषतोऽपिशिप्रायांतीर्थे कर्काभिधेवरे
यश्च स्नाति नरो नित्यं स याति वैष्णवं पदम् ।
तस्मात्त्वं भार्गवश्रेष्ठ! तत्र गच्छस्व मा चिरम् ॥ ४२ ॥
पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च ।
तानि सर्वाणि तिष्ठन्ति कर्कराजजले सदा ॥ ४३ ॥
कर्कस्थे च दिवानाथेस्नानंकुर्वन्तिये नराः । न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि
चातुर्मास्यंसमासाद्यतत्रैवनिवसाम्यहम् । नास्तिरेवासमापुण्यानदी ब्रह्माण्डभूतले
महेशान्नापरो देवो मुक्तिदो न जनार्दनात् । उज्जयिनीसमानास्ति पुरीकामवरप्रदा
कर्कराजसमं तीर्थं नास्ति वत्स! महीतले । यस्य दर्शनमात्रेण मुक्तिभागी भवेन्नरः
एवं व्यास!समाख्यातं ब्रह्मणा भार्गवाय च । तस्मात्सर्वप्रयत्नेन महाकालवनं व्रज
अस्माकं चाऽपि तत्रैव स्थानं परमशोभनम् ।
चातुर्मास्ये हरौ सुप्ते यावद्यायात्प्रबोधिनी ॥ ४६ ॥
तावत्कालं हि तत्रैव मुक्तिरेव न संशयः । चातुर्मास्ये हरौ सुप्ते जहातिचेत्कलेवरम्
यमलोके चिरं वासोजायतेनाऽत्रसंशयः । यस्मात्तुलसिकाभागे शालिग्रामे सुरालये
आत्मानंहिपणीकृत्यतत्रैवसंनियोजयेत् । तावत्प्रबोधिनी चेति द्वादशीद्विजसत्तम
पश्चाद् घृतसुवर्णेन मोचयित्वा स्वकं नयेत् ।
चातुर्मास्योद्भवं दोषं बाधते न च मानवम् ॥ ५३ ॥
यस्य शिप्रोदकेस्नानं कर्कराजेऽनुजायते । एवं व्यास! वरं तीर्थं सर्वतीर्थफलप्रदम्
पृथिव्यांयानितीर्थानिसरितःसागराश्चये । ते सर्वेचसमायान्तिचातुर्मास्येद्विजोत्तम

तस्माच्च तद्वरं तीर्थं कर्कराज इति स्मृतम् ॥ ५६ ॥
य एतां वै कथां पुण्यां शृण्वन्ति श्रावयन्ति च ।
न तेषां जायते दोषश्चातुर्मास्योद्भवः कदा ॥ ५७ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां पञ्चमेऽवन्तीखण्डे-ऽवन्तीक्षेत्रमाहात्म्ये कर्कराजतीर्थमहिमवर्णनंनामा-शीतितमोऽध्यायः ॥ ८० ॥

एकाशीतितमोऽध्यायः

देवतीर्थयात्रामहिमवर्णनम्

सनत्कुमार उवाच

मेरोश्च दक्षिणे भागे दुग्धकुण्डोत्तरे तथा । ऋषभः पर्वतश्रेष्ठो देवगन्धर्वसेवितः ॥
यत्र देवाङ्गनारम्याः क्रीडन्ति सततं द्विज! । तत्र रम्यसरोनाम तिष्ठते सर्वकामदम्
तत्र तीर्थं नरः स्नात्वा सुभगो जायते ध्रुवम् ।
देवैश्च क्रीडते नित्यं भुवि विख्यातकः परम् ॥ ३ ॥
भाद्रपदसिताष्टमीमैत्रर्क्षेणसमन्विता । तद्दिनेऽत्र समागम्य स्नानदानादिकाःक्रियाः
करोतिसततं व्यास तेषां लोकाः सनातनाः । मेरोश्चेशानकेतीर्थं दिव्यंपरमशोभनम्
बिन्दुसरेतिविख्यातं सर्वकामवरप्रदम् । गङ्गा सरस्वती पुण्या सरयूश्च पयस्विनी
एताःसरिद्वरायातास्तत्रसत्यवतीसुत । येसिद्धा ये च साध्याश्चतपस्विनोधृतव्रताः
उपासाञ्चक्रिरे तत्र तस्य तीर्थस्य सर्वदा ।
तस्मिंस्तत्तीर्थे नरः स्नात्वा सर्वार्थान्प्राप्नुते ध्रुवम् ॥ ८ ॥
भाद्रपदे च शुक्ला वै चतुर्थी या प्रकीर्तिता ।
सिद्धा सा सर्वदा प्रोक्ता यत्र जातो गणाधिपः ॥ ६ ॥

मनः कामेश्वरः ख्यातः सर्वकामवरप्रदः । तस्य तीर्थे नरः स्नात्वादृष्ट्वादेवं गणेश्वरम्
मनोरथशतं प्राप्य कामचारी भवेन्नरः ॥ १० ॥

व्यास उवाच

अस्मिन्क्षेत्रे शुभे ब्रह्मन्महाकालवनोत्तमे ॥ ११ ॥
तीर्थानि कतिसङ्ख्यानि देवतायतनानि च ।
यानि कानि च ख्यातानि तानि नो वद विस्तरात् ॥ १२ ॥

सनत्कुमार उवाच

शृणुव्यासऋषिश्रेष्ठकथांपापहरांपराम् । अवन्त्यांयानितीर्थानिलिङ्गानिचमहामुने
तानिवर्णयितुं शक्तः स्वयम्भूश्चतुराननः । वर्षाणामयुतैःषड्भिर्न च वक्तुं कथञ्चन
यावन्तो मेघमालानां बिन्दवो हि स्रवन्ति च ।
धरित्र्यां तृणसङ्ख्या वै पृथिव्यां सिकतास्तथा ॥ १५ ॥
नभसो ज्योतिषां सङ्ख्यां वक्तुं कोऽपि न शक्नुते ।
न हि तीर्थलिङ्गसङ्ख्याः सन्त्यवन्त्यां तपोधन! ॥ १६ ॥
अन्तरिक्षेचमेदिन्यां तीर्थभूता पुरी त्वियम् । वापीकूपतडागादिप्रस्रवोद्धरणानिच
नद्यःसरांसिखाताश्च तीर्थभूतं हि सर्वशः । तथापि देवयात्रायां प्रसंगेन निबोध मे
यानि कानि च मुख्यानि तानि तुभ्यं वदाम्यहम् ।
यज्ज्ञात्वा मोक्ष्यसे नित्यं पूर्वाऽऽचीर्णशुभाशुभैः ॥ १६ ॥
प्रातरुत्थाय यो नित्यं शुचिः प्रयतमानसः ।
विष्णुस्मरणसम्पन्नः सर्वकामक्रियादिकम् ॥ २० ॥
कृत्वा वै सर्वगन्धादितिलाक्षतसमन्वितः । स्नात्वारुद्रसरे तात तथैवच व्रतश्चरेत्
उर्ज्जमाधवयोश्चैव वैशाखाऽऽषाढयोस्तथा ।
शिवरात्र्यां विशेषेण देवयात्रा प्रशस्यते ॥ २२ ॥
यस्यदेवस्ययत्तीर्थं यस्यदेवस्य सन्निधौ । तत्राभिषेकःकार्योवैदेवतायाश्च पूजनम्
विधिवच्चाचरेद्यस्तु स सर्वं फलमश्नुते । तस्मात्सर्वप्रयत्नेन देवयात्रां समाचरेत्

व्यास उवाच

ब्रह्मन्केन प्रकारेण देवयात्रां चरेन्नरः । तत्सर्वं श्रोतुमिच्छामि विस्तरेण तपोधन

सनत्कुमार उवाच

शृणु व्यास परं गुह्यं प्रवक्ष्यामि यथाश्रुतम् । उमामहेश्वरसम्वादं देवयात्रादिकर्मसु

उमोवाच

प्रभावः कथ्यतां देव! क्षेत्रस्याऽस्य महेश्वर! ।
यानि तीर्थानि विद्यन्ते यानि लिङ्गानि सन्ति वै ॥
तान्यादितो मे भूमंस्त्वं वदस्व वदताम्वर ॥ २७ ॥

ईश्वर उवाच

शृणु देवि प्रयत्नेन प्रभावं पापनाशनम् ॥ २८ ॥
क्षेत्रमाद्यं महादेवि! ममातीव प्रियं सदा ।
यत्र शिप्रा महापुण्या दिव्या नवनदी प्रिया ॥ २६ ॥
नीलगङ्गा सङ्गमं च तथा गन्धवती नदी ।
चतस्रो मे प्रिया नद्यः कुमुद्वत्यां हि सुव्रते ॥ ३० ॥
ईश्वराश्चतुराशीतिस्तथाऽष्टौसन्तिभैरवाः । एकादशतथारुद्राआदित्याद्वादशस्मृताः
षड्वै विनायकाश्चाऽत्र देव्यश्च चतुर्विंशतिः ।
यऽतोहमागतो भद्रे! महाकालवनोत्तमे ॥ ३२ ॥
विष्णुब्रह्मादयः सर्वे ह्यत्रैव निहिताःशुभे । देवैर्व्याप्तमिदं क्षेत्रं देवि योजनमायतम्
दशविष्णुः समाख्यातास्तेषां नामानि मे शृणु ।
वासुदेवो ह्यनन्तश्च बलरामो जनार्दनः ॥ ३४ ॥
नारायणो हृषीकेशो वाराहो धरणीधरः । विष्णुर्वामनरूपेण शेषशायी श्रियालयः
दशैते वैष्णवा प्रोक्ताः सर्वपापहराः पराः ॥ ३६ ॥

उमोवाच

भगवञ्छ्रोतुमिच्छामि देवानामनुपूर्वतः । महाकालवनेरम्ये ये वसन्ति सुरेश्वराः

विनायका भैरवा देव्यो ये सन्ति पवनात्मजाः ।

रुद्रादित्यास्तथा चाऽन्ये तेषां नामानि मे वद ॥ ३८ ॥

ईश्वर उवाच

ऋद्धिदःसिद्धिदोनित्यंकामदोवैगणाधिपः । विघ्नहाच प्रमोदीच चतुर्थीव्रतकप्रियः

षडेतेवैसमाख्याताविघ्ननाशकराःपराः । उमाचण्डीश्वरीगौरीऋद्धिसिद्धिप्रदानृणाम्

वटयक्षिणी वीरभद्राइत्येताश्चाष्टमातरः । महामाया सतीख्याताकपालमातृकातथा

अम्बिका शीतला चैव एकानंशा च सिद्धिदा ॥ ४२ ॥

ब्रह्माणीपार्वतीचैवयोगिनी योगशालिनी । कौमारीभगवतीचैवषट्कृत्तिकास्तथैवच

चर्पटामातृकाःख्याताचटमातरएव च । सरस्वती तथा ख्याता महालक्ष्मीश्चवैस्मृता

योगिनीमातृका ख्याता श्चतुषष्टिस्ततः स्मृताः ।

कालिका च महाकाली चामुण्डा ब्रह्मचारिणी ॥ ४५ ॥

वैष्णवी च समाख्यातावाराहीविन्ध्यवासिनी ।

अम्बा अम्बालिका चैव चतुर्विंशतिकाः पराः ॥ ४६ ॥

हनूमान्ब्रह्मचारी च कुमारश्चमहाबलो । चत्वारो वै समाख्यातामयातेपवनात्मजाः

दण्डपाणिश्च विक्रान्तो महाभैरवसिताऽसिताः ।

बटुको बालको नन्दी षट्पञ्चाशतिकोऽपरः ॥ ४८ ॥

कालभैरवश्च विख्यातः क्षेत्रपालस्तथाष्टमः । अष्टैवभैरवाःख्याता महापापहराःपराः

कपर्दीच कपाली च कलानाथोवृषासनः । त्र्यम्बकः शूलपाणिश्चचीरवासादिगम्बरः

गिरीशः कामचारी च सर्वःसर्वांगभूषणः । रुद्राश्चैकादशप्रोक्ताः शत्रुपक्षविनाशनाः

अरुणः सूर्यो वेदाङ्गो भानुरिन्द्रोरविरंशुमान् ॥ ५१ ॥

सुवर्णरेताऽहःकर्तामित्रोविष्णुःसनातनः । इत्येतेद्वादशाऽऽदित्याःसर्वरोगहराःपराः

अगस्त्येश्वरमुख्यानांलिङ्गानांचतुराशिनाम् । हिमाचलसुते!नित्यंनामानिगदतःशृणु

अगस्त्येश्वर आख्यातो गुहेश्वरस्ततःपरम् ।

दुण्ढेश्वरस्ततः प्रोक्तो डमरुकेश्वरश्च भामिनि! ॥ ५४ ॥

अनादिकल्पेश्वरः शम्भुः स्वर्णजालेश्वरःपरः । त्रिविष्टपेश्वरोदेवः कपालेश्वरसञ्ज्ञकः

कर्कोटकेश्वरः शम्भुः सिद्धेश्वरस्ततःपरम् । स्वर्गद्वारेश्वरोरुद्रो लोकपालेश्वरोऽपरः

कामेश्वरइतिख्यातःकुटुम्बेश्वरस्ततःपरम् । इन्द्रद्युम्नेश्वर ख्यातः ईशानेशस्ततःपरम्

अप्सरेश्वरइतिख्यातः कलकलेश्वर एवच । नागचण्डेश्वरो देवो दिवापापहरोऽपरः

प्रतिहारेश्वरश्चैव कुक्कुटेशस्ततः परम् । मेघनादेश्वरः पुण्यो महाकालेश्वरः परः ॥

मुक्तेश्वरः समाख्यातः सोमेश्वरस्ततः परम् ।

अनरकेश्वरो देवो जटेश्वरस्ततः परम् ॥ ६० ॥

रामेश्वरो महादेवश्च्यवनेशस्ततः परम् । अखण्डेशःसमाख्यातः पत्तनेशस्ततःस्मृतः

आनन्देशस्ततःप्रोक्तःकन्थडेशस्ततःपरम् । इन्द्रेश्वरइतिख्यातो मार्कण्डेशस्ततःपरम्

शिवेश्वर इतिप्रोक्तः कुसुमेशस्ततःपरम् । अक्रूरेश इतिख्यातः कुण्डेश्वरस्ततः परम्

लुम्पेश्वरःसमाख्यातोगङ्गेश्वरस्ततपरम् । शूलेश्वरेतिविख्यातःओङ्कारेशस्ततस्मृतः

कण्टकेशो महारुद्रः सिंहेश्वरस्ततःपरम् । रेवन्तेश्वरः परो देवो घण्टेश्वरपुरःसरः

प्रयागेश्वरो महादेवः सिद्धेश्वरस्ततः परम् ।

मातंगेश्वरः परो देवः सौभाग्येशस्ततो वरः ॥ ६६ ॥

रूपेश्वरेति विख्यातो ब्रह्मेश्वरस्ततः परम् । जलपेश्वरस्ततो देवः केदारेश्वर एव च

पिशाचेश्वरशम्भुश्च सङ्गमेशस्ततः परः । दुर्धर्षेशश्च विख्यातश्चण्डादित्येश्वरस्ततः

करभेश्वरः परः प्रोक्तो राजस्थलेश्वरः शिवः ।

वडलेश्वरस्ततः प्रोक्तो ह्यरुणेशस्ततः स्मृतः ॥ ६९ ॥

पुष्पदन्तेश्वरो देवो ह्यविमुक्तेश्वरस्ततः । हनुमन्तेश्वरो देवो विश्वेश्वरस्ततः परम्

स्वप्नेश्वर इति ख्यातः सिद्धेश्वरस्ततः परः ।

नीलकण्ठेश्वरो देवः स्थावरेशस्ततः परम् ॥ ७१ ॥

कामेश्वर इति प्रोक्तः प्रतिहारेश्वरस्ततः । पशुपतीश्वरः प्रोक्तो विश्वेश्वरस्ततः परः

स्वर्णजालेश्वरः प्रोक्तो मनःकामेश्वरस्ततः ॥ ७२ ॥

दुर्वासेश्वरनामासौ नागचण्डेश्वरस्ततः । खर्परेशश्च विख्यातो ब्रह्मेश्वरस्ततः परम्

पातालेश्वर आख्यातो गुप्तेश्वरस्ततः परः। कपिलेश्वर इत्याख्यो योगयोगेश्वरःपरः

भीमेश्वरेति विख्यातो धनुःसहस्राभिधः परः।

अग्नीश्वरः परः प्रोक्तो देवेश्वरस्ततः परः ॥ ७५ ॥

द्वादशार्कःसमाख्यातोदशाश्वमेधिकेश्वरः। गदाधरेश्वरःख्यातोवैजनाथेति शम्भुराट्

सोमनाथेश्वरः ख्यातो घुष्मेश्वरस्ततः परः।

भीमशङ्कर इत्याख्यो घण्टेश्वरस्ततः परः ॥ ७७ ॥

ऊषरेश्वरसञ्ज्ञश्चचन्द्रादित्येश्वरः परः। केशवार्कःसमाख्यातः शक्तिभेदेश्वरः परः॥

रामेश्वरः परो देवो वाल्मीकेश्वरशङ्करः।

ज्वालेश्वरः शिवः प्रोक्तो ह्यभयेशस्ततः परः ॥ ७९ ॥

विघ्नहस्तेश्वरः प्रोक्तश्चंचलेशस्ततः परः।

पुरुषोत्तमेति विख्यातो वीरेश्वरस्ततः परः ॥ ८० ॥

कर्णेश्वरश्च विख्यातः पृथुकेशस्ततःपरम्। आनन्देशश्च विख्यातःकोटेश्वरस्तथापरः

अविमुक्तेश्वरः प्रोक्तो हनुमत्केश्वरः परः। विमलेश्वरेतिविख्यातश्चन्द्रेश्वरस्ततःपरः

बिन्दुकेशश्चविख्यातोवालुकेश्वरसञ्ज्ञकः। बृहस्पतीश्वरोदेवोह्यसङ्ख्यातेश्वरस्ततः

यानि कानि च तीर्थानि तानि लिङ्गानि सत्तम!।

तिष्ठन्ति तत्र पूज्यनि तानि वन्द्यानि सर्वशः ॥ ८४ ॥

चत्वारो विदिताः सर्वे द्वारपाला महात्मभिः।

पिङ्गलेश्वरेति च ख्यातः पूर्वद्वारे द्विजोत्तम! ॥ ८५ ॥

दक्षिणे चतथाद्वारेकायावरोहणेश्वरः। बिल्वकेश्वरेतिविख्यातःपश्चिमद्वारमाश्रितः

दर्दुरेश्वरस्ततः प्रोक्तो द्वारे चोत्तरसञ्ज्ञके।

एतेचाऽन्ये च बहवोलिङ्गाख्यास्त्रिभुवनेश्वराः ॥ ८७ ॥

महाकालवने रम्ये समाख्याता हि पावनाः।

षष्टिकोटिसहस्राणि षष्टिकोटिशतानि च ॥ ८८ ॥

महाकालवनेऽव्यासलिङ्गसङ्ख्यानविद्यते। तथाऽपिचप्राधान्येनमयाऽत्रपरिकीर्तिताः

यस्य देवस्य यत्तीर्थं तन्नाम्ना परिकीर्तितम्।

स्नात्वा दत्त्वाच तद्दानं तत्तीर्थस्य फलं लभेत् ॥ ९० ॥

तथा नवग्रहाः पुण्याः समाख्याताः पुराऽनघ!।

तेषां नामानि पुण्यानि तीर्थानि च तथा शृणु ॥ ९१ ॥

नरादित्यइति ख्यातः सोमेश्वरस्ततः परः।

मङ्गलेश्वरः समाख्यातो बुधेश्वरस्ततः परम् ९२ ॥

बृहस्पतीश्वरःप्रोक्तस्तथाशुक्रेश्वरःशिवः। स्थावरेश्वरोमहादेवःसमाख्यातोमुनीश्वरैः

राहुकेतू समाख्यातौतेषां तीर्थानि सत्तम। तत्तीर्थेषुनरः स्नात्वासर्वपापैःप्रमुच्यते

ग्रहा राज्यंप्रयच्छन्तिग्रहा राज्यंहरन्ति च। ग्रहैस्तुव्यापितंसर्वंत्रैलोक्यंसचराचरम्

ग्रहतीर्थे नरः स्नात्वा ग्रहाणामर्चनं चरेत्। नतस्य ग्रहपीडा वै बाधते हि कदाचन

एवं व्यास! समाख्याता मया देवाश्च तीर्थकाः।

यात्रा पुण्यतरा श्रेष्ठा पवित्रा पापनाशिनी ॥ ९७

ग्रहपीडासु चोग्रासु दारिद्र्ये घोरसङ्कटे। तेषामुद्धरणार्थाय देवयात्रा प्रकीर्तिता॥

क्षेत्रस्यान्तर्गृहीं नित्यं ये कुर्वन्ति नरोत्तमाः।

न तेषां दुर्लभं किञ्चित्त्रिषु लोकेषु विद्यते ॥ ९९ ॥

अपुत्रो लभते पुत्रंनिर्धनोधनमाप्नुयात्। विद्यावाञ्जायते विप्रःक्षत्रियोविजयीभवेत्

अक्षया सन्ततिस्तस्य शिवलोके महीयते ॥ १०१ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-ऽवन्तीक्षेत्रमाहात्म्ये देवयात्रान्तर्गृहीसर्वतीर्थयात्राऽनुक्रमणिकादिकथनं नामैकाशीतितमोऽध्यायः ॥ ८१ ॥

———

द्व्यशीतितमोऽध्यायः

अवन्तीतीर्थयात्रामाहात्म्यवर्णनम्

व्यास उवाच

भगवन्भवता सर्वं कथितं देवमूर्तिना। अवन्तातीर्थमाहात्म्यं पवित्रं वेदसम्मितम्

भूयस्तु श्रोतुमिच्छामि त्वत्तो ब्रह्मविदाम्वर! ।

महाकालवने रम्ये अवन्त्यां भुवि सत्तम! ।

तीर्थानि कति सङ्ख्यानि विद्यन्ते ह्यत्र सुव्रत! ॥ २ ॥

सनत्कुमार उवाच

श्रूयतां भो द्विजश्रेष्ठ! कथां पापहरां पराम् ॥ ३ ॥

उमामहेश्वरसम्वादं नारदस्य च धीमतः । नारदेन पुरा पृष्टं प्रश्नमेतद्द्विजोत्तम!

नारद उवाच

भगवञ्छ्रोतुमिच्छामि महाकालवने शुभे ।

तीर्थानि यानिवर्तन्ते तानि नो वद विस्तरात् ॥ ६ ॥

इति पृष्टस्तदा विप्र! नारदेन पुराऽनघ! । उवाच श्लक्ष्णया वाचा उमया सहितोहरः

श्रीमहादेव उवाच

शृणुष्व भो ऋषिश्रेष्ठमहाकालवनेशुभे । तीर्थानि यानितिष्ठन्तितानिवक्ष्यामिसुव्रत

पुष्कराद्यानि तीर्थानि यानि कानि महीतले ।

तानि सर्वाणि वर्तन्ते महाकालवनोत्तमे ॥ ८ ॥

असङ्ख्यातसहस्राणिकोटिकोटीनिसत्तम । रुद्रसरेनिमज्जन्तिकोटितीर्थंतथोच्यते

नीहारकणिकांवृष्टिं गिरौ वर्षन्ति किन्नराः । हेमन्ते चैव दृश्यन्ते तीर्थेवैशाखमोचने

न हि सङ्ख्यां विजानामि तीर्थानां भुवि सत्तम! ।

कियन्ति सन्ति तीर्थानि लिङ्गानि च तथैव च ॥ ११ ॥

तथाऽपि च प्राधान्येन कथयिष्यामि सत्तम! ।

सम्वत्सरस्य यावन्ति अहानि च द्विजोत्तम! ॥ १२ ॥

तावन्ति प्रापणीयानि प्रसिद्धानिपरन्तप । वत्सरेपरिपूर्णे च जायतेऽवन्तियात्रिका

विधिवत्कुरुते यस्तुसाक्षाच्छम्भुर्भवेच्चसः । मन्वन्तरसहस्रेषुकाशीवासेचयत्फलम्

तत्फलं जायतेऽवन्त्यां वैशाखेपञ्चभिर्दिनैः । अवन्तीयात्राकर्तव्याप्रयत्नेन मुमुक्षुणा

माधवेऽपि विशेषेण ह्यवन्तीस्नानमाचरेत् ।

यो हि वैशाखमासाद्य अवन्त्यां व्यास! मानवः ॥ १६ ॥

सम्वत्सरव्रती स्नातस्तीर्थेतीर्थे यथाविधि ।

दत्त्वा दानानि सर्वाणि समूलं (सकलं) फलमश्नुते ॥ १७ ॥

भुक्त्वा भोगान्सुविपुलाञ्छिवलोके महीयते ॥ १८ ॥

त्यत्र कुत्रापि यो नित्यं नरोनिश्चलमानसः ॥

शृणोत्येकमनाः पुण्यां पूजयित्वा च वाचकम् ।

सत्कृत्य विधिवद्वस्त्र वासोऽलङ्कारभूषणैः ॥ १६ ॥

अन्यैश्चविविधैर्भोगैः प्रदानैर्वत्सरेण च । न तस्यदुर्लभं किञ्चिद्विद्यतेभुविसत्तम ॥

एवं व्यास! पुराशम्भुर्नारदाय सुधीमते । उवाच परमाख्यानमवन्तीव्रतमुत्तमम् ॥

तेन प्रख्यापितं पुण्यं सर्वलोकेषुसत्तम । एतत्ते सर्वमाख्यातं मयासत्यवतीसुत ॥

अवन्तीतीर्थयात्रायाः कथाख्यानंसनातनम् । भूयःकिंश्रोतुमिच्छातेवर्ततेद्विजसत्तम

माहात्म्यमेतच्छिवभक्तिवर्द्धनं यशस्करं पुण्यविवर्द्धनं च ।

यः श्रावयेद्वा शृणुयाच्च भक्त्या कुलं समुद्धृत्य हरेः पदं व्रजेत् ॥ १६ ॥

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे ऽवन्तीक्षेत्रमाहात्म्ये व्याससनत्कुमारसम्वादे ऽवन्तीक्षेत्रमाहात्म्यवर्णनं नामद्व्यशीतितमोऽध्यायः ॥ ८२ ॥

———

त्र्यशीतितमोऽध्यायः

अवन्तीमाहात्म्यवर्णनम्

व्यास उवाच

भूयस्तु श्रोतुमिच्छामि त्वत्तोब्रह्मविदांवर। अवन्त्याश्चपरंपुण्यं महिमानंश्रुतंमया
त्वया ब्रह्मविदा प्रोक्तं वत्सरव्रतपारणम्।
तीर्थस्यास्य सुविस्तारात्स्नातकानां द्विजोत्तम! ॥ २ ॥
अचिरेणतुकालेन तीर्थस्यफलमश्नुते। सिद्धोभूत्वा नरोयाति तद्वदस्वद्विजोत्तम॥

सनत्कुमार उवाच

गुह्याद्गुह्यतरंवत्स पृच्छसित्वंममानघ। तत्तेहंसम्प्रवक्ष्यामि शृणुष्वत्वं समाहितः
महाकालंततोगच्छेन्नियतोनियतात्मना। कोटितीर्थेनरस्स्नात्वा पुनर्जन्मनविद्यते
नास्तिवत्समहीपृष्ठेक्षिप्रायाःसदृशीनदी। यस्यानिरीक्षणान्मुक्तिःकिञ्चिरात्सेवनेनवै
माधवेमासियोदेवं पूजयेत्पुरुषोत्तमम्। मोचनेमुच्यतेनित्यं तर्पणादेकवासरात्॥
अवन्त्यामङ्कपाताख्यं ये पश्यन्ति जनार्दनम्।
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥ ८ ॥
इतिव्यासवचस्सर्वेवदन्तिनियतात्मनः। वाराहमत्स्यकन्दाद्या लोमशश्चमहामुनिः
विधिंतथापितीर्थस्यश्रृणुपुण्यसमम्पुनः। योवैस्वल्पेनपुण्येनतीर्थस्यफलमिच्छति
तस्यसर्वस्यवक्ष्यामिश्रृणुष्वेदं तपोधन। सर्वतीर्थफलाकाङ्क्षी शुचिःप्रयतमानसः
अवगाहव्रतीयाति तीर्थानिवाष्टविंशतिः। ऊर्जेमाघेतथाषाढे वैशाखेचविशेषतः॥
यदाकदापुरीं प्राप्य कर्तव्यंतीर्थमज्जनम्। सर्वतीर्थफलंप्राप्य शिवलोकेमहीयते॥

सनत्कुमार उवाच

क्षिप्रातीरेहिवर्तन्तेपुराख्यातानिसूरिभिः। पुण्यानितार्थमुख्यानितानिमेगदतःश्रृणु
पापार्दितःशुचिर्भूत्वा विष्णुविष्णुरितिस्मरन्।

आदाय नियमं सर्वं स्नातकानाञ्च सत्तम! ॥ १५ ॥
स्नात्वा रुद्रसरे नित्यं कृत्वा श्राद्धादिकं तथा।
यथाशक्ति परां वत्स! गां दत्त्वा चैव काञ्चनीम् ॥ १६ ॥
तीर्थराजनमस्तुभ्यं निजतीर्थावगाहने। अनुज्ञांदेहिमेनित्यं करिष्यामितवार्चनम्

इति प्रार्थनामन्त्रः

ततः प्रयातितत्तीर्थं कर्कराजाभिधं सरः। तत्र स्नानादिकं कृत्वा घृतपात्रंप्रदापयेत्
नृसिंहाख्यंपरंतीर्थं तत्रस्नायाद्द्विजोत्तम!। कृष्णाजिनंततोदद्यादात्मकार्यविशुद्धये
सङ्गमो नीलगङ्गायाःक्षिप्रायाश्चैवसत्तम। तत्र स्नात्वाशुचिर्भूत्वादृष्ट्वाचसङ्गमेश्वरम्
वाहनञ्च ततो देयं द्विजातिभ्यःस्वलङ्कृतम्।
भूषणानि च देयानि यानानि विविधानि च ॥ २१ ॥
ततः प्रायाद् व्रती सम्यक् तीर्थं पैशाचमोचनम्।
तत्र स्नात्वा च विधिवदाह्निकादि च कारयेत् ॥ २२ ॥
गांसवत्सां ततो दद्याद्वेदवेदाङ्गपारिणे। सीदत्कुटुम्बिने नित्यं द्विजाय मुनिसत्तम
महादानानिसर्वाणि तत्रदेयानिसत्तम। पिशाचेशं ततो दृष्ट्वा सर्वपापैः प्रमुच्यते॥
गन्धर्वतीर्थं गच्छेच्च नियमी व्रतकारकः।
तत्र स्नात्वा शुचिर्भूत्वा श्राद्धं कुर्यात्समाहितः ॥ २५ ॥
पप्रिजल्पेश्वरंदेवं पूजयेद्विधिवद्द्विज। ब्राह्मणेभ्यस्ततोदद्याद्गेहदानादिकं परम॥
दासीदासंततोदेयं सर्वकार्यार्थसिद्धये। धनवान्पुत्रवाँल्लोके मृतो मोक्षमवाप्नुयात्
ततो गच्छेद्व्रतीविप्रकेदारं तीर्थमुत्तमम्। तत्रस्नात्वामहादानंब्राह्मणेभ्यस्समर्पयेत्
शुभंगोमिथुनं दत्त्वा विधिवत्तत्रकारयेत्। कम्बलाजिनवासांसि तत्रदेयानिसत्तम॥
सर्वपापविशुद्धात्मा शिवलोके महीयते। चक्रतीर्थेनरःस्नात्वा चक्रपाणिसमर्चयेत्
शङ्खशस्त्रविमानानि तत्रदेयानि सत्तम। मुच्यते सर्वपापेभ्यो विष्णुलोके महीयते
सोमतीर्थे नरःस्नात्वा दृष्ट्वा सोमेश्वरं शिवम्।
निर्मलाङ्गो नरो भाति कुष्ठरोगो न बाधते ॥ ३२ ॥

इक्षुधेन्वादिकंदानं तत्रदेयं द्विजातये । देवप्रयागंगच्छेच्च स्नानार्थं द्विजसत्तम ॥३३
तत्र स्नात्वाशुचिर्भूत्वा देवंमाधवमर्चयेत् । गुडधेनुः प्रदातव्या विधिदृष्टेन कर्मणा
सर्वपापविशुद्धात्मा देवलोके महीयते । प्रयागे परमं व्यास वेणीतीर्थमनुत्तमम् ॥
तत्र स्नानञ्चकर्त्तव्यं तिलामलकसंयुतम् । प्रयागेशमथाभ्यर्च्य सकलंफलमश्नुते ॥
तिलधेनुः प्रदातव्या विधिवद्द्विजपुङ्गवे । सर्वकामवरम्प्राप्य विष्णुलोके समोदते

ततो गच्छेद्व्रती भूयो योगतीर्थमनुत्तमम् ।
तत्र स्नात्वा शुचिर्भूत्वा योगिनीश्वरमर्चयेत् ॥ ३८ ॥

जलधेनुं ततो दद्याद्दीर्घायुश्च सुखीभवेत् । कपिलाश्रमंपरंतीर्थंनरोगच्छेत्ततःपरम्

स्नानदानादिकं कृत्वा कपिलेश्वरमर्चयेत् ।
मुच्यते सर्वपापेभ्यस्तपोलोके स गच्छति ॥ ४० ॥

घृतकुल्यापरंतीर्थं क्षिप्राकूलेच्च पश्चिमे । तत्र स्नात्वानरोनित्यं घृतधारेश्वरंशिवम्
पूजयेद्विधिवद्विप्र घृतधेनुं समर्पयेत् । प्राप्यपुण्यकृताँल्लोकान् सर्वपापैः प्रमुच्यते
मधुकुल्यांनरःस्नात्वा पूजयित्वा महेश्वरम् । मधुदानं प्रकुर्वीत इक्षुधेनुंततः परम्
ऊषरं परमं तीर्थं सर्वतीर्थफलप्रदम् । तत्र स्नात्वा नरः पश्येन्महेशमूषरेश्वरम् ॥

फलमूलादिकं देयं प्राप्यते मोक्ष उत्तमः ।
नरादित्यः स्थितो यत्र तत्र तीर्थं परं स्मृतम् ॥ ४५ ॥

तत्र स्नात्वा नरः पश्येत् क्षेत्रादित्येश्वरंपरम् । रथदानंततोदत्त्वा नरलोकेसगच्छति
केशवार्कोपरोदेवस्तस्यतीर्थंपरंस्मृतम् । तत्र स्नानं विधेयञ्च केशवार्कसमर्चनम्
अन्नं बहुविधंदेयं तत्र तीर्थेद्विजोत्तम । कालभैरव आख्यातस्तत्रतीर्थे महाव्रती
तत्रस्नात्वानरोनित्यं दृष्ट्वा भैरवमन्तकम् । दद्यात्पूर्णंमहादानं नगच्छेद्यमशासनम् ॥

द्वादशार्केति विख्यातं क्षिप्राकूले च दक्षिणे ।
तीर्थञ्च सर्वपापघ्नं सर्वकामवरप्रदम् ॥ ५० ॥

तत्र स्नात्वाशुचिर्भूत्वा द्वादशार्कंसमर्चयेत् । अजादानञ्चदेयंवैवासोऽलङ्कारसंयुतम्
आरोग्यं सर्वदादेहे तस्यसम्पत्पदेपदे । तत्रापि ऋषयोदेवाः सन्ध्योपासनतत्पराः ॥

उपासाञ्चक्रिरेतस्य प्रातःकालेसदैवहि । तत्रतीर्थे नरःस्नात्वाशुचिर्भूत्वासमाहितः
एकानंशेति विख्याता भवानी पापनाशिनी । तामर्चयेद्द्विजश्रेष्ठदशाश्वमेधपंशिवम्
तत्र देयं महादानं श्वेताश्वं समलङ्कृतम् । विप्रायवेदविदुषे विधिवदृषिसत्तम! ॥

सर्वपापविशुद्धात्मा स्वर्गलोके महीयते ।
योऽसावङ्गारको देवो विख्यातो वै धरात्मजः ॥ ५६ ॥

तस्य तीर्थं परं व्यास सर्वतीर्थफलप्रदम् । तत्र तीर्थेनरः स्नात्वा मङ्गलेश्वरमर्चयेत्

गुडान्नं वृषभं रक्तं सवासः समलङ्कृतम् ।
स्वलङ्कृतेभ्यो विप्रेभ्यो यो ददाति समाहितः ॥ ५८ ॥

तस्यहस्तगतालक्ष्मीः पुत्रदारादिसम्पदः । खगङ्गासङ्गमंतीर्थंगङ्गोद्भेदसमन्वितम्
तत्र तीर्थेनरःस्नात्वा दृष्ट्वागङ्गेश्वरंशिवम् । मुच्यते सर्वपापेभ्यो विष्णुलोकेमहीयते
तिलपात्रं प्रदातव्यं विधिवत्काञ्चनान्वितम् । सर्वसौख्यकरंदानं सर्वपापहरं परम्
ऋणमोचनकं तीर्थं सर्वपापहरं स्मृतम् । तत्र तीर्थे नरः स्नात्वा ऋणतेश्वरमर्चयेत्
घृतश्राद्धं प्रकुर्वीत दत्त्वास्वर्णञ्च शक्तितः । ऋणत्रयविनिर्मुक्तः स्वर्गलोके महीयते

ततो गच्छेन्नरो नित्यं शक्तिभेदमकल्मषम् ।
तीर्थानाञ्चैव सर्वेषामुत्तमं पापनाशनम् ॥ ६४ ॥

तत्र स्नात्वानरोव्यास शुचिः प्रयतमानसः । मातृकाणाञ्चचसर्वेषांदर्शनंकारयेद्बुधः
कौमारीकार्त्तिकीमाता चर्पटावटमातरः । तथा भगवतीं देवीं स्कन्दञ्चैवसमर्चयेत्

तत्र श्राद्धानि देयानि विधिवद् द्विजसत्तम! ।
दत्त्वा शय्यादिकं दानं कांस्यधेनुं तथेतरद् ॥ ६७ ॥

मातुर्ऋणंसमुत्तीर्य सायुज्यं लभतेनरः । यत्तत्तीर्थवरंश्रेष्ठं पापमोचनसञ्ज्ञकम् ॥६८
तत्र स्नात्वानरैर्देयं छायादानञ्च सत्तम । सर्वपापविशुद्धात्मा जायते भुवि मानवः ॥
ततःपरंपरंव्यास तीर्थंत्रैलोक्यविश्रुतम् । प्रेतशिलेतिविख्यातं प्रेतमोक्षकरम्परम् ॥
तत्र स्नात्वानरोदद्याच्छ्राद्धंद्विजसमाहितः । तिलोदकप्रदानेन पितरोयान्तिसद्गतिम्
घटदानंततोदेयं छत्रोपानत्समन्वितम् । महिषीञ्चततोदद्याद्वासांसि विविधानिच

अन्नदानंततोदेयं रसेनलवणान्वितम् । यमेश्वरं समभ्यर्च्य निरयेनाधिगच्छति ॥

पितरस्तस्य सन्तुष्टा यान्ति ब्रह्म सनातनम् ।

पितृदोषा न बाधन्ते तेषाञ्च द्विजसत्तम! ॥ ७४ ॥

तीर्थानामुत्तमं तीर्थं भुवित्रैलोक्यवन्दितम् । नवनदीसङ्गमोयत्र तत्र तिष्ठति पार्वती

तत्र स्नात्वा नरो नित्यं शुचिर्भूत्वा समाहितः ।

पूजयेद्भगवतीं भद्रां पार्वतीं विधिवत्ततः ॥ ७६ ॥

महादानानिकुर्याच्च हस्तिपान्नधरान्तिलान् । सुरभींदुग्धसहितांदद्याद्द्विजवरायच

सर्वपापविशुद्धात्मा साक्षाच्छम्भुर्भवेन्नरः । मन्दाकिनींततोगच्छेदात्मकार्यविशुद्धये

तत्र स्नात्वा शुचिर्भूत्वा पूजयेद्यः सदाशिवम् ।

दत्त्वा शकटमन्नाद्यं तिलद्रोणं प्रदापयेत् ॥ ७९ ॥

सर्वपापविशुद्धात्मा धनाधिपसमोभवेत् । ततोगच्छेद्रुव्रती विप्र तीर्थंपैतामहंपरम्

तत्र स्नात्वा शुचिर्भूत्वा विधिवत्स्नानमाचरेत् ।

दत्त्वा दानानि सर्वाणि त्रीणि तत्र विशेषतः ॥ ८१ ॥

यथाशक्तिप्रदेयानिपृथ्वीगावःसुवर्णकम्। विप्रांश्चभोजयेन्नित्यंविधिवद्भूरिदाक्षणैः

ततस्तुपुनरागम्य रुद्रसरमनुत्तमम् । तस्मिन्स्नात्वाचनत्वाच दृष्ट्वादेवंमहेश्वरम् ॥

पूजयित्वायथान्यायं यात्रेश्वरमनुत्तमम् । तुलसीबिल्वपत्रैश्च पुष्पैर्विविधवासकैः

धूपदीपादिनैवेद्यैर्मुखवासोत्तरच्छदैः । पूजयित्वा महादेवं यात्रेश्वरमुमापतिम् ॥ ८५

प्रार्थयेद् देवदेवेशं व्रतसम्पूर्णहेतवे । यात्रेश्वर!नमस्तुभ्यमुमानाथजगत्पते! ॥ ८६ ॥

त्वत्प्रसादात्कृतां यात्रां सफलां कुरु मेप्रभो! ॥ ८७ ॥

सनत्कुमार उवाच

एवं यः कुरुतेयात्रामवन्त्याश्चद्विजोत्तम । अवन्तीवासजं पुण्यं प्राप्यतेनात्रसंशयः

भुक्त्वा च विपुलान्भोगान् धनदारादिसम्पदम् ।

सर्वपापविशुद्धात्मा मृतः शिवपुरं व्रजेत् ॥ ८९ ॥

ये शृण्वन्ति कथां पुण्यां पवित्रां पापहारिणीम् ।

न तेषां दुर्लभं किञ्चिदिह लोके परत्र च ॥ ९० ॥

माहात्म्यमेतच्छिवभक्तिवर्द्धनं यशस्करं पुण्यविवर्धनञ्च ।

यः श्रावयेद्वा शृणुयाच्चभक्त्या कुलं समुद्धृत्य हरेः पदं व्रजेत् ॥ ९० ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां पञ्चमेऽवन्तीखण्डे-

तीर्थमहिमनामत्र्यशीतितमोऽध्यायः ॥ ८३ ॥ *

इत्यवन्तीक्षेत्रमाहात्म्यंसमाप्तम्

——:*:——